706

Title स्मृतितत्त्वे मलमासतत्त्वम्

Author रघुनन्दन भट्टाचार्यः

Extent ५१ Age

Subject धर्मशास्त्रम् . सम्पूर्णम्

नं० ७०६-घ

स्मृतितत्त्वे मलमासतत्त्वम् (धर्मशास्त्रम्)

(संपूर्णम)

नं० ७०६-घ

पत्राणि ५१

५१ पत्राणि

प्रथमं तत्त्वम् १

[illegible] ५१ पत्रे

ॐ नमो नारायणाय॥ प्रणम्य सच्चिदानन्दं परमात्मानमीश्वरं। मुनीन्द्राणां स्मृतेस्तत्त्वं वक्ति श्रीरघुनन्दनः। मलिम्लुचे तथा दायेशुद्धौ चदश संस्कृतौ। प्रायश्चित्ते विवाहे
च तिथ्यां जन्माष्टमीव्रते। दुर्गोत्सवे व्यवहृताविकादश्यादिनिर्णये। तडागभवनोत्सर्गे वृषोत्सर्गे चयेव्रते। प्रतिष्ठायां परीक्षायां ज्योतिषे वास्तुसंज्ञके। दीक्षायामा
ह्निके कृत्ये क्षेत्रे श्रीपुरुषोत्तमे। सामश्राद्धे यजुःश्राद्धे शूद्रकृत्यविचारणे। इत्यष्टाविंशतिस्थाने तत्त्वं वक्ष्यामि यत्नतः। प्रणम्य भारतीकान्तमज्ञानध्वान्तभास्क
रं। सतां मुदे स्मृतेस्तत्त्वे तत्त्वं भावे मलिम्लुचे। मासशब्दं तथोत्पत्तिवाक्यं दर्शादिकस्य च। प्रकृतौ विकृतौ धर्म्मः पक्षादियागकालता। चान्द्रसावननाक्षत्रसौराणां च निरू
पणं। तथा कर्म्मविशेषेषु चान्द्रादिमासनिर्णयः। सिंहार्कादौ नयाचास्याहशास्त्रोव्यसनानि च। दैवस्य लक्षणं कर्म्मसिद्धये दैवपौरुषे। कालश्चकृतवः पुंसां रिपुः कष्टो
र्घ्यदानकं। अगस्त्यस्य मुनेर्वाच्यमुत्तरायणशुद्धयोः। चूडोपनयनं सन्ध्याकालेतीतेपि सा भवेत्। सीमन्तोन्नयनं जातेष्वप्युपनायान्तरावधि। स्नाने च कार्त्तिकादेस्तु सौर १ म
चान्द्रविकल्पनं। तत्राशक्तौ प्रतिनिधिर्नानुकल्पविधिस्तथा। स्नानतर्पणयोर्मध्ये प्रातःसन्ध्याक्रियास्तथा। पौर्णमास्यन्तमासेन मूलकानाम भक्ष्यता। सौरेण माघव
स्नाने नाक्षत्रस्य प्रयोजनं। चान्द्रसौरोक्तकार्याणां वाक्ये मासे तथा विधौ। अन्यत्र मुख्यचान्द्रः स्यादग्राह्योरतस्य साधकं। मासशब्दस्य दर्शान्तवाच्यत्वे साधकान्तरं। तिथेर्ल
क्षदिनत्वं च धर्म्मशास्त्रेण बाध्यता। अर्थशास्त्रस्य भोगानां चैपुरुषत्व निर्णयः। त्रिंशत्तिथ्यात्मको मासो लग्नमानादिनिर्णयः। नाक्षत्रवत्सरे रायुर्मृताह प्राक्तिथौ तथा। मारामा
सिकाब्दिके श्राद्धे चैत्रादेश्चान्द्रताचिता। हेतुवन्नाप्यवत्वान्मेषादिराशिनिर्णयः। शाकेग्रीहकमानं चैत्रादेरब्दताचिता। महाज्यैष्ठीविचारो च संवत्सरादिभाषणं। उद्देशतो मासशब्दा

देरयनर्त्तुनिरूपणं ।लक्षणं मलमासस्य तद्युग्मस्यैकहायने। विचारः सावनाहेनसहवारप्रवर्त्तनं। क्षयमासाधिमासत्वं संक्षेपो मलमासके। दीक्षाकालविधानं तद्दीक्षाप्रति
प्रसूतिका। शूद्रस्योंकारयुक्तं च निषेधादीक्षितस्य च। सूतकेपि च पूजादि रसौ च विष्णुकीर्त्तनं। अधिमासे विवाहादि निषेधस्य निरूपणं। सपिंडीकरणश्राद्धात सिद्धिः स्यादा
द्विकस्य च। ग्रहदोषस्य फलस्यापि द्रव्यादौ पाकनिर्णयः। स्मार्त्ते शूद्राधिकारश्च प्रायश्चित्तं मलिम्लुचे। निरपेक्षं शान्तिकं च गजच्छायानिरूपणं। शूद्रस्यापि मघाश्राद्धं मविमन्ते
पृथक क्रिया। मघानिमित्तके श्राद्धे पुत्री पिंडं च वर्जयेत्। अपिराउ कामघाश्राद्धात पक्षश्राद्धं कृतं भवेत्। पार्वणासनदानादौ येचात्र त्वेतिभाषणं। पर्य्युदासो गयापां तु कालदो
षाप्रतीक्षणं। नवान्नश्राद्धकालश्च विजन्मादिविवेचनं। कालाशुद्धिविचारश्च अकालवर्षणे तथा। दोषाधिक्यं निषेधे च चातुर्मास्यव्रतं तथा। अनुभेदन्तथोत्पादे दोषाभावविनिर्णयः
रोगे दानादिकं चैव तस्य भेदेपि पापतः। काम्यं कृष्णस्य तुष्ट्यर्थं प्रकर्त्तव्यं मुमुक्षुणा। महादानस्य गणना तथा तस्य च लक्षणं। व्रतं यन्मलमासाहिं पितृपक्षमृत क्रिया। अश्व
युक्कृष्णपक्षीयश्राद्धसम्यङ्निरूपणं। मलमासे त्वमावस्याप्रत्याब्दिकविवेचनं। सपिंडनस्यापकर्षे गर्भहत्यादिहेतुकं सन्यासप्रतिषेधश्च कलौ क्षत्रविशो र्भवेत्। पुत्रेतरेण कर्त्त
व्यमेकोद्दिष्टं मृताहनि। न पार्वणं कदाचित्तु दर्शादिकमृतस्य च। मलमासान्तरेपीस्यान्मलमासमृताब्दिकं। निबंधान बहुधालोक्य निबध्यन्ते सतां मुदे ॥ ० ॥ अथ मासशंक्य ॥ ० ॥
तत्र लघुहारीतः॥ इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्त्तितः। अग्नीषोमौ स्मृतौ मध्ये समाप्तौ पितृसोमकौ। यत्रातिथौ सा च शुक्लप्रतिपत्। तथा हि। अमावस्यायाममावस्याया य
जेत पौर्णमास्यां पौर्णमास्या यजेतेति विहितदर्शपौर्णमासयागयोः कर्मस्वरूपत्तापकरूपोत्पत्तिश्रुतिश्च समामनन्ति। यथाग्नेयोष्टाकपालो ऽमावास्यायां पौर्णमास्यां चाच्यु

तोभवति उपांशुयाजमन्तरा यजतीति ताभ्यामेतदग्नीषोमीयमेकादशकपालं पौर्णमास्यं प्रायच्छत् । ऐन्द्रं दधि अमावास्यायामिति ताभ्यां यागाभ्यां तेनाग्नेयोऽष्टाकपालोपांशुया

२ जाग्नीषोमीयैकादशकपालयागास्त्रयः पौर्णमास्यां । आग्नेयाष्टाकपाल ऐन्द्रदध्यैन्द्रपयोयागास्त्रयोऽमावास्यायामित्यर्थः । आशुश्रुतिषु अमावस्यापौर्णमासीपदानि प्रतिपत्सहितं तदु

भयपराणि । अत्र पूर्वयोर्यागारंभः । प्रतिपदोर्यागः । तथा च । द्वे ह वै पौर्णमास्यौ द्वे अमावास्ये तस्मात् प्रतिपद्युपवसन् यजेतापरेद्युरिति श्रुतिः । अत्र पौर्णमास्यौ पौर्णमासी प्रतिपदौ अमावा

स्ये अमावस्याप्रतिपदौ द्वयमाह । शतपथब्राह्मणेऽपि पूर्वेद्युरग्निं गृह्णाति उत्तरमहर्यजतीति स्मृतयश्च यथा गोभिलः । पक्षान्ता उपवस्तव्याः । पारस्करः । पक्षादिषु स्थालीपाकं श्र

पयित्वा दर्शपौर्णमास्यदेवताभ्यो जुहोतीति । तथा च कल्पसूत्रं । दर्शपौर्णमासाभ्यां मासं यजन्ते पक्षादौ यद्धविस्तत् सर्वस्मिन्निति । अस्यार्थः । यावज्जीवकार्य्याद्दर्शपौर्णमासयोः २ म

प्रकृतिभूतयोर्विकृतिभूतौ मासमसाध्यौ दर्शपौर्णमासौ कौण्डपायिनामयनीयौ कर्त्तव्यौ । अत्र पक्षादौ यद्धविस्तत् सर्वस्मिन्मासीति । एवं च विकृतिगतेन पक्षाद्यावित्यनेन प्रकृ

तीभूतयोरपि दर्शपौर्णमासयोः पक्षादिकालत्वमवधारितं । यथा ज्योतिष्टोमे द्वादशगोशतदक्षिणाविभागः षोडशर्त्विजां तद्विकृतीभूतसत्वामक द्वादशसाध्ये शतेनार्द्धिनो

दीक्षयन्तीत्यादि दर्शनेन निर्णीयते । तत्र विभागमनुरण्याह सर्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे । तृतीयिनस्तृतीयांशाश्चतुर्थाश्चैकपादिनः । दक्षिणागोशतविभागाय श्रौ

तकात्यायनोऽपि अथ द्वादश द्वादशाद्येभ्यः षट् षट् द्वितीयेभ्यः । चतस्रश्चतस्रस्तृतीयेभ्यस्तिस्रस्तिस्र इतरेभ्यः इत्यत्र षोडशानामृत्विजां चतुश्चतुरः कृत्वा चत्वारो वर्गा इति । तेन दर्श

पौर्णमासयाजिना च । यत्र शुक्लप्रतिपदि इन्द्राग्नी हूयेते स मासादिः मध्ये मासमध्ये कृष्णप्रतिपदि अग्नीषोमौ हूयेते इति कृत्वा स्मृतौ एवममावस्यायामपराह्णे पिण्डपितृयज्ञे न चरन्तीति

श्रुत्युक्तपितृयज्ञांगाग्नौकरणहोमीयसोमायपितृमते स्वाहेति मंत्रप्रकाश्ये पितृसौम्यौ समानौ मास समाप्तावमावस्यायां हूयेते इति कृत्वा स्मृताविति। अत्र विशेषतो मासादिमध्यसमा
प्तिकीर्त्तनात् शुक्लप्रतिपदादिदर्शान्तएव मासशब्दस्य शक्यतायां मुनेः स्वरसोऽवगम्यते। सावनसौरादीनां गौणतायामपीति अत्र पर्वणो यस्तुरीयोंऽश आद्याः प्रतिपदस्त्रयः। या
गकालः स विज्ञेयः प्रातर्युक्तो मनीषिभिरिति बौधायनवचनेन बह्वृचां यागकालतया बोधितोपि दर्शपौर्णमास्यंशो नियततया न मासादिमध्यघटकः। किन्तु पूर्वोक्तश्रुत्यादिभिः प्रदि
पदेव यजुःसामवेदीनां नियततया वक्ष्यमाणछंदोगपरिशिष्टात् गर्गवचनाच्च। बह्वृचां यागस्य पर्वकालकरणपक्षेपि प्रतिपदि समापनस्यावश्यकतया प्रतिपदेव मासादिमध्य
घटिकेति। तथा च छंदोगपरिशिष्टं। पक्षादावेव कुर्वीत सदा पक्षादिकं चरुं। पूर्वाह्ण एव कुर्वीत विद्धेप्यन्ये मनीषिणः। विद्धे द्वितीया विद्धे। पक्षादावेवेत्यत्र एवपदमयोगव्यव
च्छेदपरं। नत्वन्ययोगव्यवच्छेदपरं तथा च कालादर्शकालमाधवीयप्रभृतिदाक्षिणात्यवैदिकग्रन्थेषु गर्गः। प्रतिपद्यप्रविष्टायां यदि स्यादिष्टिः समाप्यते। पुनः प्रणीय हुतस्तेष्टिः क
र्त्तव्या योगविचक्षणैः। प्रणीयाग्निमितिशेषः। गोभिलोपि। आवर्त्तने यदा सन्धिः पर्वप्रतिपदोर्भवेत्। तदहर्यागइष्येत परतश्चेत्परेहनि। आवर्त्तनमष्टममुहूर्त्तः। पूर्वाह्णापराह्ण
रूपद्विधाविभक्तदिनस्यावधित्वेनावर्त्तनमाह स्कन्दपुराणे। आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः। आवर्त्तनाद्यासरस्य छायायाः परिवर्त्तनात्। प्रागिति। अतएवोक्तं अश्वत्थं
वंदयेन्नित्यं पूर्वाह्णे प्रहरद्वये। अतऊर्ध्वं न वंदेत अश्वत्थं तु कदाचन। परतोऽपराह्णे द्विधाविभक्तदिनाभिप्रायेण लोकाक्षिः। पूर्वाह्णे मध्यमेवापि यदि पर्व समाप्यते। ततोपवासः पू
र्वेद्युः स्तदहर्याग इष्यते। अपराह्णे थवा रात्रौ यदि पर्व समाप्यते। उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते। उपोष्यतिना होरात्राभोजनमात्रपरं। किन्तु हुतेः अग्न्याधाने देवा यजमानस्य समीपमुप

वसन्तीति उपवासशब्देनाग्न्याधानमुच्यते। तैत्तिरीयब्राह्मणे तथा श्रुतेः। यथा उपास्विनस्त्वो यस्यमाणे देवता वसन्ति एवं विद्वानग्निमुपस्तृणाति। वृद्धशातातपः। सन्धिश्चेदपराह्णे
३ स्यात् पादं प्रातः परेहनि। कुर्वाणाः प्रतिपद्भागे तुरीये पितरुष्यति। ननु चान्द्रवत्सावनादिष्वपि विष्णुधर्मोत्तरेण मासपदे संकेतितं। यथा चन्द्रमाः। कृष्णपक्षान्ते सूर्येण सह युज्यते।
सन्निकर्षात्तथान्यसन्निकर्षान्तथापरं। चन्द्रार्कयोर्मध्ये मासश्चान्द्रश्चाप्यभिधीयते। सावने च तथा मासि त्रिंशत् सूर्योदयाः स्मृताः। आदित्यराशिभोगेन सौरो मासः प्रकीर्तितः।
सर्वर्क्षपरिवर्तैश्च नाक्षत्र इति चोच्यते। चन्द्रार्कयोः सन्निकर्षात् अथेत्यनन्तरं प्रतिपदमारभ्य अन्यथा सन्निकर्षमारभ्येति ब्रूयात्। अपरं सन्निकर्षं यावत्तावत्कालश्चान्द्रः एतेन सन्निक
र्षादिः। सन्निकर्षान्तो मास इति नारायणोपाध्यायमतं निरस्तं॥ त्रिंशदहोरात्रात्मकः सावनः आदित्यैकराशिभोगावच्छिन्नः शौरः सप्तविंशतिनक्षत्रावच्छिन्नो नाक्षत्रः इति चतुर्विधा मा- २ मल
साः तथा च ब्रह्मसिद्धान्ते। चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः। एकराशौ रविर्यावत्कालं मासः स भास्करः। सर्वर्क्षपरिवर्त्तैश्च नाक्षत्र इति चोच्यते। नैवं चान्द्रसौरसाव
ननाक्षत्रमासेष्विति कर्मस्तु। न कीदृशास्त्याकांक्षायां विष्णुधर्मोत्तरादिवचनस्य तत्तत्परिच्छायकत्वेनैवोपपत्तेः मासशब्दस्य तत्र तत्र शक्तिग्राहकत्वे प्रमाणाभावात्। अ
नेकशक्तिकल्पने गौरवाच्च वक्ष्यमाणयुक्तिभ्यश्च चान्द्र एव शक्तिः। अथ कर्मविशेषे मासविशेषादिः॥ पितामह आब्दिकपितृकृत्ये च मासश्चान्द्रमासः स्मृतः विवाहादौ
स्मृतः सौरो यज्ञादौ सावनो मतः। प्रथमादिपदं यात्राग्रहचारपरं। यत्कर्म सूर्यभोग्यराश्युद्देशेन यस्य विशेषो जपनादि विहितं तत्परं चायणस्य सौरमासघटितत्वेन वक्ष्य
माणत्वात् तच्च चूडोपनयनादि द्वितीयादिपदं सत्रभाति वृद्धिव्यवहृतिप्रायश्चित्तपूर्वदायाशौचगर्भाधानपुंसवनसीमन्तान्नयननामकरणानि। निःक्रमणान्नप्राशनचूडादिपरं। अत्र

चूडादौ वेकेत्रे वसौरसावनग्रहणं । पश्चादुपपादयिष्यामः । तथा च विष्णुधर्मोत्तरे । अध्यायनं च ग्रहचारकर्म सौरेणमासेन सदा ध्यवस्येत् । सत्रापुपास्यान्यथ सावनेन लोकं च यतस्या
द्यवहारकर्म । अध्यायनं अध्वगमनं याचेतियावत् । संवत्सरप्रदीपे । सिंहे धनुषि मीने च स्थिते सप्ततुरंगमे । एतद्वचने राश्युक्ते रवे यात्रायानिषेधात् सौरेणौव यात्रेत्यवगम्यते । यत्रापि
हष्टहारंभ क्षौरकर्माणि विवर्जयेत् । एतन्मासत्रये यात्रानिषेधो राजेतरपरः । राज्ञः कार्य्यानुरोधात् सर्वदाभिधानात् । यथा मनुः । मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः । फाल्गुणं वाथ
चैत्रं वा मासं प्रति यथाबलं । अन्येष्वपि तु कालेषु यदा पश्येत् ध्रुवं जयं । तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः । व्यसनान्याह स एव । कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः । वियुज्यतेऽ
र्थधर्माभ्यां क्रोधजेष्वात्मनैव तु । मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाट्या च कामजो दशको गणः । पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणं । वाग्दण्डजं च पा
रुष्यं क्रोधजोऽपि गणोऽष्टकः । अक्षो द्यूतक्रीडा तौर्यत्रिकं नृत्यगीतवाद्यानि त्रीनीति दश । पैशुन्यं विस्तात परदोषविष्करणं साहसं साधोर्वन्धनादिनिग्रहः । द्रोहो जिघांसा ईर्ष्या न्यगुणास
हिष्णुता असूया परगुणेषु दोषाविष्करणं । अर्थदूषणं अर्थानामपहरणं देयानामदानं च अत एव दीपिकायां । दैवहीनं रिपुं जेतुं यायात् क्षेवान्वितो नृपः । योज्या दैवान्विताऽमात्या दै
वहीनेन तथात्मनि । व्यसनी विनष्टधर्मा त्रिविधोत्पातप्रपीडितो यश्च पुरुषः स दैवहीनः कथितो दैवान्वितोऽतोऽन्यः । अत एव याज्ञवल्क्यः । दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता । तत्र
दैवमभिव्यक्तं पौरुषं पौर्वदेहिकं । अभिव्यक्तं फलोन्मुखीभूतं । मनुरपि । युक्तो दैवेन युद्ध्येत तज्जयं प्रेक्ष्य व्यपेतभीः । साम्ना दानेन भेदेन समस्तैरथवा पृथक् । विजेतुं प्रयतेतारीन्न युद्धेन
कदाचन । अनित्यो विजयो यस्माद्दृश्यते युद्ध्यमानयोः । पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत् । त्रयाणामप्युपायानां पूर्वोक्तानां परिक्षये । तथा युद्धेत संयुक्तो विजयेत रिपून्यथा । संयत्तः स

न्यक्प्रयत्नवान कश्चरिपुमाहसत्त्व। प्राज्ञं कुलीनं शूरं च दक्षं दातारमेव च। क्षतिज्ञं धृतिमन्तं च कष्टमाहुर विबुधाः। कालोपि फलहेतुरित्याह मत्स्यपुराणे। दैवं पुरुषकारश्च काल
५ श्च पुरुषोत्तम। त्रयमेतन्मनुष्यस्य पण्डितं स्यात्फलावहं। कर्षट्टेष्टि समायोगाद्दृश्यन्ते फलसिद्धयः। तास्तु काले प्रदृश्यन्ते नैवाकाले कथंचन। सत्राणि गवामयनादीनि मास संवत्सर
साध्यानि। लौक्यं व्यवहारकर्म्मेति दृश्यादिकं मासेन यास्यति मासेनायास्यसीत्यादि ॥*॥ अथागस्त्यार्घ्यदानं ॥*॥ सौरे रौद्र सिंह राशौ विधानात् यथा ब्रह्मवैवर्ते। अप्राप्ते भास्क
रे कन्यां शेषभूते त्रिभिर्दिनैः। अर्घ्यं दद्युरगस्त्याय गौडदेशनिवासिनः। नारसिंहे॥ शंखे तोयं विनिक्षिप्य सितपुष्पाक्षतैर्युतं। मंत्रेणानेन वै दद्याद्दक्षिणासामुखस्थितः। काशपुष्पप्र
तीकाश अग्निमारुतसम्भव। मित्रावरुणयोः पुत्र कुम्भयोने नमोस्तुते। प्रार्थनमंत्रः॥ आतापिर्भक्षितो येन वातापिश्च महासुरः। समुद्रः शोषितो येन स मामगस्त्यः प्रसीदतु॥ गं ४ मल
धादिकं। ॐ अगस्त्याय नम इत्यनेन दातव्यं विशेषानुपदेशे सामान्यतः प्राप्तत्वात् दक्षिणासामुखवस्थित इति गंधादिदानेपि प्रयोगांगकर्तरि शेषत्वादिति रत्नाकरः। तत्पत्न्यर्घ्य
मंत्रस्तु। ॐ लोपामुद्रे महाभागे राजपुत्रि पतिव्रते। गृहाणार्घ्यं मयादत्तं मैत्रावरुणि वल्लभे॥ आश्वलायनः। उदगयने आपूर्य्यमाणपक्षे कल्याणे नक्षत्रे चौडकर्मोपनयन गोदा
न विवाहाः। विवाहः सर्वकालिक इत्येके इति विवाहे विषयभेदमाह गृह्यपरिशिष्टं। धर्म्येष्वेव विवाहेषु कुर्य्यात्कालप्रतीक्षणं। नाधर्म्मेषु व्यक्तमुक्तं भुजबलभीमे ग्रहशुद्धिं मन्द
शुद्धिं मासायनर्तुदिवसानां अर्वाग्दशवर्षेभ्यो मुनयः कथयन्ति कन्यकानां। ग्रहशुद्धिं गोचरशुद्धिं। ननु चैत्र कृष्णद्वितीयायां तिस्रष्टेवाष्टकास्तु च। मार्गे च फाल्गुने चैव अषाढे का
र्त्तिके तथा। पक्षयोर्माघमासस्य द्वितीयां परिवर्जयेत्। नाकाल दृष्टौ कुर्वीत व्रतबंध शुभक्रियामिति भुजबलभीमोक्तं कथं संगच्छतां। उपनयने आश्वलायनेन उत्तरायणशुक्लपक्षयोर्वि

धानात् पारस्करेणापि उदगयने आपूर्य्यमाणपक्षे पुण्याहे इति कर्म्ममात्रे परिभाषितं । असमासकरणं गर्भाधानादिषु कालविशेषनियतेषु उदगयनादीनां यथासम्भवं नित्यत्वा
नित्यत्वप्रदर्शनार्थमिति हरिशर्म्मा । गोभिलेनापि उदगयने पूर्वपक्षे पुण्येहनि प्रागावर्त्तनादह्नः कालं विद्यादिति यामद्वयात्मकपूर्वाह्णमप्यधिकं परिभाष्य यथादेशं चेति पुनः कृ
तं यथादेशमित्यनेन स्वगृह्योक्तानां प्रोष्ठपद्यामुपाकर्म्मकरणस्य अमावास्यायामपराह्णे पिण्डपितृयज्ञस्य अन्यस्यापि एवंविधस्य उदगयनादिविरुद्धविहितस्य ऋतुकालग
र्भस्पन्दनपूर्वकालषष्ठमासादिविहिताधानपुंसवनसीमन्तोन्नयनादीनां च दक्षिणायनादावन्यथानुपपत्त्या ग्रहणं । अथैवं यथादेशं चेति न वाच्यं । तत्तद्विशेषविधानादेव
सिद्धेः नायं दोषः । यथादिष्टकालस्य क्रियायामादरार्थमुक्तं तेन तत्तत्कालातिपत्तौ केषांचिल्लोपः । यथा अष्टकापिण्डपितृयज्ञादीनां विद्याकराह्निककृत्येपि अकाले चेत्
कृतं कर्म्म कालतस्य पुनः क्रिया । कालातीतं च यत्कुर्य्यादकृतं तद्विनिर्द्दिशेत् । यत्कर्म्म यस्मिन्काले विहितं तत्कालाभावेपि नांगांतराभाववत् तत्कर्म्मानुष्ठानं नित्यकर्म्म
सु यथाशक्तीत्युपदेशस्य हि तिसाध्यांगमात्रविषयत्वात् कालस्यानुपादेयरूपत्वान्न तथेति । तदुक्तं । अंगत्वेपि च कालस्य न त्यागोन्यांगवत्कृतः । अनुपादेयरूपत्वात् कालेक
र्म्म विधीयते । वचनवलात्तु कालातिपत्तौ प्रायश्चित्तं कृत्वा केषांचिदनुष्ठानार्थं च यथा सन्ध्यावन्दनादीनां तथा च संख्यायनगृह्यं । अरण्ये समित्पाणिः सन्ध्यामुपास्ते नित्यं
वाग्यतः । उत्तरापराभिमुखोन्वष्टमदिशमानक्षत्रदर्शनात् अतिक्रान्तायां महाव्याहृतीः सावित्रीं स्वस्त्ययनादि जप्त्वा एवं प्रातः प्राङ्मुखस्तिष्ठन् आमण्डलदर्शनादिति उत्तरापरा
भिमुखः वायुकोणाभिमुखः कोणं विदृणोति अन्वष्टमदिशमिति उभयदिङ्मध्यभागमिति यावत् । व्यासः । सन्ध्याकाले व्यतीते तु नच सन्ध्यां समाचरेत् । गायत्रीं दशधा जप्त्वा पुनः स =

न्ध्यांसमाचरेत्। तज्जपे स्मृतिः। कृत्वोक्तानैकरोप्रातः सायंचाधो गुरुर्वैस्तथा। मध्येतिर्य्यक्करौ प्रोक्तौ जप एव मुदाहृतः। पितृद्वयितायां मध्येवं यत्तु काशीखण्डे॥ विधिनापि कृतास
5 न्ध्याकालातीता वृथा भवेत्। अयमेव हि दृष्टान्तो वन्ध्यास्त्री मैथुनं यथा। इति। तदकृतप्रायश्चित्तपरं। हरिहरपद्धतौ च। यद्यागामिक्रियामुख्यकालस्याप्यन्तरालवत्। गौणकाल
त्वमिच्छन्ति केचित्प्राक्तनकर्म्मणि। यद्वा इति पक्षान्तरं। प्राक्तनकार्य्यं मध्यकालवत् आगामिक्रियामुख्यकालस्यापि गौणकालत्वं। तेन सायंसन्ध्यायां रात्रिः प्रातःसन्ध्याकालश्च
गौणकाल इत्यर्थः। एवमन्यत्रापि अत एव छन्दोगपरिशिष्टे। संस्कारा अतिपत्येरन् स्वकालाच्चेत्कथंचन। हुत्वैतदेव कुर्वीत ये तूपनयनादधः। एतदिति समस्तव्याहृतिहोमादि
प्रायश्चित्तं। अधः पूर्वं वृद्धराजमार्त्तण्डे। यानार्ष्ये कृतसीमन्ता प्रसूते च कदाचन। अंके निधाय तं बालं पुनः संस्कारमर्हति। देवलः॥ सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता। तथा
सकृत्तु कृतसंस्काराः सीमन्तेन वरस्त्रियः। यं यं गर्भं प्रसूयन्ते स गर्भः संस्कृतो भवेत्। संस्कारे क्रमनियमं माह नारदः। येषां त्वनुकृताः पूर्वं संस्कारविधयः क्रमात्। कर्त्तव्या भ्रातृभि पू मल
स्तेषां पैतृकाद्देव तद्धनात्। अविद्यमाने पित्र्यर्थे स्वांशादुद्धृत्य वा पुनः। अवश्यकार्य्याः संस्काराः भ्रातृभिः पूर्वसंस्कृतैः॥ क्रमात् भ्रातॄणां संस्काराणां च पौर्वापर्य्यक्रमात् भ्रा
तृक्रमस्तु सोदरविषयः। विवाहे तथा दर्शनात्। कर्णवेधस्यासंस्कारत्वान्न तथा नियमः। वृद्धराजमार्त्तण्डे। कृत्यचिन्तामणौ मांडव्यवचने च। तथा दर्शनात्। यथा। यद्यपत्यद्व
ये तिष्ठेत् संभवोप्यपरस्य च। षट्कर्णी तद्विजानीयान्नर्हितं तत्र यस्य च। इत्याशंक्य द्वयोर्मध्ये षड्विर्यस्याथ वत्सरे। कर्णवेधो हितस्तस्य नात्र ज्येष्ठविचारणा। षट्कर्णीत्पत्तिमाशं
क्यमानोः शुद्ध्यासमेपि च। कर्णवेधे न दोषः स्यादन्यथा मरणं भवेत्। भ्रातरिति बहुवचनमन्येषां ग्रहणार्थं अत एव नारायणपद्धतौ। अथैते संस्कारकर्म्माणि गर्भाधानमिवस्वयं।

पिता कुर्य्यात्तदन्यो वा तदभावे पितृक्रमात् । इत्यत्र अन्यो वेत्युक्तं न च प्रागुक्तगोभिलसूत्रे उदगयनादाव समासकरणं एकैकस्यानुगुण्यद्योतनार्थं । समुच्चयोपलक्ष्यो महानभ्युदय
इति भट्टनारायणव्याख्यानात् । दक्षिणायनकृष्णपक्षयोरप्युपनयनमिति वाच्यं । पूर्वोक्ताश्वलायनवचनेन चौडकर्मोपनयनयोर्विशिष्य उदगयनशुक्लपक्षयोरभिहितत्वात् । भोजराजे
नापि । मघादिमासषट्केषु शुभाङ्गिराः शयनावधिः । चूडाकर्म प्रकुर्वन्ति मुनयो व्रतमेव च । व्रतमुपनयनं । कृत्यचिन्तामणौ दक्षिणायननिषेधोपि । रविभागः समाख्यातः रवरां
शोदक्षिणायनं । व्रतवेधादिकं तस्मात् चूडाकर्म विवर्जयेत् । तत्कथमुपनयने मार्गादिकृष्णद्वितीयादिनिषेधः । उच्यते । दक्षिणायने वैश्यस्य उपनयनविधानात् । कृष्णपक्षेपि
प्रायश्चित्तात्मकोपनयनविधानाच्च । तत्परः । ननु तत्राप्युदगयनाद्यपेक्षा कृते निःसंशये पापनमुंजीतानुपस्थितः । मुंजानो वर्द्धये त्वाप्रमसत्यं पार्षदि ब्रुवन् इत्यादिनिन्दार्थवा
देन विलंबासहत्वात् । एकदिनस्योपवासेन गमयितुं शक्यत्वात् यथा गर्गः । विप्रस्य क्षत्रियस्यापि मौंजी स्यादुत्तरायणे । दक्षिणे च विशां कार्य्यं नानध्यायेन संक्रमे । अनध्यायेपि
कुर्वीत यस्य नैमित्तिकं भवेत् अपिशब्दात् दक्षिणायनकृष्णपक्षयोः समुच्चयः नैमित्तिकं प्रायश्चित्तरूपं । पारस्कर । विवाहोत्सवयज्ञेषु सौरं मानं प्रशस्यते । पार्वणे त्वष्टका श्राद्धे
चान्द्रमिष्टं तथाब्दिके । अत्र यज्ञपदं उदगयनादिविहितपशुयागादिपरं । पितामहोक्तन्तु विरुद्धधर्मो नरोक्तसत्र परं । गर्गः । आपुर्दाय विभागश्च प्रायश्चित्तक्रियास्तथा । साव
नेन तु कर्त्तव्या मन्त्राराधनमप्युपासना । सूर्य्यसिद्धान्ते । सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा । मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्तिता । मध्यमग्रहभुक्तिर्ज्योतिर्गणनायां प्रसिद्धा
याज्ञवल्क्यः । गर्भाधानमृतौ पुंसः सवनं स्पन्दनात्पुरा । षष्ठेष्टमे वा सीमन्तः प्रसवे जातकर्म च । अहन्येकादशे नाम चतुर्थे मासि निःक्रमः । षष्ठेन्नप्राशनं मासि चूडा कार्य्या यथाकुलं । एवमे

नः शर्म्मं याति वीजगर्भसमुद्भवं । ऋतौ ऋतुकाले । यथा मनुः । ऋतुकालाभिगामी स्यादिति स च कालो याज्ञवल्क्योक्तो यथा । षोडशर्तुर्निशास्त्रीणां तासु युग्मासु संविशेदिति । तेन
गर्भधारणायोग्यावस्थोपलक्षितः । कालः ऋतुः स तु रजोनिःस्मरणकालमारभ्य षोडशाहोरात्रात्मकः । ततश्च गर्भाधानसंस्कारोपक्रमे सावनगणनासिद्धा । पुंसवने चतुर्थे स्पन्दते ततः इ
तिवचनात् स्पन्दनात् । पूर्वं तृतीये मासे कालः तत्र चतुर्थमासस्य सौरत्वे चान्द्रत्वे वा निषेकमासस्यापि तथात्वे तदाद्यन्तदिननिषेके सत्यधिकन्यूनकालयोगर्भस्पन्दनमनियतमाप
द्येत सावने तु नियतं तेनात्रापि सावनगणनायुक्ता योषिद्धव्रतारसिद्धा च । अहन्येकादशे नाम त्र्यष्टे चापि अशौचव्यपगमे नामधेयमिति विष्णुसूत्रात् सूतकोत्तरदिनपरमेकादश
पदं पूर्वोक्तसूर्य्यसिद्धान्तवचनेन सूतकस्य सावनदिनघटितत्वात् । तदुत्तरदिनस्यापि तथात्वं तस्मात् गर्भाधानपुंसवननामकरणेषु सावनदर्शनात् तत्साहचर्य्यात् सीमन्तो ६ म
न्नयनादावपि मासवर्षगणनायां तथेति । ततश्च चूडोपनयनादिषु वर्षगणना सावनेन शुभाशुभविवेचनन्तु सौरेणेति सिद्धं । षष्ठेन्नप्राशनमिति मुख्यः कल्पः समर्थस्य सोपा
योगात् । इति न्यायात् । अतएवोक्तं श्रुतौ नश्वः समुपासीत को हि समर्थस्य श्वोमवेदिति । स्मृतावपि श्वः कार्य्यमद्य कर्त्तव्यं पूर्वाह्णे चापराह्णिकमिति । एवमनेन इति एवमुक्तप्रकारक
गर्भाधानादिभिः एनः पापं वीजगर्भसमुद्भवं शुक्रशोणितसंबन्धं न तु गोत्रव्याधिसंक्रान्तिनिमित्तं नाशं याति । नित्यत्वे प्रानुसंगिकफलमेतत् । उपनयनोत्तरावधिकालमाह या
ज्ञवल्क्यः । आषोडशात् द्वाविंशाच्च चतुर्विंशाच्च वत्सरात् । ब्रह्मक्षत्रविशां काल औपनायनिकः परः । आङ् अभिविध्यर्थे मर्य्यादाभिविधिसन्देहे कार्य्यान्वितत्वे नाभिविधिरेव
ग्रहणात् एवमेव मदनमाध्यसवलामवदेव मदमिताक्षराकुल्लुकमदकल्पतरुस्मृतिसागरप्रभृतयः शूलपाणिरपि याज्ञवल्क्यटीकायामेवमेव किन्तु प्रायश्चित्तविवेके मर्य्यादार्थं

तामाह यमवचनात्। यथा। पतितायस्यसावित्री दशवर्षाणि पंचच। ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः। प्रायश्चित्तं भवेदेषां प्रोवाचवदतां वरः। कुत्सुकमहकल्पतरुधृ
तमप्येतत्। अत्र ब्रूमः। औपनायनिकः कालः परः षोडशवार्षिकः। षोडशवर्षं वाप्यभूतः स्थितइतियावत्। तमधिष्ठोभूतोभूतो भावीतिठक वर्षस्याभविष्यतीत्युत्तरपदवृद्धिः
अधीष्टो अध्येषणापुक्तोगुरुः। भृतोभृति रहीतोदासः। राजमार्त्तण्डे येकृत्य चिन्तामणौ च मार्कण्डेयः। विप्रस्य षोडशाद्वर्षाद्राज्ञो द्वाविंशतेः परं। वैश्यस्याष्टत्रिकाद्व्दात् सावित्री
पतनं भवेत्। अष्टत्रिकाश्चतुर्विंशात् विद्गमधर्मेन्निरे। षोडशाब्दाहिविप्रस्य राजन्यस्य द्विविंशति। विंशतिः सचतुर्थीस्याद्वैश्यस्य परिकीर्त्तिता। सावित्रीनातिवर्त्तेतअतऊर्ध्वं नव
र्त्तते। आभ्यां षोडशवर्षोपरि नियमेन पंचदशवर्षोपरि यत्पतनमभिहितं तद्गर्भजन्मप्रभृति गणनाया मविरुद्धं। तथा चकृत्यचिन्तामणौ माण्डव्यः। व्रतबंधविवाहेचवत्सर
परिकल्पनमाहुराचार्याः। आधानपूर्वमेके प्रसूतिपूर्वं सदान्येतु। एवं च व्यासमार्कण्डेयादिवाक्यैकवाक्यतयान्यायविसिद्धतया चाषोडशादित्याद्यावाङ्ङभिविध्यर्थैते
व अत्रापिवर्षगणनासावनेनैव यत्न द्विजानामुपनयनमुपक्रम्य पैठीनसिवचनं। द्वादशषोडशविंशतिश्चेदतीता अवरुद्धकालाभवन्तीति ततद्वादशवर्षाद्युपरिप्रत्यवायास्यत्व
त्तापनपरिमितिशूलपाणि महामहोपाध्यायाः। अत्रमहाव्याहृतिभिर्होमः। प्रायश्चित्तंतदुत्तरं तु व्रात्यप्रायश्चित्तं। मैथिलास्तुविवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः। शेषे
कर्म्मणि चांद्रः स्यादेषमासविधिः स्मृतः। इतिशेषशौरादिविशेषोह्नेरवोरहितेशपाहुः। गंगावाक्यावल्यादिषुदक्षः। चांद्रेणतिथिकृत्यन्तु यथाविहितमाचरेत्। कार्त्तिकादिस्ना
नेतुचांद्रसौरयोर्विकल्पेनानुष्ठानं यथाकृत्यकौमुद्यां पितामहः। कार्त्तिकस्यतुयत्स्नानं माघेमासिविधानतः। कृच्छ्रादिनियमानां च चांद्रायन प्रमाणतः। पद्मपुराणं। तुलामक

7 रमेषेषु प्रातःस्नानं विधीयते । अत्र उदितानुदितहोमवद्विकल्पेनानुष्ठानमिति हेमाद्रिः कार्त्तिकेमं त्रस्तु । कार्त्तिकेहं करिष्यामि प्रातःस्नानं जनार्दन । प्रीत्यर्थं देवदेवेश दामोदर मयासह । मय
न स्म्या स्कंदपुराणे । संप्राप्ते मकरादित्ये पुण्ये पुण्यप्रदे सदा । कर्त्तव्यो नियमः कश्चिद् व्रतरूपी नरोत्तमैः । प्रारब्धकाम्यस्नाने च व्याध्यादिना प्रसामर्थ्ये पुत्रादिना कारयितव्यं नानुकल्पवि
धिना नित्यस्नानएव तद्विधानादिति विद्याकरः । पुत्रं चैतत्र जिह्मं त्यजेत्पुनिर्लोभ मशक्तो अन्येन कारयेत् । अनेन विधिना स्यात् ग्यत्तिक कर्षकक्कर्मिणां । इति याज्ञवल्क्य वचनात्सं भूय
वानिज्ये । जिह्मं मिच्चैवं चकं निर्लाभं ज्ञात्वा त्यजेत्पुर्वं हि स्कुर्य्यु । गंगायेचावगाहन्ते माघेमासि नराधिप । चतुर्युगसहस्रन्ते नपतन्ति सुरालयात् । दिने दिने सहस्रन्तु सुवर्णानां विशांपते । तेन
दत्तं हि गंगायां यो माघे स्नाति मानवः । पद्मपुराणे ॥ मकरस्थे रवौ माघे प्रातःकाले तथा मुने । गोष्पदेपि जले स्नानं स्वर्गदं पापिनामपि । स्कान्दे । मकरस्थे रवौ माघे न स्नात्यनुदिते रवौ । कथं ७ म
पापात्प्रमुच्येत कथं स त्रिदिवं व्रजेत् । अनयोः सूर्य्योदयात् प्रागेव स्नानं प्रतीयते । ततश्च समान्यतः प्रातःस्नाने विहस्तुः । अरुणा किरणाग्रस्तां प्राचीमवलोक्य स्नायात् । दक्षोपि । सन्ध्या
स्नानं निशान्ते तु मध्याह्ने तु ततः पुनः । यत्तु पद्मपुराणे । माघेमासि रटन्त्यापः किंचिदभ्युदिते रवौ । ब्रह्मघ्नमपि चांडालं कस्य तत्तं पुनीमहे । इति रटन्ती चतुर्दशी विषयं । तथा यमः । माघे
मास्यसिते पक्षे रटन्त्याख्या चतुर्दशी । तस्यामुदयवेलायां स्नातानावेक्षते यमं । स्नाता स्नानकारी । अनर्कोभ्युदिते काले माघे कृष्ण चतुर्दशीं । स्नात्वा सन्तर्प्य तु यमान्सर्वपापैः प्रमुच्यते ।
अनर्कोभ्युदित इति ईषद्दर्शनम् । अतोन उदयवेलायामित्यनेन विरोधः इत्याह तत्र । परवचने तत्राह मध्ये सतारव्योमकालेतु तत्र स्नानं महाफलमिति समुद्रकर धृतात् उदयवेलाया
मरुणोदयवेलायामित्यर्थः किंचिदभ्युदिते रवावित्यनेन प्रातःकालो नरावधित्वमुक्तं तथा च वराहः ॥ तेजः परिहानिरुषाभानोरर्द्धोदयं यावत् । अतएव यो माघमास्युषसि सूर्यकराभि

ताम्रे स्नानं समाचरति चारुनदीप्रवाहे । उद्धृत्य सप्त पुरुषान् पितृमातृवंश्यान् स्वर्गं प्रयात्यमरदेहधरो नरोऽसौ । इत्युषसीत्यभिधाय सूर्य्यकराभितान्नेत्युक्तं । सूर्य्योदयात् प्रागपि तत्का
लसंभवात् न तु सूर्य्याभितान्नेत्युक्तं । विधानमाह पाद्मे । माघमासमिमं पुण्यं स्नाम्यहं देव माधव तीर्थस्यास्य जले नित्यं प्रसीद भगवान् हरे । दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणा
य च प्रातःस्नानं करोम्यद्य माघे पापप्रणाशनं । मकरस्थे रवौ माघे गोविन्दाच्युत माधव । स्नानेनानेन देवेश यथोक्तफलदो भव । सतन्मन्त्रं समुच्चार्य्य स्नायान्मौनं समाश्रितः । वासुदे
वं हरिं कृष्णं श्रीधरं च स्मरेत्ततः । दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते । परिपूर्णं कुरुष्वेदं माघस्नानं महाफलं । चान्द्रस्नाने तु मकरार्कास्पृष्टकाले मकरस्थे रवावित्यस्य न बाधः । अस
मवेतार्थत्वात् प्रातःस्नाने यथाहनि तथा प्रातरिति छन्दोगपरिशिष्टवचने नाहः । स्नानधर्म्मानिदेशात् सन्ध्यावन्दनोत्तरत्वं प्रतीयते । पद्मपुराणीयतदंगतर्पणस्य तद्यथा । नित्यं नै
मित्तिकं काम्यं त्रिविधं स्नानमिष्यते । तर्पणान्तु भवेत्तस्य अंगत्वेन व्यवस्थितं नित्यं प्रात्यहिकं प्रातर्मध्याह्नसंबन्धि नैमित्तिकं उपरागादिनिमित्तकं काम्यं प्रयागतीर्थादौ क्रियमाणं
यद्यपि स्नानांगं तर्पणं तत्प्रयोग एवान्तर्भवितुमर्हति । तथापि सन्ध्यावन्दनानुष्ठानसत्वे तस्य वाचनिकं चंद्रग्रहणादौ तु तदभावात् स्नानप्रयोगान्तर्गतत्वमेवेति छन्दोगाह्निका
दयः स्नानांगतर्पणान्तु । तर्पणं तु शुचिः कुर्य्यात् प्रत्यहं स्नातको द्विजः । देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमं इति शातातपोक्तप्रधानतर्पणस्यापि प्रकृतीभूतं नित्याग्निहो
त्रमिव सत्राग्निहोत्रस्य तत्रांगतर्पणे सन्ध्योत्तरत्वं साक्षादुक्तं विकृतावपि संभवे प्राप्तं । यथाज्योतिष्टोमस्येष्ट्युत्तरकालत्वं विकृतीभूतसोमेष्वतिदेशप्राप्तं किंच गृहमेधीयप्र
योगकालमध्ये अग्निहोत्रकाले आगते तत्पदार्थक्रमबाधेनाग्निहोत्रानुष्ठानं निर्णीतं । तथा स्नानानन्तरं सन्ध्याकाले आगते तर्पणमकृत्वैव सन्ध्यानुष्ठानमिति विद्याकरवाजपे

यी ग्रा चारो पितथा। माघाधिकारे गारुडे। मातरं पितरं चैव भ्रातरं सुहृदं गुरुं। यमुद्दिश्य निमज्जेत द्वादशांशं लभेत सः। मार्कंडेये। सितासिते तु यत्स्नानं माघेमासि युधिष्ठिर। न तेषां
पुनरावृत्तिः कल्पकोटिशतैरपि। दशकोटिसहस्राणि तीर्थकोट्यस्तथापराः माघेमासि प्रयागे तु गंगायमुनसंगमे। स्कन्दपुराणे। पौष्यान्तु समतीतायां यावद्भवति पूर्णिमा। माघमास
४. स्य देवेंद्र पूजा विष्णोर्विधीयते। पौर्णमास्यान्तु माघमुपक्रम्य। पितॄणां देवतानां च मूलकं नैव दापयेत। ददन्नरकमाप्नोति भुंजीत ब्राह्मणो यदि। ब्राह्मणो मूलकं भुक्त्वा चरेत
चांद्रायणाव्रतं। अन्यथा नरकं याति क्षत्रविट्शूद्रएव च। वरं भुक्तमभक्ष्यं च पिवेद्वा गर्हितं च यत। वर्जनीयं प्रयत्नेन मूलकं मदिरा समं। वैशाखस्नानन्तु सौरेण यथा भवि
ष्ये। गवामर्द्धप्रसूतानां लक्षं दत्वा तु यत फलं। तत्फलं लभते राजन मेषे स्नात्वा तु जाह्नवीं। नाक्षत्रमासप्रयोजनं विष्णुधर्मोत्तरे। नक्षत्रसत्राणयनानि चैंद्रो मानेन कुर्य्या ट म
द्गणनात्मकेन। नक्षत्रसत्राणि मासमसंवत्सर साध्य यागविशेष रूपाणि याज्ञिकप्रसिद्धानि। इन्दोरयनानि सोमायनाख्यसत्रानि इति समयप्रकाशकृत। एवं जन्मनक्षत्रे श्रा
नि भौमवारफलं नक्षत्रमासे न योग्यत्वात। यथा दीपिकायां। जन्मऋक्षे यदि स्यातां वारौ भौमशनैश्चरौ। स मासः कल्मषो नाम मनोदुःखप्रदायकः। तस्मादेभिश्चांद्रसौरसा
वननाक्षत्रमासेषु कर्म्माणि विहितानि तत्परिचायकानि चन्द्रमाः कृष्णपक्षान्तेत्यादि विष्णुधर्म्मोत्तराक्तानि वचनानि न तु शक्तिग्राहकानीति सिद्धं। अतस्तत्तत्कर्म्मसंकल्पे
मासपक्षतिथीनां चेति भविष्यपुराणो क्तेन तत्तद्विहितमास एव निर्द्दिश्यः अत्र चकारद्वयश्रुते र्मासपक्षतिथीनां चेतिननिमित्तविशेषणं किंतु स्वातंत्र्येणैव यथासंभवमुभयो रु
ल्लेखः तथा चैवेतन्निर्णये। दर्शश्राद्धादौ कृष्णादिरेव मास इति स एव निर्द्दिश्यः। तत्र तिथिपुरस्कारेणैवकरणात। तदितरत्र सांवत्सरिकादौ शुक्लादिरेव निर्द्दिश्यः। तस्य प्रधानातिथि

कर्त्तव्यत्वेन त्रिंशत्तिथिसाधारणात्तथा तत्तत्तिथिनियतब्रह्मपुराणास्यैकादश्यादित्युक्तं श्राद्धचिन्तामणावपि। श्राद्धादिकर्म्मणि विशेषवचनं विना शुक्लादेरेव निबन्धृभिरादरणात्
इति गंगावाक्यावल्यामपि वारुणीस्नाने मधुकृष्णत्रयोदश्यामिति वाक्यरचना। किं च यदि सर्वकर्म्मणि मुख्यचान्द्रेणैव वाक्यरचना स्यात्तदाऽश्वयुक्कृष्णपक्षीयश्राद्धेपि मुख्य
चान्द्रत्वेन भाद्रपदप्रयोगे संभवति तत्राश्वयुक्प्रयोगो मुनीनां व्यर्थः स्यात्। तस्मादस्मिन्नेव प्रयोजने यत्नेन निर्द्देशः। एवं विवाहादौ सौरेणैव निर्द्देशः एवं च सावनेन स्वत्रे च चैत्रादिना
नानुल्लेखवात् मुख्यचान्द्रेण निर्द्देशः अत एव स्मृतिसारे ब्रह्मपुराणे। तिथिकृत्ये च कृष्णादिं व्रते शुक्लादिमेव च। विवाहादौ च सौरादिं मासं कृत्ये विनिर्द्दिशेत्। सौरः सूर्य्यसंक्र
मः संकल्पे मासादिवदघोल्लेखोपि ब्राह्मणानन्मन्त्रयेत स्वाऽघ वेति श्राद्धं पुष्यमास्यहमाचरिष्ये इति शंखलिखितदर्शनात्। अद्य कृष्णाष्टमीं देवीमिति ब्रह्मपुराणात् अद्य
चन्द्रार्कग्रहणसंक्रान्त्यादावितिमत्स्यपुराणाच्च एतेनाद्यपदस्य दिनपरत्वात् रात्रौ चेत् अस्यां रात्राविति वक्तव्यं नाद्येति मतं तच्चिन्त्यं रात्रिपदोल्लेखे मानाभावात् एवमनेका
ह साध्यतिथ्युल्लेखानन्तरमारभ्यपदोल्लेखः अन्यथा तन्मासपक्षतिथिविशेषणानां दिनान्तरे सत्वेनान्वयः स्यात् अथ दर्शान्तमासशकत्वे साधकान्तराणि मत्स्यपुराणे,
प्रथमः पितृकल्पस्तु। द्वितीया नीललोहितः इत्यादिना चतुर्द्दशकल्पानुक्त्वा कौर्म्मः पंचदशो ब्रह्मणः पौर्णमासी प्रजापतेः। षोडशो नारसिंहस्तु इत्यादिना ऊनत्रिंशत्कल्पानु
क्त्वा पितृकल्पस्तथान्त्ये तु याकुहूर्ब्रह्मणः स्मृता इत्येवं ब्रह्मणो मासः सर्वपापप्रणाशनः। आदावेव हि माहात्म्यं यस्मिन्यस्य विधीयते। तस्य कल्पस्य तन्नाम विहितं ब्रह्मणा पु
रा अत्र ब्रह्मणो दर्शान्तमाससंकेतादन्येषां तथैवयुक्तं श्रुतिरपि पूर्वः पक्षो देवानामपरः पक्षः पितॄणामिति मासान्तर्गतशुक्लकृष्णपक्षावेव पूर्वापरत्वेन विदधाति संवत्सर प्र

दीपे षट्त्रिंशन्मतं। तत्र पक्षावुभौ मासे शुक्लकृष्णक्रमेण तु। चंद्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः। पक्षात्मका यास्तु तिथयः क्रमात् पंचदश स्मृताः। दर्शान्ताः कृष्णपक्षे ताः पूर्णि-
१ मान्ताश्च शुक्लके। पक्षतिः प्रतिपत्। कोऽपि पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ। अत्र यदि दर्शान्तमात्रे मासपदस्य शक्तिर्न स्यात्तदा चान्द्रो मास इत्येव विदध्यात्। मासविशेषवा-
चिनश्चैत्रादिशब्दा अपि चान्द्र एव शक्ता वक्ष्यन्ते चान्द्रे यौगिकोऽपि मासशब्दस्तथा हि माश्चन्द्रस्तस्यायं वृद्धिह्रासहेतुर्नक्षत्रभोगात्मकक्रियाप्रचयः सूर्यमंडलवियोगसंयोगल-
क्षणो वा चान्द्रवाचिह्लस्य नामः शब्दादन्प्रत्ययान्तात् सिद्धः तथा च गदसिंहः मूर्द्धन्यायान्तो माघो माने वै स्यन्तरे निर्दिष्टः कालविशेषे दन्त्यो मा शब्दश्चन्द्रकालयोस्तथा। तिथिस्वरू-
पमाह सूर्यसिद्धान्तः। अर्कादिनिःसृतः प्राचीं यद्यात्यहरहः शशी। भागैर्द्वादशभिस्तत्स्यात् तिथिश्चान्द्रमसं दिनं। द्वादशभिर्भागैर्यद्याति तदेवयानं तिथिरित्यर्थः विनिःसृत इ-
ति शुक्लपक्षतिथ्यभिप्रायेण कृष्णपक्षे विप्रकृष्टात् सन्निकृष्ट इत्यपि बोध्यं। भागस्त्रिंशांशकराशेरेकोंशः तथा च हेमाद्रिमाधवाचार्य्यलिखितं ग्रहयोर्विष्णुधर्म्मोत्तरे। त्रिंशांशक- ८
स्तथा राशेर्भाग इत्यभिधीयते। आदित्याद्विप्रकृष्टस्तु भागं द्वादशकं यदा। चंद्रमास्यात्तदाराम तिथिरित्यभिधीयते। तेनार्कापेक्षया चन्द्रस्य राशिद्वादशांशभोगे एका तिथिः एवम-
परापरापि सा च स्वैकैककलाक्रिया लक्षणा अत्र प्रथमकलाक्रियालक्षणा प्रतिपत् एवं द्वितीयादिकलाक्रियालक्षणा द्वितीयादिः सा च वृद्धिरूपा चेत् शुक्ला ह्रासरूपा चेत् कृ-
ष्णेति। न च। अष्टमांशे च चतुर्दश्याः क्षीणो भवति चंद्रमा। अमावास्याष्टमांशे च ततः किल भवेदणुरिति छंदोगपरिशिष्टवचनात्। चतुर्दश्याः शेषयामे पंचदश्याः कलायाः
क्षयारंभादेवं दर्शान्तयामे प्रथमकलायाउत्पत्तेर्विरोध इति वाच्यं। तस्य दर्शश्राद्धोपयुक्तपारिभाषिकक्षयोत्पत्तिपरत्वं। न तु तत्वास्तवं ज्योतिःशास्त्रविरोधात्तदुपजीव्यगोभिलविरो

धाद्य। यथा गोभिलः। सूर्याचन्द्रमसोर्यः परः सन्निकर्षः सा मा वास्येति परः सन्निकर्षः उपर्यधोभावापन्नसमसूत्रन्यायेनैकांशावच्छेदेनैकराश्यवस्थानं स च दर्शान्तयामो व्य
भिचारी तथा च विरोधे न्याययुक्तस्य प्रामाण्यमाह भविष्यपुराणे स्मृत्यर्थे न विरोधे हि अर्थशास्त्रस्य बाधनं। परस्परविरोधे हि न्याययुक्तं प्रमाणवत्। अर्थशास्त्रस्य मन्वादिप्रणी
त राजनीत्यादित्यादिविषयकस्य यथा। अनागमं तु यद्भुक्तं पितृपूर्वतरैस्त्रिभिः। न तत् शक्यमपाकर्तुं क्रमात् त्रिपुरुषागतं। पितृपूर्वतरैः पितरमारभ्य पूर्वतरैः। अनागमं तु यो भुं
क्ते बहून्यब्दशतानि च। चौरदण्डेन तं पापं दण्डयेत पृथिवीपतिः। इत्यनयोर्धर्मशास्त्रार्थशास्त्रयोर्विप्रतिपत्तौ धर्मशास्त्रेणादण्डविधायकमर्थशास्त्रं बाध्यते। ततश्चार्थशास्त्रस्य त्रि
पुरुषेतरपरत्वेन संकोचः। बृहस्पतिरपि। आहर्ता शोधयेद्भुक्तिमागमं चापि संसदि। तत्सुतो भुक्तिमेवैकां पौत्रादिषु न किंचन। भुक्तिशोधनमाह कात्यायनः। सागमो दीर्घकालश्च
निश्छिद्रोऽन्यरवोज्झितः। प्रत्यर्थिसन्निधानं च पंचांगो भोग इष्यते। त्रिपौरुषे विशेषमाह व्यासः। प्रपितामहेन यद्भुक्तं तत्पुत्रेण विना च तं। तौ विना यस्य पित्रा च तस्य भोगस्त्रिपौरु
षः इति प्रसंगादुक्तं। वर्द्धमानोपाध्यायधृतं ज्योतिषवचनं। एका तिथिः काप्यतदादिभूता। तिथिस्तृतीयेति तिथिप्रबन्धः। मासः स चान्द्रस्तिथिनाम्नि यस्मात् चान्द्रीं कलां प्राप्य स
दा प्रवृत्तः। एका तिथिः प्रतिपत् तदादिभूता पंचदशी सा यदि तृतीया भवति तदा प्रतिपदादिपंचदश्यन्तत्रिंशत्तिथिसमुदाय एको मासः एवं द्वितीयादिप्रतिपदन्तस्तृतीयादिद्वि
तीयान्त इति तस्य चान्द्रत्वे हेतुमाह यस्माच्चान्द्रीं कलां वृद्धिक्षयार्हत्वेन प्राप्य तिथिनाम्नि समुदायालकप्रवृत्तः तिथेरेकैककलाक्रियारूपत्वात् तथा च हेमाद्रिकालमाधवीय
योः स्कान्दे प्रभासखण्डवचनं। अमा षोडशभागेन देवि प्रोक्ता महाकला। संस्थिता परमा माया देहिनां देहधारिणी। अमादिपौर्णमास्यन्ता या एव शशिनः कलाः। तिथयस्ताः समाख्या

ताः षोडशैव वरानने। चंद्रमण्डलस्य षोडशभागेन परिमितादेहधारिणी आधारशक्तिरूपा अमानाम्नी महाकला प्रोक्ता क्षयोदयरहितत्वान्नित्या अकस्त्रवत् सर्वाननुस्यूता तद
न्याः पंचदश कलापौर्णमास्यन्ताः प्रतिपदादितिथि विशेषरूपा इति षोडशैव कलास्तिथय इति सिद्धान्तशिरोमणौ तन्यन्ते कलिका यस्मात्तस्मात्तास्तिथयः स्मृताः कलिकाः कलाः
10 सूर्यसिद्धान्ते। नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्ष्यते। तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा। ऐन्दवस्तिथिभिस्तद्वत् संक्रान्त्या सौर उच्यते। तत्त्रिंशता नाक्षत्रदिनस्त्रिंश
ता मासो नाक्षत्रमासः। तथा त्रिंशतार्कोदयैस्तु राशिविशेषावस्थानवशेन लग्नस्य यावन्ति पलविपलानि दिने रविभोगः स्यात्तदधिकषष्टिदण्डैः सावनमहोरात्रं भवतीति। तथा
च सिद्धान्तसंदर्भे सावने दण्डाः षष्टिरहः। स्वलग्नस्वगुणांशाद्याः स्तदिने नं भवेत्। तेन षष्टिदण्डाः स्वलग्नस्वगुणांशाद्याः स्वलग्नत्रिंशांशाद्याः सावनमाह स्तदिनेनं च तेन सावने न
ये पर्यायताऽखिलमित्यनेन स्वलग्नेत्यत्र स्वपदेन च रविभुज्यमाने प्रतीयते प्रथमान्त तृतीयान्तपदे लग्न दण्डपलान्याह दीपिकायां। रामोगवेदैर्जलधिस्तुमैत्रैवाणोरसैः पंच १० म
स्वसागरैश्च। वाणाः कुवेदैर्विषयोंकयुग्मैः क्रमोत्क्रमात्मेषतुलादिमानं। लग्नानां दिनभुक्तिस्तु लग्नदंडपलानि द्विगुणीकृतानि पलविपलरूपाणि औत्सर्गिकानि त्रिंशद्दिनन्यूना
धिकवशाच्च किंचिदधिकन्यूनानि च तत्तश्च दिने दिने यानि भुक्तानि तानि रव्युदयलग्नस्य राशिविशेषप्रविष्टानि अवशिष्टानि द्विवसीयानि एवं ततस्तन्मलग्नपलविपलानि दिनभोष प्र
विष्टानि अवशिष्टानि रात्रिसंबन्धिनी इति ज्ञात्वा घन्तलग्नमानयुक्तमध्यं पंचलग्नमाने दिनरात्रिमानान्यवधार्य प्रातःकालादिविभागो ज्ञेय इति भावः अतः सावनसंवत्सरात् एक
दिनाधिकवत्सरो नाक्षत्रो भवतीत्यनयोर्भेदः। नाक्षत्रफलन्तु आयुर्दाये स्मृतं प्राज्ञैर्नाक्षत्रं षष्टिनाडकमिति तद्वदिति त्रिंशता एवं यत्किंचित्त्रिंशत्तिथ्यात्मकोयोऽयं मासशब्दः प्रयुक्तः सर =

काहेन तु वरामासाय दास्युरदिरात्रिभिः । न्यूनाः संवत्सरश्चैव स्यातां वर्षरामासिके तदेति । कात्यायनोक्तस्य वाराम्रासिकाब्दिके श्राद्धस्यानां पूर्वेद्युरेव ते । मासिकानि स्वकीये तु दिवसे द्वाद
शापि चेति हेमाद्रिमाधवाचार्यधृतपैठीनसिउक्तस्य च विषये गौणमासपरिचायकः । पूर्वोक्तापुनत्याशु कृप्रतिपदादेरेव मासशब्दाभिधेयत्वात् स्वकीये दिवसे मृताहे । एवं
मृताहात् पूर्वतिथौ वाराम्रासिकाब्दिकविधानात् एकाहेन तु वरामासाऽत्यगापि तथात्वात् पूर्वं मृततिथिं विहाय परमृततिथिमादाय मासवर्षगणना निसिद्धा एतेन पूर्वं मृततिथिमा
दाय मासवर्षगणनेन मृततिथिपूर्वतिथिं विहाय तत पूर्वदिने मैथिलानां यत्त्वाराम्रासिकाब्दिककरणं तद्धे पमेव सिद्धान्तशिरोमणौ चान्द्रमासस्यान्यथ व्युत्पत्तिर्दर्शिता यथा मन
स्यन्ते परिमीयन्ते स्वकाला वृद्धिहानितः । मासाएते स्मृता मासास्त्रिंशत्तिथिसमन्विता । मासश्चन्द्रस्य वृद्धिक्षयाभ्यां स्वकालाश्चन्द्रसम्बन्धिकालाः यस्यन्ते परिमीयन्ते इति मासास्त
स्मात् कृत्तप्रयोगद्वयात् लघुहारीतोक्तादिमध्यसमाप्तिकीर्तनस्वरसलभ्यप्रयोगोपाधिसहकृतात् मासशब्दस्य दर्शान्त एव मुख्यत्वे । सौरादिषु लक्षणया गौण्या वा प्रयोगोपपत्ते
र्न रूढिशक्तिकल्पनेति तदुक्तं भट्टपादैः । लब्धात्मिका सती रूढिर्भवेद्योगापहारिणी । कल्पनीया तु लभते नात्मानं योगबाधतः । न च सौरादिष्वपि चन्द्रक्रियाया अव्यभिचारात् लघु
हारीतोक्तवत् विष्णुधर्मोत्तरोक्तोपाधिचतुष्टयसहकृता योगो द्वयात् प्रवृत्तिरस्तु मासशब्दस्येति वाच्यं लघुहारीतोक्तस्यादिमध्यसमाप्तिकीर्तनस्वरसादुपाधित्वं विष्णुधर्मो
त्तरोक्तस्य तथात्वाभावाच्च तथात्वं वस्तु तस्तु चान्द्रस्य एव मासे चन्द्रक्रियाया वृद्धिक्षयरूपाया असाधारणत्वेन प्रवृत्तिनिमित्तं सौरादौ तु सूर्यादिक्रियाणां तथेति अतः कथं सौरा
दौ मासशब्दस्य योगावसरः तथा च शारीरकटीकायां वाचस्पतिमिश्राः । असाधारणत्वेन हि व्यपदेशा भवन्तीति यथा क्षितिजलपवनबीजादि सामग्रीसमवधानजन्माप्यंकुरः

शालिबीजत्वेन व्यपदिश्यते शाल्यंकुर इति लक्षित्यादिरिति। स्त्रैषां कार्य्यान्तरसाधारणयात् नहि दर्शान्त वत् चन्द्रक्रियायाऽसाधारण्येन पौर्णमास्यन्तेपि कथं न प्रवृत्ति निमित्तत्वमिति
चेन्न उपाधित्वप्रतिपादक वचनाभावात् किन्तु ब्रह्मपुराणादौ प्रौष्ठपद्यूर्द्ध्वं कृष्णपक्षादावपरपक्षयुगादि पदप्रयोगान्न थात्वं गौणपावसीयते इति एतत्सर्वं क्रियैव काल इति मतानुसारा
दुक्तं। तदतिरिक्त कालवादिमते तु सर्वत्र तत्तत् क्रियोपलक्षितः काल इति शेषः। तथाच विष्णुपुराणे॥ कालस्वरूपं रूपं तत् विष्णो र्मैत्रेय वर्त्तते ॥ विष्णुधर्मोत्तरे च॥ अना
दिनिधनः कालो रुद्रः संकर्षणात्मकः। कलनात्सर्वभूतानां स कालः परिकीर्त्तितः। कलनात् लयकरणात्॥ तथाच विष्णुः। येसमर्था जगत्यास्मिन् सृष्टिसंहारकारिणः। तेपि
काले प्रलीयन्ते कालो हि बलवत्तर इति ॥*॥ अथ चैत्रादिशब्दानां चान्द्रवाचिता ॥*॥ तत्र लघुहारीतः॥ चक्रवत् परिवर्त्तेत सूर्य्यः कालवशाद्धुतः। अतः सांवत्सरं श्राद्धं कर्त्त
व्यं मासचिह्नितं। मासचिह्नं तु कर्त्तव्यं पौषमाघाद्यमेव हि। यतस्तत्र विधानेन समासः परिकीर्त्तितः। चांद्रग्रहणे हेतुवन्निगदमाह सूर्य्यः कालवशादिति। सूर्य्यः कालवशात् ११ म
चक्रवत् गतेर्मन्दत्वामन्दत्वाभ्यां गच्छति। तथाच एकराशिमुपभुंजानः सूर्य्यो मेषादौ मन्दगत्या कामप्येकां तिथिं द्विस्पृशति तुलादौ शीघ्रगत्या कामप्येकां तिथिं न स्पृशति इ
ति पूर्व एतत् संशयः उत्तरत्र कर्म्मलोपः स्यादिति मासचिह्नितं कर्त्तव्यं तत्रैकस्याप्तिर्थद्वित्वलोपयोरभावात् तथाच शुक्लादित्वं कुत इति चेत् लघुहारीतेन इंद्राग्नी इत्यादिना
निरुपपदस्य मासशब्दस्य शुक्लादौ संकेतमभिधाय च रूवदित्यभिधानात् एतेन पार्वणोत्वष्टकाश्राद्धे चांद्र मिष्टं तथाब्दिके इति पारस्करीये पार्वणादि साहचर्य्यादाब्दि
क श्राद्धमपि कृष्णप्रतिपदादि मासेनेति पाश्चात्यमतं परास्तं। हेतुवन्निगदाधिकरणं तु प्रमाण लक्षणे यथा हेतुवन्निगद इति हेतुवन्निगदः सूर्प्पेण जुहोति तेन ह्यन्नं

क्रियते इति श्रूयते। अत्र हि शब्दश्रुतेः। स्तुतौ च लक्षणाप्रसंगात् दन्नकरणत्वं सर्पहोमे हेतुरूपदिष्टः। तथा च यद्यदन्नकरणं दर्व्यादि तेन तेन होतव्यमिति प्राप्ते राद्धान्तः। स
र्पस्य होमकरणत्वं तृतीयाश्रुत्या अवगम्यते विध्यर्थस्य वचन हेत्वापेक्षा तस्मात् सर्पस्तुतिः। यत्तु हेतौ हिशब्दश्रुतिरिति तन्न न हि साक्षाद्दर्व्यादिना शक्यमन्नं कर्तुं अथ शक्यं प्रणाल्या
कथं तर्हि श्रुति प्रवर्त्तिता हेतुवचनस्यानपेक्ष प्रवर्त्तक वाक्यस्यैव हि श्रुतित्वात्। तथा च अभिधानं तु पदे व्यक्ति निरपेक्षरवाश्रुतिरिति। ननु सर्पस्तुतावपि लक्षणा स्यान्न हि तेनापि सा
क्षादन्नं क्रियते। बाढं स्तुतिर्हि अर्थवादकत्वात् यथा प्राप्त लक्षणांश हेतनविधिरपूर्वार्थकत्वादिति ततश्चात्र यन्मन्नवलिखनं तत्प्रमादकृतमित्यवगन्तव्यं अतएव मदना
र्त्तिकेऽपि ये हेतुवन्निगद्यन्ते हि शब्दादिभिर्न तु परमार्थ हेतव इत्युक्तं एवं च यद्यपि मृता हनि तु कर्त्तव्यं प्रति मासं तु वत्सरमित्यादि वचनोपात्तेषु तत्तन्मासीय तिथि विशेषवि
हित कर्म्मसु हेतुवन्न्यायविन्तानायाति तथापि तत्तद्वचनोपात्तानां तत्तत्कर्म्मणामपि आकांक्षाया अविशेषाद्धेतुवन्न्यायश्चिन्तनीयः दर्व्यादेस्तु वचनानुपात्तत्वान्नाकां
क्षावसर इति अतः सांवत्सर श्राद्धमिति प्रदर्शनमात्रं। तेन मासिक श्राद्धमन्नतिथि कृत्य तत्तन्मासीय तत्तत्तिथि विशेष विहित कर्म्माप्यन्येषां तत्र शुक्लादेर विशेषात् पु
नरप्यनध्यवसायस्यात्तन्निरासार्थमाह पौषमाघाद्यमेव हीति सपौषादिः कीदृक्तस्य चान्द्रे वा कथं शक्तिरित्यत्राह यत स्तत्र विधानेनेति विधानेन शास्त्रेण तत्र स्वरूपाणि।
यत्र हूयते मासादिः स इत्याद्युक्तमेवेति श्राद्धविवेकः। तन्न मनोरमं। लघुहारीतोक्तौ तदुक्तवाक्यान्तरस्य हेतुत्वकल्पनाया अन्याय्यत्वात् किन्तु विधानेन श्रुत्यादिना तथा
च श्रुतिः सर्वेशारवस्यामावास्या भवति यारोहिण्यासंवध्यते इति। अत्र आश्विन्नथ भरणी हुताशन पादश्च कीर्त्तितामेषः। हृषभो हुताशनशेषं रोहिण्यर्द्धं च मृगशिरसः। मृग

शिरसोऽर्द्धं चार्द्रा च पुनर्वसोस्त्र्यंशकास्त्रयो मिथुनं। पादः पुनर्वसोरन्त्यः पुष्याश्लेषा च कर्कटः॥ सिंहोऽथ मघा पूर्वफल्गुणी पाद उत्तरायाः तद्वच्च हस्ता चित्रार्द्धं च कन्यकाख्यः। तौलिनि
12 चित्रार्द्धं स्वाती पादत्रयं विशाखायाः अलिनि विशाखापादस्तथानुराधान्विता। ज्येष्ठा मूल पूर्वाषाढा प्रथमश्चाप्युत्तरांशको धन्वी। मकरस्तत्परिशेषं श्रवणा पूर्वार्द्धं च ध
निष्ठायाः। कुंभोऽथ धनिष्ठार्द्धं शतभिषा पादत्रयं पूर्वायाः। तत्पाद उत्तरभाद्रपद रेवत्यो मीन इति राजमार्त्तण्डोक्तवृष राशिभोग्य रोहिणी युक्तामावास्या वैशाखस्येति प्रतिपादय
न्ती श्रुतिश्चान्द्रएव शक्तिं बोधयति सौरवैशाखे तदसंभवात्। तथा हि सूर्याचन्द्रमसोर्यः परः सन्निकर्षः सामावास्येति गोभिलसूत्रात् चन्द्रार्कयोः समसूत्रपातन्यायेन एकराश्यवस्था
नं अमावास्या इति वृषस्थ रवावेव रोहिणी युक्तवैशाखामावास्यायाः सम्भवात्। कृत्यचिन्तामणौ व्यासः। मीनादिस्थो रविर्येषामारंभ प्रथमे क्षणे। भवन्ते ऽब्दे चान्द्रमासाश्चैत्राद्या- १२ मल
द्वादश स्मृताः। येषां शुक्लप्रतिपदादि दर्शान्तानामारंभ प्रथमेक्षणे। आद्यक्रियाद्यसमये मीनमेषादिस्थो रविर्भवेत्तेवर्षे चान्द्रमासाश्चैत्रवैशाखाद्यसंज्ञका द्वादश स्मृताः। न पुन
र्मलमासे ऽपि संक्रान्तं किन्तु द्विश्चैत्रादिरिति त्रयोदशापि द्वादश संज्ञका इति व्यासेनोपदेशि की शुक्लादिमासे चैत्रादि शक्तिरभिहितेति। तदुक्तं शक्तिग्रहं व्याकरणोपमानकोषा
प्तवाक्याद्व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सन्निध्यतः सिद्धपदस्य वृद्धाः। अत एव षष्ट्या तु दिवसैर्मासः कथितो बादरायणेनेत्येकलक्षणाशालित्वेन गौणानेकत्व
मुक्तं मलमासवसन्तादेर्मासद्वयात्मकत्वार्थं। चातुर्मास्यव्रतस्यान्तरालिक मलमासे कर्त्तव्यत्वार्थं च न तु वास्तवमेकत्वं श्रुतिस्मृतिविरोधात्। तथा च श्रुतिः॥ द्वादश मासाः
सम्वत्सर इति त्रयोदशोऽत्याधिमासपाते। स्मृतिः यस्मिन्नब्दे द्वादशैकश्च यव्य इति। यव्यो मासः यव्या मासाः श्च मेकः सम्वत्सर इति शतपथ श्रुत्या यव्यत्वमेक शब्दयोर्मासव

ष पर्य्यायतोक्ता। यत्तु नरसिंहपुराणीये। पंचमासान् हरौ सुप्ते देशे तत्र भयं भवेत्। ब्रह्महा च भवेद्राजा संग्रामे भंगमाप्नुयात्। तन्मिथुनार्के मलमासपाते तस्याप्याषाढत्वा
त् तत्र हरिशयने सति दोषाभिधायकं तेन कर्कटके प्रकृताषाढ एव हरिशयनं। तत्र यद्विहितं कर्म्म उत्तरे मासि कारयेत्। इत्येकमूलत्वात्। यत्र मिथुनार्के हरिशयनं तत्र कर्क
टादौ मलमासपाते पंचममासत्वेपि न दोषः चान्द्राषाढादिष्वेव हरिशयनादिविधानात् तथा च मत्स्यपुराणे। शेते विष्णुः सदाषाढे भाद्रे च परिवर्त्तते। कार्त्तिके परिबुद्ध्येत शुक्ल
पक्षे हरेर्दिने। सौरपरत्वे कर्कटशयनादौ सदत्यनुपपत्तेः ततश्च व्यासवचनात्। मीनस्थरवि प्रारब्ध शुक्लप्रतिपदादि दर्शान्तश्चैत्रो मासः एवं वैशाखादिरपि एतेन मीनस्थरवि
प्रारब्धादीनां गुरुत्वात् मीनस्थरव्यादीनां च लघुत्वात्। नागृहीतेत्यादिन्यायाच्च सौर एव शक्तिरिति निरस्तं। किं न करोति वचनं वचनस्य नातिभार इति न्यायात् अत एव प्रमाणवन्त्य
दृष्टानि कल्प्यानि सुबहून्यपीत्युक्तं अत एव सौरे कुम्भप्रतिपदादि पौर्णमास्यन्ते वा यश्चैत्रादिपदप्रयोगः स गौण्या लक्षणया वा वेदितव्य इति चान्द्र एव मुख्यत्वं औपदेशिक श
क्तेरभावात् एवं न नानार्थतापि तथा चान्द्र एव चैत्रादिपदानां शक्ता नक्षत्रेण युक्तः कालः सास्मिन् पौर्णमासीति संज्ञायामिति सूत्राभ्यां पाणिनिस्वरसोऽवगम्यते अत एव ज
यादित्येन परसूत्रे दशरात्रादिव्याहृत्यर्थं मासार्द्धमाससम्वत्सराणामियं संज्ञा इत्यभिधाय पौषो मासः पौषोऽर्द्धमासः पौषः सम्वत्सर इत्युदाहृतं एतत् समयप्रकाशकृता
पि लिखितं। तत्र पुष्ययुक्ता पौर्णमासी पौषी सास्मिन् मास इति पौषः। एवं माघादिः। अभिधानं च पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा। नाम्ना स पौषो माघाद्यश्चैवमेका
दशापरे। एवमर्द्धमासेपि। सम्वत्सरे तु विशेषो वराहसंहितादैवज्ञमनोहरकृत्यचिन्तामणिषु। नक्षत्रेण सहोदयमस्तं वा येन याति सुरमंत्री। तत्संज्ञं वक्तव्यं वर्षं मासक्रमेणैव

वचारिणीकार्त्तिकादीनि आग्नेयाद्व्यायाद्ययोगीति क्रमशस्त्रिभिश्च पंचममन्त्यमुपान्त्यं च विज्ञेयं। नक्षत्रेणायुज्यमाननक्षत्रेण आग्नेयं कृत्तिकापंचमं फाल्गुनं अन्त्यमाश्विनं
13 उपान्त्यं भाद्रं अन्त्योपान्त्यौ त्रिभौज्ञे योपाख्यानाश्विनि त्रिभोमतः। शेषा मासा द्विभाज्ञेयाः कार्त्तिकादिव्यवस्थया। इति वचनात्। देहे चित्रादितारासां पूर्णा पर्वेन्दुसंस्तते। मासाश्चैत्रादयो
ज्ञेयास्त्रिकैः षष्ठ्यान्त्यपंचमाः इति संकर्षणकांडाच्च। पूर्णापर्वेन्दुसंगते पौर्णमासीसंयुते। तदेकवाक्यतया पूर्ववचने पौर्णमासीलाभः। यथा मासानां पौर्णमास्यां कृत्तिकादिसंबन्धा
त् कार्त्तिकादित्वं। तथा वर्षाणां बृहस्पतेरस्तोदयसंबन्धात् कार्त्तिकादित्वं तेन कृत्तिकारोहिण्योरेकतरस्मिन् बृहस्पतेरस्तोदये कृतरस्लाभे कार्त्तिकं वर्षं एवं मार्गशीर्षादि। यत्र वर्षे द्वय
घटकयोर्नक्षत्रयोरेकतरस्मिन्नस्तं गतो गुरुः रन्यतरस्मिन्नुदेति तत्र का गतिरिति चेन्न। कार्त्तिकोत्तरं मार्गशीर्षं तदुत्तरं पौषमित्यादिक्रमाकृतिः। एवमत्र ज्येष्ठाजेष्ठसंवत्सराभिधानं १३ मल
अनयादिशाज्ञेयं यथा राजमार्त्तण्डे ह्यत्यचिन्तामनौ च। ज्यैष्ठे संवत्सरे चैव ज्यैष्ठा तासस्य पूर्णिमा। ज्येष्ठा मेन समायुक्ता महाज्यैष्ठी प्रकीर्त्तिताः। संवत्सराशब्दो वर्षमात्रपर्यायः।
न तु संवत्सरपरिवत्सरेदावत्सरानुवत्सरोद्वावत्सरान्तर्गतवत्सरविशेषपरः॥ तदवगमकन्तु शाकाब्दात् पंचभिः शेषात् समाद्यादिषु वत्सराः। संपरीदानुपूर्वाश्च तथोदापूर्वका
मताः संवत्सरादिफलन्तु विष्णुधर्मोत्तरे। संवत्सरे तथा दानं तिलस्य तु महाफलं। परिपूर्वे तथा दानं यवानां च द्विजोत्तमाः। इदापूर्वे च वस्त्राणां धान्यानां चानुपूर्वके। उदापूर्वे र
जतस्य दानं प्रोक्तं फलं। ज्योतिर्विदस्त्विज्यमध्यात् प्रभवादेश्च संभवं। ऊचुस्तत्समाद्यादिवर्षाणामपि संभवं। इज्यमध्यात् गुरुमध्यभोगगणनातः। प्रभवादेः प्रभवादिव
र्षषष्ठेः। गंगावाक्यावल्यामपि ज्यैष्ठे संवत्सरे इत्येव पाठः। किन्तु ज्येष्ठसंवत्सरपदार्थानभिज्ञेनैव तथान्यथा व्याख्यातं। यथा ज्येष्ठानक्षत्रयुक्ता यदि ज्यैष्ठी पूर्णिमा संवत्सरे स्यात्

तदा महाज्यैष्ठी भवति सम्वत्सरन्तु सम्वत्सर परिवत्सरेत्यादिवत् परपंचकेषु वत्सर विशेषइति तन्न । ज्यैष्ठेत्यस्य वत्सरविशेषपरास्यानर्थक्यात् । एतेनतदृष्ट्वा केश्चित् संवत्सरेय
दिस्यादितिपरिकल्प्यपठितं तद्धेयं । तथाचाद्भुतसागरे द्वादशवर्षफलप्रस्तावे क्रमशो विष्णुधर्मोत्तरबृहद्गार्गवराहसंहितावचनानि । ज्येष्ठामूलोपगे जीवे वर्षंस्यात्शाक्रदैवतं । पीडा
करं धर्मभूतं सम्यक श्रेष्ठनहीमतं । ज्येष्ठमूले च नक्षत्रे चरेद्यदि बृहस्पतिः । ऐन्द्रः सवत्सरः सस्यात् सर्वभूतशिवप्रदः । शाक्रदैवतं ज्यैष्ठं वर्षं ज्येष्ठायाः शाक्रदैवतत्वात् । एवं ऐ
न्द्रेपि । ज्यैष्ठे ज्ञातिकुलश्रेणी ज्येष्ठान्नृपाः सर्वधर्मज्ञाः । पीड्यन्ते सर्वधान्यानि हित्वा कंगुसमीजानि । शमीशिम्बातत्प्रभवानि मुद्गकलायादीनि । माषादयः शमीधान्ये शूकधान्ये यवा
दय इत्यमरः । शेषवचनं कृत्यचिन्तामणावपि इत्थं च चैत्रादीनां वर्षवाचित्वात् तद्व्यावृत्तये संकल्पवाक्ये पञ्चके मासि इत्युच्यते । एवं पक्षपदं तिथिपदं च शुक्लादिगुणाद्वितीयादि संज्ञानां
व्यावृत्तये अतएव भविष्यपुराणादौ माघेमासि सिते पक्षे सप्तमी कोटिभास्करा इत्युक्तं अतो माघशुक्लसप्तम्यामित्यादि वाक्यरचना मैथिलोक्ता हेयेति विद्याकरवाजपेयिना पि वि
हिता विहितत्वसन्देहे क्रममात्रविरोधिरूपादविहितकरणाद्विहितकरणे महान्दोष इति करणमेवन्याय्यमित्युक्तं । तदस्तु प्रकृतमनुसरामः । न च सौरे पि पौषमाघादौ तादृशी
व्युत्पत्तिः सम्भवति । पुष्यमघादियोगस्य सौरे पौर्णमास्यामसंभवात् । तथाच गोभिलः । सूर्याचन्द्रमसोर्यः परो विप्रकर्षः सा पौर्णमासीत्यत्र पौर्णमास्यन्तयामे सूर्याचन्द्र
मसोः सप्तमराश्यवस्थानरूप परमविप्रकर्षनियमात् स च पुष्यकर्कटस्थे चन्द्रे धनुस्थे च रवौ न भवेत् । षडष्टकेनावस्थानात् किन्तु मकरस्थे रवौ सं भवति तच्च सप्तकेनावस्था-
नात् । ततश्च सा व्युत्पत्तिश्चान्द्र एव पौषेणासौरे इति तदा चान्द्र एव मासः । पौष इति एवं माघादिषु ज्ञेयं । अतएव लघुहारीतेन । प्रथमतः पौषे माघाद्यमेव हीत्युक्तं न चैत्रादीति

पौषमाघाश्विनेषु सौरेषु सर्वथा योगासंभवात् । चैत्रादौ तु कदाचित् सौरेऽपि योगसंभवात् । नहि उक्तयोगाद्यौगिकश्चैत्रादिशब्दोऽस्तु किं मीनस्थरविप्रारब्धेत्यादि
१५ ना रूढिकल्पनया मैवं । अन्त्योपान्त्यावित्युक्तप्रकारेण रोहिण्यादौ योगस्य व्यभिचारात् न च तदत्यन्ताभावाभावरूपयोग्यतावशादपचन्नपि सूपकारः । पाचक इति वद्वा
पि तथास्त्विति दीक्षितोक्तं युक्तमिति वाच्यं व्यक्तिभेदेन कृत्तद्धितवाच्ययोग्यताया अभावात् । अत्र योगकल्पनन्तु उदात्तादिस्वरभेदकल्पनाय पङ्क्तौ भट्टपादैः । यत्रार्थस्य
विसंवादः प्रत्यक्षेणोपपद्यते । स्वरसंस्कारमात्रार्था तत्र स्यात् पाणिनी स्मृतिः ॥०॥ अथ सौवैशाखस्यामावास्याया रोहिण्या संबध्यते इति श्रुतेर्वैशाख एकस्य चान्द्रः श्रौतः
सौरास्तु माघादयो द्वादश एव श्रौताः । तथा च श्रुतिः । तपस्तपस्यौ शिशिरावृतू मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतू अथैतदुदगयनं देवानां दि १६ मल
नं नभाश्च नभस्यश्च वार्षिकावृतू इषश्चोर्जश्च शारदावृतू सहाश्च सहस्यश्च हैमन्तिकावृतू । अथैतद्दक्षिणायनं देवानां रात्रिरिति । अत्रायनस्य सौरत्वेन तद्घ
टक तपस्तपस्यादीनामपि सौरपरतेति अतो भूयसामनुरोधेन वैशाखादयः । सौरवाचिनो वधार्यन्ते मीनस्थरविप्रारब्धेत्यादौ सौरावगमसापेक्षा चान्द्रावगतिरिति –
सौर एव मुख्य इति जीमूतवाहनोक्तं युक्तं तथा च विरोधो यत्र वाक्यानां प्रामाण्यं तत्र भूयसां । तुल्यप्रमाणसत्त्वे तु न्याय एव प्रवर्त्तक इति तन्न सा वैशाखस्यामावास्याया रो
हिण्या संबध्यते इति श्रुत्या चान्द्रे वैशाखे उपदेशिकी शक्तिः कृप्ता सौरे तु तपस्तपस्यावित्यादि श्रुत्या पर्यायद्वारा शक्तिः कल्प्या सा च कृप्तशक्तिविरोधान्न भवितुमर्हतीति तपस्त
पस्यावित्यादिश्रुतेस्तपनारंभकमासपरिज्ञापकत्वमेव तथा च विष्णुपुराणं । मासः पक्षद्वये नोक्तो द्वौ मासावर्कजावृतुः । अयनं त्रयं चाप्ययनं द्वे यने वर्षं संस्थितं । तथा कर्क

टादिस्थिते भानौ दक्षिणायनमुच्यते। उत्तरायनमप्युक्तं मकरस्थे दिवाकरे। दक्षिणामयनं गमनं रवेरेवमुत्तरायणामिति। अतस्तस्याः शक्तिग्राहकत्वे मानाभावः एतन्मकरादि कर्कटाद्यके गायनं निरूपणं। श्रौतस्मार्त्तकर्मार्थं धनुरर्कादौ सूर्यसिद्धान्तादि हितोऽयनादि निरूपणान्तु रविगत्यनुसारेण दिनमानादिज्ञापनार्थमित्यनयोर्न विरोधः सौरप्रतीतिसापेक्षा चांद्रप्रतीतिरित्यत्रापि मीनादिस्थे रविर्येनामारंभ प्रथमे क्षणे इत्यादिवाचनिकेऽर्थे लाघवमनवकाशात्। न सौरशक्तिसाधिका एतेन प्रयोगवाहुल्यात् सौर एव वाच्यो न चांद्रः स्वल्पप्रयोगदर्शनादित्यपि निरस्तं। अन्यथा अक्षपादादिशब्दानामिंद्रियचरणादिमात्रवाचकता स्यात् न विभीतकस्यादिवाचकत्वं तदुक्तं वार्त्तिककृद्भिः न चाल्पत्वबहुत्वाभ्यां प्रयोगानां विशिष्यते वाच्यवाचकभावोऽयमक्षपादादिशब्दवत्। विभीतके पक्षशब्दो पथप्रयोगैः प्रयुज्यते। तथापि वाचकस्तस्य न्यायते शकटांगवत्। शकटांगं च कद्वयधारकदंडः। श्रुतौ सौरे वैशाखादिपदानां नैकस्यवकुप्रयोगाभावाच्च। यत्तं ब्रह्मपुराणे। चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि। शुक्लपक्षे समग्रन्तु यदा सूर्योदये सति। प्रवर्त्तयामास तदा कालस्य गणनामपि। ग्रहान् राशीन् ऋतून् मासान् वत्सरान् वत्सराधिपान् इत्यनेन मासस्य वत्सराणां चांद्रत्वमुक्तं। ब्रह्मसिद्धान्तेपि। चैत्रसितादेरुदयाद्भानोर्दिनमासवर्षयुगकल्पाः। सृष्ट्यादौ लंकायामिह प्रवृत्ता दिनैर्वत्से। चैत्रसितादेश्चैत्रशुक्लप्रतिपदः तामारभ्येत्यर्थः। कृत्यरत्नाकरेप्येवं दिनैस्तिथिभिः॥ ० ॥ अथ मलमासः॥ ※॥ ननु यथा सौरे तिथिक्षयलाभे कर्मणि संशयः। तथा चांद्रेपि मलमासे सति द्विश्चैत्रादिना मृततिथ्यादेर्द्वित्वात् पुनरपि कर्मणि संशयः स्यात्। तत्राप्याह लघुहारीतः। इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्त्तितः। इत्युक्ता ननु तिकाम्य तु रवियेदागच्छेत कथंचन। आद्यो मलि

म्लुचोक्तो यो द्वितीयः प्रकृतः स्मृतः । तस्मिंस्तु प्रकृते मासि कुर्य्यात् श्राद्धं यथाविधि । तथैवाभ्युदयं कार्य्यं नित्यमेके कविसर्वदा । यदा तं दर्शान्तमासमतिक्रम्य तत्पूर्वमासान्त्य
15 क्षणाद्वृत्तिराशिस्थः सन् सूर्य्योऽतिवाह्य गच्छेत् साक्षान्तरे राश्यान्तरं गच्छेत् तदा द्योतिक्रान्तो मासो मलिम्लुचोक्तोऽयं मलीमसं म्लोचति गच्छतीति मलिम्लुचः अस्य मलितत्वं कठ
शाखाश्वलायनब्राह्मणाभ्यामग्रे स्फुटी भविष्यति द्वितीयस्तु प्रकृतः शुद्धः कर्म्मार्हत्वात् तदेवोपपादयति तस्मिंस्त्विति तत्रापि श्राद्धमित्यादि प्रदर्शनमात्रं वक्ष्यमाणवच
नजातात् । ज्योतिषे अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितं मलमासः स विज्ञेयो विष्णुः स्वपिति कर्कटे । अमावास्याद्वये अमावास्याद्वयान्तिमक्षणद्वयं रविसंक्रान्तिभ्यां रवि
क्रियोत्पन्नोत्तरसंयोगरूपाभ्यां यथाक्रमं वर्जितं तेन दर्शद्वयान्तक्षणद्वयस्य पूर्वापरयोरेव अव्यवहितक्षणयोरपि रवेः क्रियोत्पन्नोत्तरसंयोगान्तराभ्यां यथाक्रमं योगेना
धिमासः संक्रान्तेरेकक्षणे पूर्वसंयोगनाशः उत्तरसंयोगोत्पत्तिश्चेति क्षणद्वयवर्त्तित्वमिति मीमांसकसिद्धान्तात् एते लक्षणचतुष्टयस्यापि तत्ववादि नैयायिकमतानुसारि १५
णा यदत्र दूषणमभिहितं तद्धेयमिति श्राद्धविवेकेऽपि अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितमित्यत्रामावास्यापदेन तदन्तो लक्ष्यते संक्रान्तिशब्देन च क्रियाभिधीयते ।
न तु उत्तरसंयोगरूपं फलमित्यर्थः प्रथमामावास्यान्त्यक्षणात् प्राक्क्षण एव संक्रमणे प्रतिपदादेर्मासस्यैलंघनं भवति तथाहि दर्शान्त्यक्षणात् प्राक्क्षणे संक्रमणे दर्शान्तक्षणे
राश्यन्तरसंयोगस्तस्यापरक्षणे प्रतिपदारंभे प्रतिपदादेर्मासस्य दर्शान्तद्वयक्रोडीकृतस्य एकराश्यवस्थितेन रविणालंघनं भवति पूर्वदर्शान्त्यक्षणे च क्रियोत्पत्तौ नैवाप्रक्रिया संभ
वतीत्यभिहितं । तन्मते तु अन्त्यामावास्यान्त्यक्षणे क्रियोत्पत्तौ अमावास्यान्त्यद्वयस्य रविक्रियावर्जितत्वाभावात् एकराशिस्थरविना चान्द्रमासलंघनेऽपि मलमासाभावापत्–

त्तिः इष्टापत्तौ तु तृतीयाब्दे मलमासपातनियमभंगप्रसंगः। पूर्वमासस्य मलमासत्वाभावेपि अपरस्य मिथुनादिस्थरव्यारब्धत्वेन चिरायाढत्वादिप्रसंगश्चस्यादिति ततश्चामावास्या
द्वयमित्यस्य पूर्वोक्तव्याख्यायामपि प्रतिपदादेरेव यथालंघनं भवति तथाभिहितं। अतो नामावास्यादित्वं तदन्तादित्वं वा मासस्य तथात्वे वर्षेषु मासानां लोपापत्तिः स्यात् एकदर्शा-
स्य तदन्तस्य वा मासद्वयघटकत्वे दर्शान्तक्षणे संक्रान्तौ पूर्वस्य चापरस्य च रविलंघितत्वाभावे तृतीयाब्दे मलमासपातनियमभंगः स्यात् तदानीं जातस्य मृतस्य वा कर्म्मणि मास विभ्रो
वानध्यवसायः स्यात् नानावचनविरुद्धं प्रतिपदादित्वं च मासस्य व्याहन्येत। गुरुचरणास्तु द्वे रुवे पौर्णमास्यौ द्वे अमावास्ये तस्मात् प्रतिपद्युपवसन यजेतापरेद्युरिति श्रुत्या
इन्द्राग्नियागांगतिथिधर्म्मियोगे नाजहत्स्वार्थलक्षणया अमावास्यापदस्य शुक्लप्रतिपदमावास्यापरत्वं संक्रान्तिपदस्यापि राश्यन्तरसंयोगरूपफलपरत्वमित्याहुः। अमा
वास्याद्वयमित्यनेन उपलक्षणविशेषणपूर्वापराभ्याममावास्याभ्यां परिच्छिन्नः शुक्लप्रतिपदादिदर्शान्तः कालो बोध्यते इत्यपरे तत्र पूर्वामावास्याया उपलक्षणत्वे क्रियान्व
यित्वात्तद्व्यापनाभावात् मिथुनस्थोपदमान्तु रमावास्याद्वयं स्पृशेत्। इत्यत्रामावास्याद्वयमिति कर्म्मता न स्यात्। तस्याः कौ दर्शकश्चैकराशौ दर्शद्वयाति गर्हितमभिधानं चासं-
गतं स्यात् पूर्वामावास्याया उपलक्षणत्वे पूर्वामावास्यान्तक्षणवृत्तिराशिस्थः सन् सूर्य्योतिवाह्य गच्छेदिति स्वोक्तव्याख्यापद्यनुपपन्ना स्यात् एवमन्यान्यपि वचनानि व्याख्येयानि गृह्य
परिशिष्टे ज्योतिःपराशरौ। रविणालंघितो मासश्चान्द्रः ख्यातो मलिम्लुचः। तत्र यद्विहितं कर्म्म उत्तरे मासि कारयेत्॥ पराशरः। पक्षद्वयेपि संक्रान्तिर्यदि न स्यात् सितासिते। त-
दा तन्मासविहितं उत्तरे मासि कारयेत्। अत्र रवेर्लंघनमसंक्रमणं च तदा भवति यदा तन्मासतत्पूर्वमासान्त्यक्षणयोरेकराशिस्थस्य तन्मासानन्तरमेव राश्यन्तरसंयो

गे परस्यापि मलमासतास्यात् । अतएवज्योतिषे । अमावास्यापरिच्छिन्नं रविसंक्रान्तिवर्जितं । मलमासं विजानीयात् गर्हितं सर्वकर्मसु । तस्यार्को दर्शकश्चैक राशौ दर्शद्व
यातिगः । अत्रैक राशिस्थस्यार्कस्य दर्शद्वयातिगत्वमुक्तं एतच्च पूर्वापरदर्शि तयोर्मासयोः पूर्वस्यैव संभवति न परस्य मलमासकारणं तज्ज्योतिषे । दिवसस्य हरत्यर्कः षष्टिभाग
16 मृतौ ततः करोत्येकमहश्छेदं तथैवैकं च चन्द्रमाः । एवमर्द्धतृतीयानामब्दानामधिमासकं । ग्रीष्मे जनयतः पूर्वं पंचाब्दान्ते तु पश्चिमे । मलमासस्य चान्द्रत्वात्तद्घटकार्द्दि
वसपतयोरपि तथात्वात्तिथिवाचकत्वं । तथा च विष्णुधर्म्मोत्तरे । तिथिनैकेन दिवसश्चान्द्रमाने प्रकीर्त्तितः । अहोरात्रेण चैकेन सावनो दिवसः स्मृतः । अत्र सोमयोगे सवनी
यं चयस्याहोरात्रसाध्यत्वात्तत्सम्बन्धि दिनं सावनमिति माधवाचार्य्यः । सूर्य्यसिद्धान्ते तिथिश्चान्द्रमसं दिनमिति । समयप्रकाशे ज्योतिषं तिथिः शशांकदिनमिति । एतेन १६ मलमास
विष्णुधर्म्मोत्तरवचनपूर्वार्द्धमात्र प्रदर्शिना वाचस्पति मिश्रेण चान्द्रमाने तिथ्या तत्तद्दिनगणना सिद्ध्यतु दिवसपदं च तिथिवाचकमित्यत्र न किंचित्प्रमाणं तद्धि सूर्य्यावच्छिन्न
वत्तुर्यामेशक्तं तथैव हृद्व्यवहारादित्युक्तं हेयं । परार्द्धेपि दिवसपदस्याहोरात्रावाचित्वापत्तेः हृद्व्यवहाराच्छास्त्रीयपरिभाषायां वैयर्थ्यापत्तेर्वलवत्त्वाच्च तेन दिवसस्य तिथेः
षष्टिभागे दंडमेकं रविर्हरति छेदयति उत्तरे छेदमभिधानात् तथा च स्वतौ मासद्वये षष्टिनाडीच्छेदात् अहस्तिथिच्छेदमाकर्षणं करोति एवं चन्द्रोपीति । एवमुक्तक्रमेण वर्षे
द्वादश तिथ्यात्मककालाकर्ष दर्द्धतृतीयानामब्दानामन्तेऽर्द्धं तृतीयं येषां ते तथा ग्रीष्मे माधवादिषट्के पूर्वे माधवादित्रिके पतिते पंचाब्दान्ते तु पश्चिमे श्रावणादि
त्रिके पतितं मलमासं चन्द्रार्कौ जनयतः । ग्रीष्मे माधवादिषट्के इतियदुक्तं तद्व्यक्तमाह मिहिरः । माधवादिषु षट्केषु मासि दर्शद्वयं यदा । द्विराषाढः स विज्ञेयः शेषे तु श्राव

शोच्युतः। छिरावाडो छिरावाडादिः। श्रावणो सौरे। तथा चज्योतिषे। मिथुनस्थो यदा भानु रमावास्याद्वयं स्पृशेत्। छिरावाडः सविज्ञेयो विष्णुः स्वपिति कर्कटे। अमावास्याद्वयं तदन्त
द्वयं स्पृशेत्। संयुज्यात् अत्यन्तसंयोगे द्वितीया तेन तन्मध्येन राश्यन्तरसंयोगाइत्यर्थः। ननु कर्कटादि द्विके ऽधिमास पाते मिथुन एव हरिशयनं कथं माधवादिद्वि एकमा चेक
र्कट एव तत्र अत्र राजमार्तण्डः। कन्यासिंह कुलीरेषु यदा दर्शद्वयं भवेत। आगामिनि तदावर्षे कुलीरे माधवः स्वपेत्। माधवादि द्विक श्रावणादि द्विकाधिमासे विवेचन
मप्येतदर्थं इदन्तु सार्द्धवर्षद्वयाधिमास पतनमौचित्यक्रमादुक्तं क्वचित् तिथीनां वा ह्रस्वे दण्डवृद्ध्याधिक न्यूनदर्शनादुक्तकालन्यूनाधिककालेपि मलमासो भवतीति स
मय प्रकाशकृतः। वस्तुतस्तु वैपरीत्यं येतान्यूनदंडतिथेः प्राचिकत्वेन तत्र तिथिक्षयस्य मक्तदित्युपलभ्यमानत्वात् स्वल्पकाले तिथ्यन्तरसम्बन्धात् शीघ्रं रविलंघनप्रती
तेः शीघ्रमेव मलमासो भवतीति। अधिकदंडतिथेः प्राचिकत्वे तत्र तिथिक्षयस्य मक्तदित्यनुपलभ्यमानत्वेऽधिकेनैव कालेन तिथ्यन्तरसम्बन्धात् विलंबेनैव विलंघन
प्रतीते श्चिरेणैव मलमासो भवतीति तथा च विष्णुधर्म्मोत्तरीये। सौरसंवत्सरस्यान्ते मानेन शशिजेन तु। एकादशातिरिच्यन्ते दिनानि भृगुनन्दन। समाद्वये सार्द्धमासे त-
स्मान्मासोऽतिरिच्यते। स चाधिमासकः प्रोक्तः काम्यकर्म्मनिगर्हितः। इदन्तु नियतं एकस्मादधिमासात् तृतीयेब्देऽधिमासान्तरमिति। यद्यपि यां तिथिं समनुप्राप्य तुलां ग
च्छति भास्करः। तयैव सर्वसंक्रान्तिर्यावन्मेषं न गच्छति। इति राजमार्तण्डवचनात् तुलादि षण्मासे तिथिवृद्ध्यभावाद्वर्षेवादश तिथिवृद्धि रनुपपन्ना तथापि मध्ये विषुवतोर्भा
नुर्यान्यहानि तु वर्द्धयेत्। तैः संभूयाधिको मासः पतत्येव त्रयोदशः। इति गृह्यपरिशिष्टे विषुवतोर्मेषतुलासंक्रान्त्योर्मध्ये मेषादिषण्मास एव तिथिवृद्धिरुक्ता अतो

राने मेषादिषराभास मन्दभुक्त्यास न्नदिन वृद्धिस्तुलादौ शीघ्रभुक्त्या दिनक्षयप्रासइति। तथाच ज्योतिःशास्त्रे मेषादीनामहद्वन्द्वं षस्त्रिंसन्नाष्टचंद्रकं। तुलादीनामष्टस न्नचंद्रक
न्तुलिखेत्पृथक्॥७७॥ चन्द्रःएकः ग्रंकस्य वामागति रित्यंकविदोसमयात् व्युत्क्रमेणांकावोध्याः। तेनदिनवृद्धि क्रमसंचयाभ्यां मेषादिषट्कस्य एकादशादि तिथिवृद्धिः
१७ एवं चागतेवृद्धितये सार्द्धपंच पक्षदिनक्षये। दिवसस्याष्टमेभागे पतत्येकोधिमासकः। इतिराजमार्तण्डात् सप्तदशदिनाधिक ग्रष्टमासाधिकवर्षद्वये ऽधिमासः ससौरेमा
सि सप्तदशदिनोत्तरं चान्द्रमास लंघनासंभवात् सावनमानेनज्ञेयः तथाचविष्णुधर्मोत्तर प्रथमकाण्डे। सौरेणाब्दस्तुमानेन यदा भवतिभार्गव सावनेनततोमाने दिनषट्कं प्र
पूर्य्यते। सौरसम्वत्सरे दिनषट्काधिकः सावनसम्वत्सरो भवतीति सौराष्टमासाधिकवर्षद्वये सप्तदशदिनानि वर्द्धन्ते सावन क्रमेणेति पूर्वोक्तं विष्णुधर्मोत्तरोक्तसमान १७ म
विषयतास्येति। यत्तुपंचपंचाशदधिक नवशतशकाब्दे तुलासंक्रान्तिरमावास्यायांभूता ततोऽतिचारेणावृश्चिक संक्रान्तिः प्रतिपदि पुनरपि स्वजुगत्या अमावास्यायां धनुः
संक्रान्तिरिति। इष्टस्तुलायामधिमासकोऽच्युकर्मदेनलिखितः। पूर्वदर्शितविषये वृश्चिकस्थरव्युपक्रान्तमार्गशीर्षलोपोपि तस्मिन्नब्दे वैशाखे मलमासान्तर मित्युक्तं
तत्सत्यं किन्तु तुलादित्यादौ दृश्यमानोपि नायमधिमासः किन्तु तत्पातादधिमास समानधर्म्मायं अतस्तवतत्र प्रतिपदिवृश्चिक संक्रान्तौ तन्मासस्य तुलास्थरवावब्दत्वेपियं
तिथिं समनुप्राप्य तुलांगच्छतिभास्करः। तयैवसर्वसंक्रान्तिर्यावन्मेषंनगच्छति। इतियदावक्रातिचाराभ्यां सूर्य्यसंक्रमणंभवेत्। क्षत्रियाणामस्पृष्टधारा तदापिवतिमेदि
नी इतिज्योतिःशास्त्रा वृश्चिकस्थरव्यारंभाहित्वान्तनानारंभेपि शंखवेलान्यायेन प्रत्यभिज्ञानाद्भवति मार्गशीर्षपदवाच्यता अतिचार पदाच्च स्वस्थानमतित्यचरतीत्यमावस्यैव

वृश्चिकसंक्रान्तेः स्वस्थानमवसीयते वैशाखे तत्राधिमासः प्रकृतत्वात् वक्रातिचाराभ्यामिति रवेर्वक्रगत्यसंभवान्मन्दशीघ्रगतिभ्यामित्यर्थः। एवमाश्विनाधिमासपाते तुलादौ पुन
स्तथापाते पूर्वाधिमासः प्रकृतत्वात्। नोत्तरस्यौत्पातिकत्वात् अत्रान्यत्सर्वं पूर्ववदिति यदा पुनरमावास्यायामेव तुलासंक्रान्तिर्भूतानधिमासपाते तुलादौ पुनस्तथापाते पूर्वाधिमासः।
भूतो माधवादिषट्केऽधिमासपातस्तदनन्तरमतिचारेण प्रतिपदि वृश्चिकसंक्रान्तौ भूतायां अपरा अपि संक्रान्तयो विषुवपर्यन्तं प्रतिपद्येव भवन्ति तदा पूर्वाधिमासात् सार्द्धद्वि
तीयवर्षे संचितैरधिमासस्यावश्यम्भावादन्यस्य चानुपलंभात् तुलादित्रये नाधिमासो निर्णीयते अतएव नाशंकितं कैश्चिदिदमिति कालविवेके जीमूतवाहन आह स्म।
जिकनोप्येवं युक्तं चैतत् तथाहि ज्योतिषे। दशानां फाल्गुनादीनां प्रायो माघस्य च क्वचित्। नपुंसकत्वं भवति न पौषस्य कदाचन। नपुंसकत्वं मलमासत्वं तथा हि। असंक्रान्तो
ह्ययो मासः कदाचित्तिथिवृद्धितः। कालान्तरात् समायाति स नपुंसक इष्यते। शाण्डिल्योऽपि। प्रायसो न शुभः सौम्यो ज्येष्ठश्चाषाढकस्तथा। मध्यमौ चैत्रवैशाखावधिकोन्यः शुभ
स्मृतः। सौम्यो मार्गशीर्षः। अधिकोऽधिमासः। यत्तु ज्योतिःसिद्धान्तब्रह्मसिद्धान्तयोः। घटकन्यागते सूर्ये वृश्चिके वाथ धन्विनि। मकरे वाथ कुंभे वा नाधिमासं विदुर्बुधाः। तदे
कवर्षे मलमासक्षयपाते बोध्यं। घटस्तुला। एतद्विषयमेव ग्रीष्मे। जनयतरति माधवादिषु षट्के स्वचेति नियमाभिधानं। अतएव एकवर्षीयसंक्रान्तमासावधिमासमनुरं
घिते भेदेनोपन्तौ तथाच काठकगृह्यं। चूडां मौंजीबंधनं च अग्न्याधेयं महालयं। राजाभिषेकं काम्यं च न कुर्यादधिमासके। चूडां मौंजीबन्धनं च अग्न्याधेयं महालयं। राजाभि
षेकं काम्यं च न कुर्याद्भानुलंघिते। महालयं कन्यागता परपक्षश्राद्धं एतद्विषयमेव यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः। तावत् श्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा

कृतादित्यनेनतच्छ्राद्धं तुलार्केविहितं।भीमपराक्रमेपि। अधिमासे दिनपाते धनुषि रवौ मासलंघितेमासिचक्रिनिद्रेकुर्यात्रोमांगल्यं विवाहं चदिनपाते दिनक्षये। तत्स्वरू
पंकौर्म्मेपाद्मेपि।द्वौतिथ्यन्तावेकवारेयत्रसस्याद्दिनक्षयः।वशिष्ठः।एकस्मिन सावनेत्वह्नि तिथीनांत्रितयंयदा। तदादिनक्षयः प्रोक्तस्तत्रसहस्रिकंफलं।साहस्रिकंफलमि
१४ ति मांगल्येतरवैदिककर्म्मपरं। तथाचमत्स्यपुराणे। शतमिन्दुक्षयेपुण्यंसहस्रन्तुदिनक्षये कौर्म्मेपाद्मवशिष्ठैकवाक्यतयासावनदिनव्यवहारप्रवृत्तिः सूर्योदयावधिरेव सूर्य
सिद्धान्तेति स्तकादिपरिच्छेदोदिनमाशाब्दपास्तथा। मध्यमग्रहभुक्तिश्चसावनेनप्रकीर्त्तिता। अत्रदिनाधिपस्यरव्यादिभोग्येदिनं वाररूपंसावनगणानोक्तं व्यवहारोपिताहृ
गेव तिथिविवेकेपि। नवतुवारयोगे व्यस्ततिथेर्ग्रहणं तस्यदिनक्षयेऽसम्भवादित्युक्तं सावनदिनमाह सूर्यसिद्धान्तः।उदयादुदयाद्भानोर्भौमसावनवासराः।भौमेतिपि
त्रादिव्यावृत्त्यर्थं। यत्तुरेखापूर्वापरयो रित्यादिना ज्योतिषेवारप्रवृत्तिरुक्ता तत्ज्योतिःशास्त्रोक्तकालहोरादिज्ञापनार्थमितिज्योतिस्तत्त्वेवहुधाविहतं नैवास्तमनमर्कस्य १८ म
नोदयःसर्वदासतः। उदयास्तमनाभ्यांहि दर्शनादर्शनंरवेः।येयेत्रदृश्यतेभास्वान् सतेषामुदयःस्मृतः इतिविष्णुपुराणात्।दर्शनयोग्यकालावधिरेववारप्रवृत्तिः।तेनवा
रघटितकर्म्मसु सएवकालइति। यत्तुघटकन्यागतमलमासनिषेधः सतदुत्तरमेषगतमलमासान्तरपातेवोध्यः। अन्यचतुमाधवादिषुषट्केष्वित्यादिवचनात क्रमसं
चितत्वाच्चाश्विनएव मलमासः नचैत्रान्ततुलादिः। तत्रपितामहः।मासिकन्यागतेभानुरसंक्रान्तोभवेद्यदि ।दैवं पैत्रं तथाकर्म तुलार्केकर्तुरक्षयं। एवंचएकस्मिन्नब्दे मा
सद्वयस्यरविलंघने तदेकतरस्यमेषादिगतत्वे सएवमलमासः घटकन्यागतइतिवचनात माधवादिषट्केपतितत्वाच्च अत्रैवविषये शातातपः।त्रयोदशाख्यंश्रुतिराह मासंच

तुर्दशः क्वापि न दृष्टपूर्वः। एकमासद्वितयं यदास्याद्वर्षेऽधिकन्तत्र परोऽधिमासः। तथा च श्रुतिः। द्वादश मासाः सम्वत्सरः क्वचित्त्रयोदश मासाः सम्वत्सर इति। कालमाधवीये त्वावा-
लिः। एकस्मिन्नेव वर्षे चेत् द्वौ मासावधिमासकौ। प्रकृतस्तत्र पूर्वस्यादुत्तरस्तु मलिम्लुचः। प्रकृतः शुद्धः कर्म्मार्ह इति यावत्। वर्षकृत्ये मासद्वयस्य मध्ये तु संक्रान्तिर्न यदा भवेत्।
प्रकृतस्तत्र पूर्वस्यादुत्तरस्तु मलिम्लुचः। एकस्मिन्नब्दे मासद्वयस्य रविलंघने तस्यमेवाद्यस्पृष्टत्वे तु पूर्व एव मलमासः। क्रमसंचितत्वात्। अन्यथा क्रमाभिधानं मनर्थकं स्या-
त्। कन्यायां पाते माधवादिषट्कपतितत्वाच्च। तथा च ज्योतिःपराशरः। कार्त्तिकादिषु मासेषु यदि स्यातां मलिम्लुचौ। सर्वकर्म्महरः प्रोक्तः पूर्वस्तत्र मलिम्लुचः। राजमार्त्तण्डे।
अमावास्याद्वयं यत्र मासि मासि प्रवर्त्तते। उत्तरः श्रावणो ज्ञेयः पूर्वस्तत्र मलिम्लुचः। न चैवं तमतिक्रम्येत्यादि लघुहारीतवाक्यं मतिव्यापकमिति वाच्यं। तस्यापवादं विनाक्व-
तत्वेन विशेषणीयत्वात्। तस्माद्यां तिथिं समनुप्राप्येति वाक्यात्तत्तिथेस्तत्प्राप्ति रविसंक्रमणारंभार्हत्वात्। वक्रातिचाराभ्यां तत्त्वानारंभेपि शंखवेलान्यायेन प्रत्यभिज्ञानात्।
भवति तत्तन्मासपदवाच्यतेति क्षयमासेपि मीनादिस्थो रविर्येषामित्यादिमासो त्ते लक्षणास्य पूर्वोक्तविषये संगतिः। यत्र तु दर्शे कन्यासंक्रान्तिर्भूत्वा तुलासंक्रान्तिस्तु प्रतिपदि ए-
वं प्रतिपदि वृश्चिकधनुःसंक्रान्ती ततो वक्रगत्या दर्शे मकरकुंभमीनसंक्रान्तयः प्रतिपदि मेषसंक्रान्तिस्तत्र कन्यायां मलमासः। धनुर्वृश्चयोर्मीने च भानुलंघितस्तत्र क्षय-
मासस्य मार्गशीर्षमात्रत्वात् तदुत्तरमासानां भानुलंघितावधिकानां पौषादित्वार्थं पूर्वराशिस्थरव्यारब्धत्वयोग्यतया तत्संगतिः ततश्च योग्यताश्रयणेन परस्तत्र मलिम्लुचः
इत्यस्य विषये सति भानुलंघितोत्तरक्षयमासावधिकेनाव्याप्तिः पूर्वस्तत्र मलिम्लुच इत्यस्य विषये सति भानुलंघितावधिके क्षयोमासोत्तरमासेपि तल्लक्षणास्य न व्याप्तिः। एवं चोत्पा

तिके तदनुरोधान्न व्यवहारः । किन्त्वौत्सर्गिककालानुरोधादेव । तथा च संवत्सरप्रदीपे । उत्पातेन भवेद्यस्तु कालस्यातिक्रमः क्वचित् । न तत्स्याद्व्यवहारांगमित्याह भगवान्
हरिः । न च साद्धिवर्षाद्यत् परं तुलायां अमावास्यायां वृश्चिकादिषु मेषपर्यन्तेषु प्रतिपदि संक्रान्तौ तुलायां कार्तिक एव मलमासः । तदुत्तरत्र भानुलंघितो न त्वत्र शंखवेला
न्यायो नास्ति कथमिति वाच्यं क्षयमासयुताब्दे गत्यन्तराभावात् शंखवेलान्यायानुशरणं तत्र भवेत् तदनुसारणस्या न्याय्यत्वात् । यत्तु रुद्रस्त्वाकिं यदेकस्यान्तिथौ संक्रान्तेरुपधानं
१७ स्वरूपयोग्यता पुनरन्यस्यामिति तदपि चिन्त्यं गृहस्थितेदंडे फलोपधानं स्वरूपयोग्यता पुनररूपस्य दंडेपीति । अथ तत्र दृष्टदंडत्वेन अग्निजननयोग्यता उभयसाधारणी विद्यते
प्रकृते तु कीदृशीति चेत् । एकशक्तिमत्त्वे ब्रूमः सा च शक्तिः फलवलोन्नेया क्षयमासयुताब्दे तु चैत्रोत्तरवैशाखस्तदुत्तरज्येष्ठ इत्यादिक्रमानुरोधेन चैत्रपूर्ववर्त्ती फाल्गुनस्तत्पूर्व १८ ब
वर्त्ती माघ इत्याद्यनुरोधेन च एकस्य दर्शनान्तस्य क्वाचिदपि शास्त्रे मासधितयत्वनधिगमेन यां तिथिं समनुप्राप्येति तत्र परो धिमासः इति पूर्ववस्तुन मलिम्लुच इति घटकन्यागत इति
उत्पातेन भवेद्यस्त्वित्यादि वचनपर्यालोचनया च यथायथं शास्त्रगम्यापीति । यदि जीमूतवाहनोक्तं यां तिथिं समनुप्राप्येति वचनोक्तमात्रं योग्यतावच्छेदकं स्यात्तदा यस्मिन्नब्दे क
न्यासंक्रान्तिः अमावास्यायां तुलायां संक्रान्तिः प्रतिपदि ततोमावास्यायां वृश्चिकसंक्रान्तिरेव मनावास्यायां धनुरादि मेषावधिसंक्रान्तयोभूताः प्रतिपदि वृषसंक्रान्तिस्तत्राश्विनो -
भानुलंघितः कार्तिकः क्षयः वैशाखो मलमास इति । तत्र कार्त्तिके तद्योग्यतावच्छेदकस्याभावात् लक्षणासंगतिः स्यात् तथा हि तुलासंक्रान्त्यवच्छिन्नतिथित्वस्य वृश्चिकादिसंक्रा
न्तियोग्यतावच्छेदकत्वेन विधानं प्रकृते तु तन्नास्तीति तरणारनिमन्तिस्थले वह्निजननयोग्यतायोत्र कशक्तिमत्त्वैव वेति नव्यमिश्चार इत्युक्तं एवं च एकस्मिन्पापध्वंसे प्रायश्चित्तस्या

नेकधोत कीर्त्तनमपि संगच्छते न च तत्र वैजात्येन संगमयितुं शक्यते ध्वंसे तदभावादिति एतत्सर्वं मीनादिस्थारविर्येषामारंभ प्रथमक्षणो भवेत्तेब्दे चांद्रमासाश्चैत्राद्याद्वादशस्मृ
ताः। इति व्यासवचनादवसीयते। तथा चोक्तं भट्टपादैः सिद्धानुगममात्रं हि कर्त्तुं युक्तं परीक्षकैः। न सर्वलोकसिद्धस्य लक्षणेन निवर्त्तनं इति। नन्वेकस्य क्षयमासस्य मेषगरविसंक्रां
तिः शशिमासे भवति यच्च तद्वैचं एवं वैशाखवाद्याद्यषादि संक्रान्तियोगेनेति ब्रुवन्ग्रन्थप्रतिपाद्यो मपलक्षणाक्रान्तत्वादुभयमासत्वं युक्तमिति चेन्न तस्य व्यासवचनादि विरोधाल्ल
क्षणपरत्वासंगतेः मलमासाव्यापनाच्च न च वत्सरान्तर्गतः पापीयस्तानाफलमासत्वात्। न च यतैर्धितु धानाद्यैः संक्रान्तो विनामकः इत्यनेन ज्योतिःशास्त्रे आषाढादिनामशू
न्यत्वेन विनामकता मलमासस्योक्तेति न तत्राव्याप्तिरिति वाच्यं द्विराषाढः सविशेषः इत्यादि प्रयोगात् तत्र यद्विहितं कर्म्म उत्तरे मासि कारयेत् इत्यभिधानाच्च तस्याषाढादित्वाभा
वे तत्र यद्विहितं कर्म्मेत्यनुपपन्नं स्यात् व्यासोक्त लक्षणाक्रान्तत्वाच्च किंच मलमासस्य आषाढादिनामशून्यत्वे तस्य वक्ष्यमाण काठकश्रुतावितरोपजीवित्वाभिधानं न संगच्छ
ते इतरोपजीवनं हि तदा भवति यदि तस्याषाढादित्वं स्यादिति तर्हि विनामकत्वं कुत इति चेत् विरुद्धनामको विनामकस्तस्य मलिम्लुचादिनामकत्वात् यद्वा सदपि नाम असदेव त
न्मासविहितकर्म्मानर्हत्वात् एतत्कोपेतु संक्रान्तोधिमासकस्त्येव पाठः। क्षयमासस्याधिमासत्वे तत्रमृतस्य कर्म्मणि पनध्यवसायः स्यात् किं पूर्वोमासः किम्वोत्तरो मास इति।
न च कपालाधिकरणन्यायेन तत्र पूर्वमास इति वाच्यं तथात्वे तदुत्तर मलमासपाते क्षयमासमृतस्य सप्तदशश्राद्धानुपपत्तेः। वस्तुतस्तु तत्रैव कपालाधिकरणन्यायविष
यो यत्र क्रमिकोपस्थितयोर्विकल्पयोः प्रथमोपस्थितस्य ग्रहणं अत्र त्वक्षयमे दे न क्रमिकोपस्थितेरभावात् कथं तदवसरः सच न्यायो दशमाध्याये चिन्तितो यथा वेष्टव्य एककपालइ

तिथ्युक्तौ कपालधर्म्माकांक्षायां आग्नेयाष्टाकपालो भवति अमावास्यायां पौर्णमास्यां चेति प्रकृतियागसंबन्धि कपालधर्म्मग्रहे यस्यकस्याप्येकस्य कपालस्य धर्म्मानुष्ठाने नोप
कारस्तद्वैकस्येत्याकांक्षायां प्रथमोपस्थितत्वेन प्रथमकपालधर्म्मानुष्ठानमिति न च तत्रापि तिथ्यार्द्धे प्रथमे पूर्वो द्वितीयार्द्धे तदुत्तरः मासाविति द्वौ श्चिन्त्यौ क्षयमासस्य मध्यगाविति
२० वाक्याद्व्यवस्था भविष्यतीति वाच्यं इदं वाक्यं दाक्षिणात्यसंग्रहकर्त्तैरेव । न तु मूले रिति । तत्र नास्था तथात्वे अष्टिदंडात्मिकायाः तिथेः परार्द्धस्य रात्रिपातित्वे परमासीयस्य पूर्वार्द्धस्य
रात्रिपातित्वे पूर्वमासीयस्याह्निकाश्राद्धादेर्लोपापत्तेः । किंच पूर्ववदुत्तराधिमासपातेक्षयमासीयतिथिपूर्वार्द्धे मृतस्य सप्तदशश्राद्धानुपपत्तिः स्यात् किंच वक्ष्यमाणकाठकश्रु
तौ सोऽनायतनरत्यान न मलमासस्य प्रतिनियतस्थानतया तदन्यस्य पौषादेः प्रतिनियतस्थानत्वं प्रतीयते तच्च पौषस्य मार्गशीर्षोत्तरत्वं माघपूर्ववर्त्तित्वमित्येवं अन्यत्रापि एक
स्याधित्वे तन्नियमभंगप्रसंग इति । अन्ये तु क्षयमासघटकानां त्रिंशत्तिथीनां पूर्वस्मिन्नर्द्धे पूर्वास्तु पंचदश तिथिषु पूर्वो मासः द्वितीयार्द्धे परास्तु नास्तु उत्तर इत्यर्थं मुक्ता शुक्लपक्ष २. म
मृतस्य पूर्वमासे कृष्णपक्षमृतस्य परेकृत्यमित्याहुः तदतीव मंदं धनुर्विषये पूर्वार्द्धे मार्गशीर्षकृष्णपक्षमृतस्य पौषशुक्लपक्षमृतस्य च कृत्यलोपप्रसंगात् पूर्ववदुत्तरमलमा
सपाते क्षयमासपूर्वार्द्धे मृतस्य सप्तदशश्राद्धानुपपत्तेश्च । अत्र केचित् । यस्मिन्मासि गते भानौ विपत्तिं यान्ति मानवाः । तेषां तत्रैव कर्त्तव्या पिंडदानोदकक्रिया इत्यादि वचनं क्ष
यमासमृततिथिविषयतया व्याख्याय तुलादौ क्षये तत्र मृतस्य सौरकार्त्तिकादावेव श्राद्धमित्याहुः तदपि तुच्छं तद्वासौ वर्षान्तरे तत्तिथ्यप्राप्तौ प्रत्याब्दिकश्राद्धलोपापत्तेः । यस्मिन्द्रा
शिगते भानावित्यादि आद्यसंवत्सरान्ताधिमासविषयं । अथ । श्राद्धविघ्ने समुत्पन्ने मृताहे विदिते तथा । एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः । इत्यत्र विदेशे भपरत्वमभ्युपेत्य एकादश्या

मेव। तत्रापि श्राद्धमिति चेन्न। विदितपदस्य ज्ञानलाभेऽभयपरत्वे वाक्यभेदापत्तेः विदितपदात् प्रयोगप्राचुर्य्याज्ज्ञातस्यैव प्रथमोपस्थितत्वात् तत्परतायामौत्सर्गिकत्वादिति वदन्ति।
वस्तुतस्तु लाभार्थस्य विदेर्निष्ठायामिट्प्रतिषेधात् प्रयोगानुपपत्तेरिति न च तिथ्यर्द्धे इति वाक्यं क्षयमासीयजन्ममरणमासमात्रव्यवस्थापकं न तु सर्वविषयकमिति वाच्यं अस्मिन्नर्थे
प्रमाणाभावात्। तस्यार्थत्वेपि मासद्वयघटकानां त्रिंशत्तिथीनां पूर्वार्द्धे शुक्लपक्षे पौर्णमास्यन्तमासस्य शुक्लपक्षीयतिथिकृत्यं। द्वितीयार्द्धे कृष्णपक्षे तादृशस्य परमासस्य कृष्णपक्षी-
यतिथिकृत्यमिति क्षयमासस्यापि मध्ये प्रकृतमासवत् मासद्वयमिति। ततश्च जीमूतवाहनोक्त एवं प्रकारः श्राद्धादौ युक्तः। अत एवात्र समयप्रकाशश्राद्धविवेकमैथिलसंग्रहका
रैरपि न किंचिदभिहितं ब्रह्मगुप्तलक्षणे त्वेकवर्षे संक्रान्तिशून्ययोर्मासयोरन्यतरस्य शुद्धत्वपातन्मासविहितकर्म्माहितायाः सर्वप्रामाणिकसिद्धत्वात् व्याप्तिः। यां तिथिं समनुप्रा
प्य इत्याद्युक्तयोग्यताविवक्षया तत्र समाधानमिति चेत् तर्हि व्यासवाक्येन तथा कल्पनायां सर्वसिद्धौ किमनार्षवाक्यादरेणेति दिक्। न च मेषादिस्थे सवितरि यो मासः पूर्य्यते चान्द्रः।
चैत्रादिः स तु विज्ञेयः पूर्त्तिद्वित्वेऽधिमासोऽन्त्यः। इति माधवाचार्य्यधृतज्योतिःशास्त्रोक्तलक्षणमादरणीयं। तथात्वे क्षयमासस्य परमासत्वे पूर्वमासलोपः स्यात् मिथुनादौ मलमासे।
मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत्। द्विराषाढः स विज्ञेयः शेते तु श्रावणे च्युत इत्याद्युक्तद्विराषाढादित्वानुपपत्तिः स्यात् प्रत्युत द्विर्ज्येष्ठत्वापत्तिर्भवति तस्मादाधुनिक
ज्योतिर्वाक्यं प्रागुक्तव्यासवचनविरोधादश्रद्धेयं। प्रायिकत्वाभिप्रायेण वर्णनीयं चेति क्षयमासलक्षणमाह तु ज्योतिःसिद्धान्तभौमपराक्रमे। असंक्रान्तमासो ह्यधिमासः स्फुटः स्यात्
द्विसंक्रान्तमासः क्षयाख्यः कदाचित्। क्षयः कार्त्तिकादित्रये नान्यदा स्यात् तदा वर्षमध्येऽधिमासद्वयं स्यात् असंक्रान्तत्वेनैवाधिमासस्य द्वित्वं वस्तुतस्त्वेकस्य मलमासत्वमपर

स्य भानुलंघितत्वं पूर्वोदर्शितं काठकगृह्यमीमपराक्रमवचनैरुन्नेयमिति । तदयं संक्षेपः ॥ १० ॥ शुक्लप्रतिपदादिरमावास्यान्तो रविलंघितो मासो मलमासः स च माधवादौ औत्सर्गिकः
२१ कदाचित्कार्त्तिकादावपि अयं चानिष्टकृत् माधवादिकार्त्तिकादिषट्कयोरपि तल्लक्षणयोगे माधवादावेव तुलादिषट्क एव उभयमासे तल्लक्षणयोगे पूर्वस्य माधवादिषट्कस्य एव आ
श्विनवैशाखयोस्तल्लक्षणायोगे परस्य मलमासः । तद्भिन्नस्तु भानुलंघितः मलमासे आषाढादेर्द्वित्वं भानुलंघिते तु नैतदिति विस्तरः । यत्तु यस्मिन्मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा म
लमासः स विज्ञेयो मासे त्रिंशत्तमे भवेत् इति काठकगृह्ये द्विसंक्रान्तमासस्य क्षयापरपर्यायस्य मलमासत्वाभिधानं तदेकमात्रसंक्रान्तिरहितत्वरूपगुणयोगाद्गौणं मलमासत्वं वि
वाहाद्यनर्हतार्थं । तथा च बार्हस्पत्यज्योतिर्ग्रन्थे । एकत्र वर्षेऽधिकमासयुग्मे यत्कार्त्तिकादित्रये क्षयाख्ये तद्वर्जनीयं नितरां प्रयत्नाद्विवाहयज्ञोत्सवमंगलेषु । यस्मिन्मासे न सं
क्रान्तिः संक्रान्तिद्वयमेव वा । संसर्पांहस्पती मासाश्च निन्दिताः संसर्पो संक्रान्तत्वेनाधिमासवत् कर्मानर्हतया तदपवादेन सोऽगस्त्येतरवैदिककर्मार्हः सन् संसर्पतीति मा २१ म
धवाद्यर्थः । अंहसः पापस्य पतिरिति तन्नथेति संसर्पांहस्पती भानुलंघितक्षयमासयोर्नामनी । कठशाखाश्वलायनगृह्यपरिशिष्टे अर्द्धमासौ वै अधस्तात्सक्तो कामयन्त
मासाः स्याम इति । ते द्वादशाहं क्रतुं उपायन् त्रयोदशं ब्राह्मणं कृत्वा तस्मिन्नंहसो उदतिष्ठन् तस्मात् सोऽनापतन इतरानुपजीवतीति तस्माद्द्वादशाहस्य त्रयोदशब्राह्मणेन भवितव्य
मिति । अस्यार्थः जयस्वामिना व्याख्यातः । तेऽधिमासस्त्रयोदशं मलमासे ब्राह्मणं कृत्वा द्वादशाहं क्रतुं उपानयन् कृतवन्तः । तस्मिन्मलमासे अंहसः समयाप्य किमित्याकांक्षायां
अरातीरित्यध्याह्रियते अरातीः पापानि सम्मार्ज्य उदतिष्ठन् पापभावशून्या उत्थिता भवन्तीत्यर्थः । तत्र पापनिर्मार्जनार्थवादात् संभवत्कालोत्तरं कर्म तत्र न कर्त्तव्यं न तु निरवकाशमपि

अर्थवाधाद्यधिकरणन्यायाः प्रतीताबाधेनौचितत्वात् अतो नित्यनैमित्तिकशान्तिकादेर्मलमासेन पर्य्युदासः सोऽमायतन इतिनाप्यस्य चैत्रादिवत् प्रतिनियतस्थानत्वमित्यर्थः ।
इतरानुपजीवतीति मासान्तरेषु चन्द्रक्षयवृद्धिभ्यां तस्योपजीवनात् आश्वलायनब्राह्मणं प्राच्यां दिशि वै देवाः सोमं राजानमक्रीणन् तस्मात्प्राच्यां दिशि क्रीयते । त्रयोदशान्मासाद
क्रीणन् तस्मात्त्रयोदशो मासो नानुविद्यते पापो हि सोमविक्रयीति अस्यार्थः यतोऽधिमासः सोमविक्रयी अतोऽसौ इतरमासवन्नानुविद्यते विद्यमानोऽपि कर्म्मानङ्गत्वादसन्नित्यर्थः । सो
विक्रय्यपि श्मातिगन्तरवत् कर्म्मानङ्गत्वान्न विद्यते इत्यर्थः । अतएव पैठीनसिः श्रौतस्मार्त्तक्रियाः सर्वा द्वादशे मासि कीर्त्तिताः । त्रयोदशे च सर्वास्ता निष्फला इति कीर्त्तिताः । तस्मात्त्र
योदशे मासि कुर्य्यात्तान कथंचन । कुर्वन्नरकमाप्नोति कुर्य्यादात्मविनाशनं । द्वादशे प्रकृते त्रयोदशे मलमासे अत्र यन्मलमासस्य त्रयोदशत्वमुक्तं तदगत्या युगक्रमगणनेन प्रकृतस्यै
व त्रयोदशत्वं स्वाभाविकं । तथाच क्वचित्त्रयोदशोऽपि स्यादाद्यं हन्त्वानुवत्सरमिति गृह्यपरिशिष्टं । मलं वदन्ति कालस्य मासं कालविदोऽधिकं । न हेताच विशेषेज्यां अन्यत्रावश्यका
द्विधे । विशेषेज्यां वै शाखाद्युक्तेरवेन विहितयागं आवश्यकान्निरवकाशात् तथाच कालमाधवीये काठकगृह्ये । महालयाष्टकाश्राद्धे उपाकर्म्मादिकर्म्मयत् स्पष्टमासविशे
षाख्यविहितं वर्जयेन्मले । स्पष्टमासविशेषेति चैत्रवैशाखाद्युक्तेरवेनमित्यर्थः ॥ ० ॥ अथ दीक्षाकालः ॥ सा च मलमासे न कार्य्या यथागस्त्यसंहितायां । यदा दद्याति संतुष्टः
प्रसन्नवदनो मनुं । अयमेव तथा चैव मिति कर्त्तव्यताक्रमः । विशुद्धकालदेशेषु शुद्धात्मा नियतो गुरुः । सेकस्योपोष्यकर्त्तव्यं अंकुरारोपणं ततः कुर्य्यान्नान्दीमुखश्राद्धमा
दौ च स्वस्तिवाचनं । स्वगृह्योक्तप्रकारेण तद्देवद्विदधीत वै । मधुमासे भवेद्दुःखं माधवे रत्नसंचयः । मरणं भवति ज्येष्ठे आषाढे बंधुनाशनं । सन्तुष्टिः श्रावणे नूनं भवेद्भाद्रपदे क्षयः ।

प्रजानां च क्षेमाणि सर्वतः शुभमेव हि । ज्ञानं स्यात् कार्त्तिके सौख्यं मार्गशीर्षे भवत्यपि । पौषे ज्ञानक्षयो माघे भवेन्मेधाविवर्द्धनं । फाल्गुणेपि विद्दद्धिः स्यान्मलमासं विवर्जयेत् । गुरौ रवौ
२२ दिने सोमे कर्त्तव्यं बुधशुक्रयोः । अश्विनी भरणी स्वाती विशाखा हस्तभेषु च । ज्येष्ठोत्तरात्रयेष्वेवं कुर्यान्मंत्राभिषेचनं । शुक्लपक्षे च कृष्णे वा दीक्षा सर्वेषु खावहा । पूर्णिमा पंचमी चैव द्वि
तीया सप्तमी तथा । त्रयोदशी च दशमी प्रशस्ता सर्वकामदा । पंचांगशुद्धदिवसे सोदये शशितारयोः । गुरुशुक्रोदये शुद्धलग्ने द्वादशशोधिते । चन्द्रतारानुकूले च शस्यते सर्वकर्मणि । सूर्य=
ग्रहण कालेन समानो नास्ति कश्चन । तत्र यद्यत् कृतं सर्वमनन्तफलदं भवेत् । न मासतिथिवारादि शोधनं सूर्यपर्वणि । ददाति चेद् गृहीतं यत्तस्मिन् काले गुरोर्न्नृप । सिद्धिर्भवति मंत्रस्य
विना मासेन सेव्यतः । मनुं मंत्रं ग्रं गुरारोपणा मागम प्रसिद्धं विशुद्धकालत्वं दर्शयति मधुमास इत्यादि । पंचांगशुद्ध दिवसे तिथिवारलक्षत्रकरणयोगशुद्धदिवसे । तथा च महा २२ म
कपिलपंचरात्रे । एवं नक्षत्रतिथ्यादौ योगे करणवासरे । मंत्रोपदेशो गुरुणा साधकस्य शुभावहः । सोदये शशितारयोर्जन्मचंद्रायनतारयोः । आनुकूल्यसहित गुरुशुक्रोदये
गुरुशुक्रानस्तसमये । एतत्तु सप्तम यशुद्ध्यन्तरोपलक्षणं । द्वादश शोधिते द्वादशांश शोधिते । ज्ञानमालायां । रविसंक्रमणे चैव सूर्यस्य ग्रहणे तथा । तत्र लग्नादिकं किंचिन्न विचा
र्यं कथंचन । तत्वसागरे । यदैव ज्ञानदा दीक्षा गुरोराज्ञानुरूपतः । न तिथिर्न व्रतं होमा न स्नानं न जपक्रिया । दीक्षायां कारणं किन्तु स्वेच्छावाप्ते तु सद्गुरौ । सद्गुरौ सिद्धमंत्र गुरौ । दीपिकायां । ध्रुवम
ृदुलक्षगगतो रविशुक्रवासरे सतिथौ दीक्षा स्थिरलग्ने शुभे चन्द्रे केन्द्रकोणे शुभे गुरौ धर्मे । ध्रुवानि त्रिणुत्तराणि रोहिणी चन्द्रदूनि चित्रानुराधा मृगशिरो रेवत्यः केन्द्रं लग्नचतुर्थस
प्तदशाकं कोणं नवपंचमं धर्मो नवमे । वीरतंत्रे । रोहिणी श्रवणा चार्द्रा धनिष्ठा चोत्तरात्रयं । पुष्यः शतभिषा चैव दीक्षा नक्षत्रमीष्यते । अर्कोहस्ता रत्नावल्यां । योगश्च प्रीतिरायुष्मान सौ

भाग्यः शोभनो धृतिः । वृद्धिर्ध्रुवः सुकर्म्मा च साध्यः शुक्लश्च हर्षणः । वरीयांश्च शिवः सिद्धो ब्रह्मा ऐन्द्रश्च षोडश ॥ तथा शुभानि करणानि स्युर्दीक्षायान्तु विशेषतः । शकुन्यादीनि विष्टिं च
विशेषेण विवर्जयेत् । शकुन्यादीनि शकुनिनागचतुष्पदकिंस्तुघ्नानि । कृष्णपक्षे चतुर्दश्यां पूर्वं पञ्चदिने तथा । कृष्णकृष्णपक्षे कालोत्तरे भूतिः कामः शिते तथा ॥ अथ दीक्षायां प्रतिप्रसवः ॥ ० ॥
राघवभट्टधृतसारसंग्रहे । शिष्यद्विजन्मदिवसे संक्रान्त्यां विषुवायणे । सत्तीर्थे कि विधुग्रासे तन्तुदामनपर्वणोः । मन्त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत् । तन्तुपर्व परमेश्वरोपवीतदानतिथिः
श्रावणीपौर्णमासी दामनपर्व दमनभञ्जनतिथिश्चैत्रशुक्लचतुर्दशी । वामाचारदीक्षा दूषयति । कूर्म्मपुराणे देवीवाक्यं । यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च । श्रुतिस्मृतिविरुद्धा
नि निष्ठा तेषां हि तामसी । कापाले भैरवं चापि यामलं वाममार्हतं । एवंविधानि चान्यानि मोहनार्थानि तानि तु । मया सृष्टानि चान्यानि मोहायैषां भवार्णवे । तस्मात् सद्भिः श्रुतिस्मृतिविरुद्ध
वर्त्मनि पदं न न्यस्तव्यं देवीपुराणे आर्य्यादिदुष्टमंत्र प्रतीकारस्तु । एषु दोषेषु सर्वत्र मायां कामं तथापि वा । क्षिप्त्वा वादौ श्रियं दद्या देवदूषणमुक्तये । तारसंपुटितो वापि दुष्टमंत्रोऽपि
सिद्ध्यति । यस्य यत्र भवेद्भक्तिः सोऽपि मंत्रोऽस्य सिद्ध्यति । भुवनेशी पारिजाते पि । मायाबीजसमायुक्तः क्षिप्रं सिद्धिप्रदो भवेत् । पिण्डस्तु केवलो मंत्रो मायाबीजोज्ज्वलीकृतः । मायाबीजा
द्भवेत् प्राणो बीजं चैतन्यवीर्य्यवत् । नारायणीये । यदृच्छया श्रुतं मंत्रं छलेनापि हृतेन वा । पत्रेक्षितं वा गाथां च तदुत्पत्त्वनर्थकृत् । प्रविश्य विधिवद्दीक्षामभिषेकावसानिकां । श्रुत्वा तं
त्रं गुरोर्लब्धं साधयेदीप्सितं मतं । अन्यत्रापि । देशिकानुग्रहेणैव देवताव्यक्तरूपिणी । गुर्वनुज्ञाः क्रियाः सर्वा निष्फलास्युर्यतो ध्रुवं । शारदीये । कुर्वन्नाचार्य्यशुश्रूषां मनोवाक्कायकर्म्मभिः
शुद्धभावो महोत्साहो बोद्धा शिष्य इति स्मृतः । न तु पदेस्य पुत्रश्च व्यत्ययीवस्तु दस्तथा । प्रयोगसागरे ॥ तत्रापि भक्तिपुत्राय पुत्राय वस्तु दाय च । अन्यत्रापि यथा देवे तथा मंत्रे यथा मंत्रे तथा गुरौ

यथा गुरौ तथा स्वात्मन्येवमुख्यक्रमः स्मृतः। पिंगलामते। नाध्यातो नार्चितो मंत्रः स्वासिद्धोपि प्रसीदति। नाजन्यः सिद्धिदाने ह्येनाहूतेः फलदो भवेत्। पूजाहोमौ जपो ध्यानं तथा कर्मैव तद्ध
२३ ये। प्रत्यहं साधकः कुर्यात्स्वयं चेत्सिद्धिमिच्छति। महेश्वरोत्तरे। हीनाचारव्रतो मंत्री ज्ञानवानस्तु समाहितः। ब्रह्मनिष्ठो यतिः ख्यातो गुरुः स्याज्ज्योतिकोपि च। एतानि राघवभट्टधृतानि॥
अथ स्त्रीशूद्रयोः प्रणवादिमंत्रनिषेधः। नृसिंहतापनीये। सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयो नेच्छन्ति सावित्रीं प्रणवं यजुर्लक्ष्मी यदि स्त्रीशूद्रो जानीयात् स मृतोऽधो गच्छतीति। ने
च्छन्तीति पर्यन्तं पराशरमाधवेपि। गोविन्दभट्टधृतं। स्वाहाप्रणवसंयुक्तं शूद्रे मंत्रं ददद्द्विजः। शूद्रो निरयमाप्नोति ब्राह्मणः शूद्रतामियात्॥ अथ दीक्षितस्याशौचकाले पि जपाधिकार
माह मंत्रमुक्तावल्यां। जपो देवार्चनविधिः कार्यो दीक्षान्वितैर्नरैः। नास्ति पापं यतस्तेषां सूतकं वा यतात्मनां। इति राघवभट्टधृतनारदवचनं। अथ सूतकिनः पूजां वक्ष्याम्यागमचो
दितां। स्नात्वा नित्यं च निर्वर्त्य मानस्या क्रियया तु वै। बाह्यपूजां क्रमेणैव ध्यानयोगेन पूजयेत्। यदा कामी न चेत् कामी नित्यं पूर्ववदाचरेत्। यत्तु नारसिंहकल्पे सदा मंत्रं जपन्मंत्री य २३ म
दि स्यादशुचिस्तत्र स्मरेन्मंत्रं न तूच्चरेत्। मनो हि सर्वजन्तूनां सर्वदैवाशुचिः स्मृतं। तन्मूलोच्चाराघशौचपरं॥ रामार्चनचन्द्रिकाधृतमंत्रोत्तरे। अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन्स्वप
न्नपि। मंत्रैकशरणो विद्वान् मनसैव सदाभ्यसेत्॥ ०॥ अथाशौचेपि विष्णुकीर्तनं॥ ०॥ यथा चक्रायुधस्य नामानि सदा सर्वत्र कीर्तयेत्। नाशौचं कीर्तने तस्य स पवित्रकरो य
तः॥ ०॥ संवत्सरप्रदीपे॥ न देशनियमस्तत्र न कालनियमस्तथा। नोच्छिष्टादौ निषेधोस्ति हरेर्नामानि लुब्धक। तेनाशुचिर्देवर्षि पितृनामानि न कीर्तयेत्। इति विष्णुनामाति
रिक्तपरं॥ ०॥ अथ मलमासे विवाहादिनिषेधः॥ ०॥ यथा भीमपराक्रमे। अधिमासे विवाहं चूडां यात्रां तथोपनयनादि कुर्यात्तत्र सावकाशं मंगल्यं न तु विशेषेज्यां। अत्र विवाहादि

कीर्त्तनं निरवकाशत्वेपि निषेधार्थः। अन्यथा सावकाशमित्यनेनैव सिद्धेः सावकाशं च संभवत् कालान्तरं कर्म्म अतो निरवकाशस्यानन्यगतिकस्य प्रतिप्रसवोऽधात् सूचितः। तथा
च मलमासाधिकारे काठकगृह्यं। कालेनन्यगतिं नित्यां कुर्य्यान्नैमित्तिकीं क्रियां। बृहस्पतिः। नित्यनैमित्तिके कुर्य्यात् प्रयतः सन्मलिम्लुचे। तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च॥
नित्यं अहरहः पुरस्कार विहितं स्नानसन्ध्यापंचमहायज्ञादि काम्यमपि तथाविधं संकल्पितं। यत्किंचिद्द्रव्यदान शिवपूजादि। व्यक्तं भविष्ये। कुर्य्यात् प्रात्यहिकं कर्म्म प्रयत्नेन मलि
म्लुचे। नैमित्तिकं च कुर्वीत सावकाशन यद्भवेत्। न च नित्यपदं यदकरणे प्रत्यवायस्तत्परं। तथात्वे गजच्छाया प्रेतश्राद्धयोरुपादानं व्यर्थं स्यात्। तथा च कालमाधवीये मत्स्यपु
राणे। वर्षे वाहरहः श्राद्धं दानं च प्रतिवासरं। गोभूतिलहिरण्यानां मासेपि स्यान्मलिम्लुचे। एवं च दातव्यं प्रत्यहं यावन्निमित्तेषु विशेषतः। इति याज्ञवल्क्योक्तं संगच्छते काठकगृ
ह्यपरिशिष्टं। प्रवृत्तं मलमासात् प्राक् यत्कर्म्म न समापितं। आगते मलमासेपि तत्समाप्यं न संशयः। ब्रह्मसिद्धान्ते। आरब्धं कर्म्म यत् किंचित्तत्समाप्यं मलिम्लुचे। नैमित्तिकं
मासदिनवत्सरादि विशेषनियमशून्यावश्यकर्त्तव्यं। कादाचित्कनिमित्तोत्पन्नं। अत एव आचार माधवीये बौधायनेनास्यागन्तुकत्वेनोपादानं अकरणे दोषाभिधानं च कृतं
यथा। यस्य नित्यानि लुप्तानि तथैवागन्तुकानि च। विपन्नस्तोपि न स्वर्गं गच्छत्यपतितो हि सः। तत्राभ्युदयिकादि। नैमित्तिकमथो वक्ष्ये श्राद्धमभ्युदयार्थिकं। पुत्रजन्मनि तत्का
र्यं जातकर्म्मसमं नरैरिति मार्कण्डेयपुराणात्। जातकर्म्मसमनित्युपादानात् नाडीछेदात् प्रागपि कर्त्तव्यतोक्ता। अभ्युदयार्थं अभ्युदयप्रयोजनकं तथा च शातातपः। पूर्वाह्णे दै
विकं श्राद्धं कार्य्यमभ्युदयार्थिना। तेनात्रात्म शब्दप्रयोगो भ्रान्तानामिति। जातकर्म्मायपि मलमासे कार्य्यं। जातकर्म्मान्त्यकर्म्माणि नवश्राद्धं तथैव च। मघात्रयोदशी श्राद्धं श्राद्ध।

त्यपि च षोडश । चंद्रसूर्य्यग्रहस्नानदानं श्राद्धं जपादिकं । कार्य्याणि मलमासेपि नित्यं नैमित्तिकं तथेति । हेमाद्रिमाधवाचार्य्यधृतयमवचनात् । मघात्रयोदशीश्राद्धस्य मलमासकर्त्त
२५ व्यतापो निरवकाशत्वेबीजं । तद्वदीयमासान्तरे तदलाभात् । यत्तु गार्ग्यवचनं । नामान्नप्राशनं चौडं विवाहं मौंजिबंधनं । निःक्रमं जातकर्मापि काम्यं वृषविसर्जनं । अस्तंगते गुरौ शु
क्रे बालवृद्धे मलिम्लुचे । उपायनमुपारंभं व्रतानां नैव कारयेत् । उपायनं प्रतिष्ठा । तन्नामकरणान्नप्राशननिष्क्रमजातकर्म्मणां प्रधानकालाद्यनाते वेदितव्यं तदाह सत्य । ना
मकर्म च जाते पि यथाकालं समाचरेत् । अतिपाते तु कुर्वीत प्रशस्ते मासि पुण्यदे । कालमाधवीये स्मृतिः । श्राद्धजातकनामानि येच संस्कारमाश्रिताः । मलिम्लुचे पि कर्त्तव्याः का
म्याः इष्टीश्च वर्जयेत । संस्कार अन्नप्राशननिष्क्रमाद्या इति माधवाचार्य्यः । अन्त्यकर्म्माणि वहनदहनउदकदानपिंडदानास्थिसंचयनादीनि नवश्राद्धं चतुर्थे पंचमे चैव नव
मैकादशे तथा । यदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते । इति यमोक्तं अत्र चतुर्थादिग्रहणं नरणादिनावधीति षोडशश्राद्धानि तु द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा । सपिंडी २४ म
करणं चैव प्रेतश्राद्धानि षोडश इति कर्म्मप्रदीपोक्तानि । नतु मलमासे द्वातेपि सपिंडीकरणोक्तिरिति प्रवृत्ते मासि प्रतिसांवत्सरिकं श्राद्धं न क्रियते इति चेन्न । पूर्णे संवत्सरे श्राद्धं -
षोडशं परिकीर्त्तितं । तेनैव च सपिंडत्वं तेनैवाब्दिकमिष्यते । इति हेमाद्रिधृतवचनात् सद्यकृते कृतः शास्त्रार्थ इति न्यायाच्च एवमपकृष्यकृते सपिंडीकरणेऽन्तराहे प्रत्याब्दिकं न क्रि
यते । सपिंडीकरणेनैव प्रत्याब्दिकसिद्धेः । अतएव याज्ञवल्क्यः । मृताहनि तु कर्त्तव्यं प्रतिमासन्तु वत्सरं । प्रतिसंवत्सरं चैवमाद्यमेकादशेहनि इति । प्रतिसंवत्सरं श्राद्धं कर्त्तव्यमिति
सामान्येनोक्तं । नैकोद्दिष्टादिविशेषणं साम्यादिभेदेन श्राद्धस्यनानात्वात् एतेन सपिंडीकरणापकर्षपक्षे वर्षान्ते सांवत्सरिकश्राद्धं कार्य्यं वाधकाभावादिति श्रीदत्तवाचस्पति

मिश्रोक्तं निरस्तं । बालग्रह भूतग्रह नराधिपप्रबलतरशत्रु दुःसहरोगाभिभवाद्भुत दुःस्वप्नग्रहदोषाद्यादिनैमित्तिकं शान्तिकर्म्मापि मलमासे कर्त्तव्यं विष्णुना । शान्तिस्वस्त्ययनैर्दैवो
पघातान्शमयेत् परचक्रोपघातं श्चेत्युक्तं अतो मलमासेपि कर्त्तव्यत्वं शुद्धकाल प्रतीक्षायां असहत्वेन नान्यगतिकत्वात् अतएव आत्मानं सततं गोपायीतेति श्रुतौ सततमित्यु
क्तं । ग्रहदोषस्य फलमाह मार्कण्डेयपुराणं । दुष्टेगोष्ठेषु भृत्येषु सहृत्सु तनयेषु च । भार्य्यायां च ग्रहे दुष्टे भयं पुराय वतोन्नृणां । आत्मन्येवाल्पपुरायानो सर्वत्रैवातिपापिनां । नैकत्रापि हि
पापानां नाशाणां जायते भयं । तदयमर्थः । यस्य दीर्घजीवनादिजनकं बलवत्पुण्यमस्ति । तेन मरणोन्मुखमपि दुष्कर्म्म प्रतिहन्यते तत्प्रतिहतं यत्र तत्र पुत्रादेस्तत् प्रतिघातकं पुराय
नास्ति प्रत्युत तदनुगुणं पापमस्ति तच्च तं हत्वा तत् पित्रादेः पीडाभाव हतीति वहूच गृह्य परिशिष्टं । यथा शस्त्र प्रहाराणां कवचं विनिवारकं । एवं दैवोपघातानां शान्तिर्भवति वारणं ।
शान्तिर्धर्म्मद्वारा ग्रहदोषस्य दुःस्वप्नादि सूचितैहिकानिष्ट हेतु दुरितनिवृत्तिः । स्वस्तिधर्म्मद्वाराऽभिप्रेतार्थसिद्धिः तस्यायनं प्रापकं यागदानादि मंगल हतु गोरोचनादि धारणं ।
आशीर्निमित्तभूताद्विवादनानि च यथाकल्पतरौ यमः । अभिवादयतः पूर्वं आशिषं न प्रयच्छति । दुष्कृतं यद्भवेत्तस्य तस्मात्भागं प्रपद्यते । तस्मात्पूर्वाभिभाषी स्यात्चांडालस्यापि
धर्म्मवित् । स्तुरोपिवेतिवक्तव्यमेवं धर्म्मो न लुप्यते स्वस्तीति ब्राह्मणो ब्रूयादायुष्मानिति राजनि । वर्द्धतामिति वैश्येषु शूद्रे त्वारोग्यमेव च । स्वस्तीति प्रत्यभिवादने तरपरं मन्वादि
विरोधात् । यथा मनुः । आयुष्मान भव सौम्येति द्विजः प्रत्यभिवादने । यत्तु रवेत्रिषु लोकेषु व्याधिव्यसनवर्जितं । यस्मिन्सर्वे स्मृताः कामाः स्वास्वस्तीत्यभिसंगिताः । आशिषः प्रकृ
तत्वात स्वास्याशीः । अंगिराः । अप्रणामगते शूद्रे स्वस्ति कुर्वन्ति ये द्विजाः । शूद्रो पेन रकं याति ब्राह्मणास्तदनन्तरं । ब्राह्मणा स्त्यत्तु हन्नौ मिताक्षरायां हारीतः । क्षत्रियस्याभिवादने होरा त्तमुपवसेत्

एवं वैश्यस्यापि शूद्रस्याभिवादने त्रिरात्रमुपवसेदिति। अत्र च मन्वन्तरोक्त विप्रदर्शकनमस्काररूपलघुप्रायश्चित्तन्तु प्रमादादिविषयं नमस्कारविषयं मत्वा यथा मनुः। यदि विप्रः प्रमादे
२५ न शूद्रं समभिवादयेत्। अभिवाद्य द्विजो विप्रः स्नातः पापात् प्रमोचयेत्। स्मृतिः। मातुः पितुः कनीयांसं ननमेद्वयसाधिकः। नमस्कुर्याद्गुरोः पत्नीं भ्रातृजायां विमातरं। स्मृत्यर्थसारे स्त्रियो
नमस्या वृद्धाश्च वयसा पत्युरेव ता। अथाश्वत्थवंदने हलायुधधृतं॥ ओं चक्षुःस्पन्दं भुजःस्पन्दं तथा दुःस्वप्नदर्शनं। शत्रूणां च समुत्थानं अश्वत्थ शमयाशु मे। अश्वत्थरूपी भगवान् प्री
यतां मे जनार्दनः इति। शान्तिस्वस्त्ययनयोः शूद्रस्याधिकारः। तथा चापि लिकारिकायां स्मार्त्तं शूद्रः समाचरेदिति वचनं भविष्यपुराणे च। चतुर्णामेव वर्णानां यानि प्रोक्तानि श्रेयसे।
धर्मशास्त्राणि राजेन्द्र शृणु तानि नृपोत्तम। विशेषतस्तु शूद्राणां पावनानि मनीषिभिः। अष्टादश पुराणानि चरितं राघवस्य च। रामस्य कुरुशार्दूल धर्मकामार्थसिद्धये। यथोक्तं भा
रते वीर पाराशर्य्येण धीमता। वेदार्थं सकलं योज्य धर्मशास्त्राणि च प्रभो। तस्य संस्कारमाह यमः। शूद्रोऽप्येवंविधः कार्यो विनामंत्रेण संस्कृतः। न केनचित् समसृजत् छंदसा तं प्रजापतिः। २५ मल
ब्रह्मपुराणे। विवाहमात्रं संस्कारं शूद्रोऽपि लभतां सदा। मात्रशब्दो च न विवाहेतरसंस्कारनिवर्त्तकः। किन्त्वत्र मंत्रसंबंधनिषेधपरः यमवचने। गर्भाधानादिसंस्कारप्रतिपादनादिति
शूलपाणिमहामहोपाध्यायाः। आर्यकर्मणा सर्वत्र शूद्रा वाजसनेयिन इति महाजनपरिगृहीतवचनात् यजुर्वेदविधिनैव कर्म कुर्युः। पुराणमाह विष्णुपुराणे। अष्टादश पुराणा
नि पुराणज्ञाः प्रचक्षते। ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा। तथान्यन्नारदीयं च मार्कंडेयं च सप्तमं। आग्नेयमष्टमं चैव भविष्यं नवमं स्मृतं। दशमं ब्रह्मवैवर्तं लैङ्गमेकाद
शं तथा। वाराहं द्वादशं चैव स्कांदं चात्र त्रयोदशं। चतुर्दशं वामनं च कौर्मं पंचदशं तथा। मात्स्यं च गारुडं चैव ब्रह्मांडं च ततः परं। पुराणान्यभिधाय कौर्म्मे। अन्यान्युपपुराणानि मुनिभिः

कथितान्यपि। तानपि नरसिंहनन्द्यादित्यकालिकापुराणादीति यथा आद्यं सनत्कुमारोक्तं नारसिंहमतःपरं। तृतीयं वायवीयन्तु कुमारेणाच भाषितं। चतुर्थं शिवधर्माख्यं सा
क्षान्नन्दीश भाषितं। दुर्वाससोक्तमाश्चर्य्यं नारदीयमतःपरं। नन्दिकेश्वरयुग्मं च तथैवोशनसेरितं। कपिलं वारुणं चैव कालिका ह्वयमेव च। माहेश्वरं तथा पाद्मं देवं सर्वार्थसाधकं।
पराशरोक्तमपरं मारीचं भास्कराह्वयं। देवं देवीपुराणं तेन द्विजाति विहितविशेषकर्मेतरसकलस्मार्त्तकर्मणि शूद्रस्याप्यधिकारः। अतएवाश्वमेधिके पर्वणि अहिंसकः शुभाग वो
देवताद्विजपूजकः। शूद्रो धर्मफलैरिष्टैः स्वधर्मेरेव युज्यते। अतएव शूद्रा वृत्तो मनुः। धर्मेप्सवस्तु धर्मज्ञः सतां वृत्तिमनुष्ठिताः मन्त्रवर्ज्जं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च। ये पुनः शूद्रा
स्वधर्मवेदिनो धर्मप्राप्तिकामास्त्रैवर्णिकाचारमनिषिद्धमाश्रिता लक्ष्यमाणनमस्कारमंत्रेतरमंत्ररहितकर्म्म कुर्वाणान प्रत्यवायिनः ख्यातिभाजश्च भवन्ति एवमेव कुत्सुकाभद्रः। तथा
धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः। तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः। तथा शक्तेनापि हि शूद्रेण न कार्यो धनसंचयः। शूद्रो हि धनमासाद्य ब्राह्मणानेव वाधते। शूद्रस्यापि पूर्त्ता
धिकारमाह याज्ञवल्क्यः। वापीकूपतडागादि देवतायतनानि च। अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते। आरामः पुष्पफलोपचयपरहुतर्भूभागः। अग्निहोत्रं तपः सत्यं वेदानां चानुलेपनं।
आतिथ्यं वैश्यदेवं च इष्टमित्यभिधीयते। ग्रहोपरागे यद्दानं पूर्त्तमित्यभिधीयते। इष्टापूर्त्तं द्विजातीनां धर्मः सामान्यमुच्यते। अधिकारी भवेच्छूद्रः पूर्त्ते धर्मे न वैदिके। वैदिके वेदाध्यापनसाध्ये
अग्निहोत्रादावपि रत्नाकरः। एवं स्त्रीणामपि पूर्त्ताधिकारः यथा नारीत्यनुद्दिष्टो बृहस्पतिः। पितृव्यगुरुदौहित्रान् भर्त्तुः स्वस्रीयमातुलान्। पूजयेत् कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रियः। एतेन ज
लाशयोत्सर्गे गौरवतारानुमंत्रयोर्यजमानकर्तृको मंत्रपाठः। तत्रामंत्रकतया स्त्रीशूद्रयोरणाधिकारेण तद्वृत्तियोगेप्यनधिकारः। विशेषोपदेशविवाहादिद्वैतनिर्णयोक्तं निरस्तं अतएव जलाश

योत्सर्गा ग्रहयागदेवीहोमादि समाचरन्ति। तत्र होमोवह्नौ नसाक्षात्कल्पतरुरत्नाकरधृतापस्तम्बवचनात् तद्यथाक्षारलवणाद्युपक्रम्य तच्छुतमकृतं चाग्नौ नस्त्रीशूद्रयात नानुपेतर
२६ ति अनुपेतोऽनुपनीतः किंतु ब्राह्मणद्वाराकरणीयः। श्रौतस्मार्त्तक्रियाहितो ह्युपयाद्वृत्विजं पुनरिति याज्ञवल्क्योक्तः। स्त्विग्वादेनियुक्तश्च सम्यौसम्परिकीर्तितौ। यज्ञेस्वाम्या प्रयुयात्प्रयत्ने ह्या
निं वादेथवाजयमिति बृहस्पत्युक्तेः। वैदिकेतरमंत्रपाठे शूद्रादेरप्यधिकारः वेदमंत्र वर्जं शूद्रस्येति छंदोगाह्निके वेदेति विशेषणात्। शूद्रप्येवंविधः कार्य्यो विना मंत्रेणसंस्कृतः। नकेनचि
त् समसृजत् छंदसा तं प्रजापतिरिति यमस्मृतौ छन्दसा वेदेनेति श्रुतेश्च। तं शूद्रं पुराणमधिकृत्य एवं च अध्येतव्यं न चान्येन ब्राह्मणं क्षत्रियं विना। श्रोतव्यमिह शूद्रेणानाध्येतव्यं कथं
चन इति भविष्य वचनं मंत्रेतरपरं। पंचयज्ञस्नानश्राद्धेषु वैदिकेतरमंत्रोपि निषिद्धः शूद्रमधिकृत्य नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेदिति याज्ञवल्क्येन। ब्रह्मक्षत्रविशामेव मंत्रव २६ ग
त्स्नानमिष्यते। तूष्णीमेव हि शूद्रस्य स नमस्कारकं मतं। इति योगियाज्ञवल्क्येन श्राद्धमधिकृत्य प्रयमेव विधिः प्रोक्तः शूद्राणां मंत्रवर्जितः। अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृह्यते। इति
वराहपुराणीये नच नमस्कारे णेति तूष्णीमिति मंत्रवर्जमित्यभिधानात्। अभियुक्तानां मंत्रोयमिति समाख्यानं मंत्रलक्षणमिति माधवाचार्य्यः। एवं च श्रावयच्चतुरो वर्णान् कृत्वा ब्राह्मण
मग्रतः वेदस्याध्ययनं हीदं तच्च कार्य्यं महत्स्मृतं इति मोक्षधर्म्मोक्तं वेदस्य श्रावणं शूद्रस्याप्येतद्विषयं विधिमाह भविष्ये। ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात्। श्रुत्वान्यव
र्णजाद्राजन् वाचकान्नरकं व्रजेत्। तथाग्रे याथं बुध्यमानस्तु समस्तं कृत्स्नशोन्टप। ब्राह्मणादिषु वर्णेषु अर्पयेद्विधिवन्नृपः। य एवं वाचयेद्राजन् स ज्ञेयः सात्विको बुधैः। तथा संत्यज्य स्व
र्वकर्माणि भक्तिश्रद्धासमन्वितः। ततः तं पूजयानंतु वाचकं श्रद्धयान्टप। नित्यनैमित्तिके कार्य्ये गुरवे च ददत्सदा। य एवं शृणुयाद्यो रसज्ञेयः सात्विको बुधैः। गुरवे वाचकायेति कामधेनुकल्पत

क रत्नाकरः वराहि अयमेवेत्यस्य शूद्रमात्रविषयत्वे शूद्रस्येत्यनेनैव सिद्धत्वे मंत्रहीनेति विशेषणं यावदमंत्रवाच्यर्थं परिभाषार्थं च ततश्चामंत्रकर्तृकश्राद्धहोमादिकर्म्मसम्बन्धिमं
त्रेण विप्रेण ग्रहीते संबध्यते। स्त्रियोप्यमंत्रकाः। अमंत्रा हि स्त्रियो मता। इति शुद्धिरत्नाकरधृतबौधायनधृतवचनात्। अनुपनीतस्य श्राद्धातिरिक्ते मंत्रपाठनिषेधमाह मनुः। नाभिव्याहार
येद्ब्रह्म स्वधानिनयनादृते। शूद्रेण हि समस्तावद्यावद्वेदे न जायते। स्वधा श्राद्धं तन्निनीयते संपाद्यते येन मंत्रजातेन तस्मात् स्त्रीशूद्रानुपनीतानां सर्वकर्म्मणि द्रव्यदेवतानुष्ठानादिदृष्टप्र
योजनप्रकाशनाय ब्राह्मणेन मंत्रः पठनीयः। मंत्रपाठजन्यादृष्टसिद्धिस्तु नमस्कारेण यथाह बृहस्पतिः। शौचं ब्राह्मणशुश्रूषा सत्यमक्रोधस्वच्च। शूद्रकर्म्म तथामंत्रो नमस्कारोस्य दर्शि
तः। एवं मलमासे प्रायश्चित्तमपि निरवकाशं नैमित्तिकत्वेन कर्त्तव्यं विहितस्याननुष्ठानात् प्रतिषिद्धनिषेवनात्। प्रायश्चित्तं यत्क्रियते तन्नैमित्तिकमुच्यते इति बृहस्पत्युक्तेः। अ
स्य च निरवकाशत्वमनारब्धप्रायश्चित्तस्य भुंजानस्य पापवृद्धेः तथा चांगिराः। कृते निःसंशये पापे न भुंजीतानुपस्थितः। भुंजानो वर्द्धयेत्पापमसत्यस्पर्शि दिब्रुवन्। अतएव दक्षः। नैमि
त्तिकानि काम्यानि निपतन्ति यथा यथा। तथा तथैव कार्य्याणि न कालस्तु विधीयते। नैमित्तिकानि काम्यानीति सामानाधिकरण्यं निमित्तात् ग्रहदोषस्य दुःस्वप्नादेः कर्त्तव्यत्वेन प्रतीतानि
नैमित्तिकानि निमित्तसूचितदोषशान्तिकामनया क्रियमाणानि तान्येव काम्यानि न कालस्तु विधीयत इति उदगयनं तु शुक्लपक्षदिनपूर्वभागादि रूपः कालो नानुरुध्यते। तेनैतद्व्यति
रिक्तदक्षिणायनादौ निंदितमलिम्लुचादावपि शान्तिकं कर्त्तव्यमिति शान्तिकपौष्टिके कल्पतरुः। तथा दत्तनष्टहिरण्यस्यादाने स्तेयत्वश्रवणात्। आरब्धदानसम्पादकत्वाच्च। मल
मासेपि तद्देयं। तथा च विष्णुपुराणे। प्रमादतस्तु तन्नष्टं तावन्मात्रं नियोजयेत्। अन्यथास्तेययुक्तः स्याद्धन्यदत्ते विनाशिनि। ब्राह्मणायोत्सृष्टं ब्राह्मणासादनात् यदि चौरादिनापह्रिय

ते। तदाता वदेवरुत्स्टज्यदेयमितिदानसागरः। युक्तं चैतत् तदित्यनेन पूर्ववचनोपात्तदत्तमित्यनुकर्षात् तद्यथा। तस्मात्सर्वात्मना पात्रे दद्यात्कनकमुत्तमं। अपात्रे पातयेद्दत्तं सुवर्णं नरकार्णवे।
२७ रकार्णवे। किंचान्यथा इत्यनेनादाने प्राप्ते दत्त इति पुनरुपादाने व्यर्थं स्यात् एतेनादत्तहेमनाशेपि तावदुत्सृज्यदेयमिति मैथिलमतं निरस्तं उत्सृष्टप्रतिपादितविषयमिति चंडेश्वरोपि
सांप्रदायिकास्तु सर्वत्रास्ते कोचात् प्रायश्चित्तमाचरन्ति वाचयन्तु मत्प्रमादनष्टोत्सृष्टाप्रतिपादितहिरण्यतुल्यहिरण्यप्रदानजन्यपापानुत्पत्तिकाम इदं मत्प्रमादनं चोत्सृष्टाप्रतिपा
दितहिरण्यतुल्यहिरण्यमित्यादि दक्षिणां चदेया। बृहस्पतिः नित्यैनैमित्तिके कुर्य्यात् प्रयतः सन्मलिम्लुचे। तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च। तीर्थस्नानन्त्वावृत्तं अनाहूत्तनिषे
धस्य वक्ष्यमाणत्वात् गजच्छायापदं गजच्छायाविहितश्राद्धपरं। गजच्छाया च वराहोक्ता। सैंहिकेयो यदा भानुं ग्रसते पर्वसंधिषु। गजच्छाया तु सा प्रोक्ता तत्र श्राद्धं प्रकल्पयेत्। अत्र वाक् २७ म
वै हस्ती भूत्वा चंद्रमसं ग्रसतीति श्रुतिर्मूलं। सूर्य्यग्रासेपि चंद्रग्रासस्यावश्यकः इति न मूलमूलिविरोध इति मैथिलाः। तथा च। विष्णुधर्म्मोत्तरे राहुं प्रति भगवद्वाक्यं। पर्वकाले तु संप्रा
प्ते चंद्रार्कौ छादयिष्यसि। भूमिच्छायागतश्चन्द्रं चंद्रगोऽर्कं कदाचन। संछादयिष्यसि यदा तदाभावमवाप्स्यसि। स्नाने जप्ये तथा होमे दाने श्राद्धे सुरार्चने। पुण्यः स कालो भविता
नित्यमेवासुरेश्वर। नित्यं मलमासादि प्रतिषिद्धकालेपि वक्तव्यतस्तु सूर्य्यग्रहेपि साक्षात् श्रुतिरस्ति तथा च समयप्रकाशः काठकब्राह्मणं हस्ती वै भूत्वा स्वर्भानुरंशुमिरादित्यं तमसापिद
धातीति एतेनमेव स्वर्भानुगते सोमे छायायां प्राङ्मुखो रवौ भवेत्। गजच्छाया तु सा प्रोक्ता तत्र श्राद्धं प्रशस्यते। इति वचनात् अमावास्याश्राद्धं मलमासेपि कार्य्यमिति मैथिलोक्तं हेयं एतद्दूषणस्य
वक्ष्यमाणत्वात् अत्र ब्रह्मपुराणोक्ता गजच्छायापि निरस्यते। कन्यायां मलमासे त्रयोदश्यां चित्रायामेव रवेः रवस्थाने नेतदसंभवात् स च योगः। योगो मघात्रयोदश्यां कुंजरच्छायासंगितः। भवे

मघायां संस्थे च शशिन्यर्के करे स्थिते। करे हस्ताभ्यां तत्संस्थे सूर्ये मघासंस्थिते चंद्रे च मघात्रयोदश्यां कुंजरच्छायसंज्ञितो योगो भवति हस्तावस्थानं च सूर्यस्य कन्यादशमोंशोत्तरं किंचि
दधिकसपादत्रयोदशांशं यावत् न चानेन कुंजरच्छायायोगः संकेतितः ननु गजच्छायेति वाच्यं कुंजरच्छायायस्य गजच्छायादिका संज्ञाता। अत्रेति तारकादित्वेन इति प्रत्ययेन गजच्छायाया
अपि संकेतितत्वात् धूस्तूरः कनकाह्वय इतिवत्। व्यक्तं कृत्यचिन्तामणौ। कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः। यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते। न च मघात्रयोदश्य
मित्यनेनैव सिद्धे मघासंस्थे शशिनी त्यधिकमिति वाच्यं। मघात्रयोदश्यामित्येतावन्मात्रकरणे तत्तिथेरेकादश्येपि मघायोगे कालांतरेपि योगः स्यादतो मघायावर्त्तमानत्वार्थं मघा
यां संस्थे शशिनीत्युक्तं तस्यैतदेवास्तु किं मघात्रयोदश्यामित्यत्र मघापदमिति चेत् श्राद्धं तेनापि कर्त्तव्यं तैस्तैर्द्रव्यैः सुसंचितैः। त्रयोदश्यां प्रयत्नेन वर्षासु च मघासु च। इति ब्रह्मपुराणी
यवचनांतरस्य विधिवाक्यप्राप्तश्राद्धे निमित्तीभूतमघात्रयोदश्यामेव फलातिशयाय कुंजरच्छायाव्ययोगो भवतीति न निमित्तान्तरमित्येतदर्थमित्यवेहि अतएवोक्तवचने श्राद्धे पुण्यै
रवाप्यत इत्युक्तं न तु श्राद्धाय निमित्तान्तरमिति। तथा चाधिकरणमालायां काम्यो गुणः श्रूयमाणो नित्यमर्थं विकृत्याभिनिविशत इति न्यायात् यथा गोदोहनापः प्रणयेत् पशुकामस्येति गो
दोहे गुणो नित्यं चमस साधनकमपां प्रणयनं विकृत्य अभिनिविशत इत्युक्तं न तु गोदोहेन प्रणयान्तरं तेन यदा कन्यादशमांशोऽपराह्णे मघात्रयोदशी सा भक्तदापरदिने तच्छाभेपि न कुंजर
च्छायायोगः। पूर्वदिन एव मघात्रयोदशी श्राद्धविधानात् तथा च गृह्यपरिशिष्टं यया स्तं सविता याति पितरस्तामुपासते तिथिं तेभ्योपराह्णो हि स्वयं दत्तः स्वयंभुवेति। एतेन कपालाधिक
रणन्यायादुभयदिने मध्याह्नलाभे पूर्वदिन एवैकोद्दिष्टश्राद्धमिति मैथिलमतं निरस्तं। अन्यथा आपराह्णिकपितृकृत्येपि तन्न्यायात् पूर्वदिन एव श्राद्धप्राप्तेः यद्यपास्तमिति वचनमनर्थकं -

स्यात् न चैतद्वचनमन्यायमूलमितिवाच्यं। अपराह्णे हीति स्वोक्तहेतुवन्निगदेन पितृकृत्ये तन्न्यायानवकाशात् तस्मादापराह्णिके तर श्राद्धे शुक्लपक्षे तिथिरित्यादि विष्णुधर्मोत्तरवचनाद्यव
स्थेति। तथा च कालमाधवीये व्यासः। क्षितीपादिकपुमानां पूज्यता नियमादिषु। एकोद्दिष्टादिदृष्टश्राद्धे ह्रासवृद्ध्यादिचोदना। एकोद्दिष्टादिदृष्टश्राद्धे एकोद्दिष्टादिनिमित्तीभूततिथिविशे
२४ षदृष्टश्राद्धे तत्र ह्रासवृद्धी चंद्रस्य ताभ्यां कृष्णशुक्लपक्षौ लक्ष्येते आदिशब्दादापराह्णिका पितृकृत्ये अस्तगामित्वं पूर्वोक्तयथास्तमितिवचनात्। एवं च श्राद्धे निमित्तान्तरत्वेनानंगीकारात्
गौडीयमैथिलाभ्यां कुंजरच्छाययोगः फलातिशयार्थ इत्युक्तं एतेन मघात्रयोदशी श्राद्धं कृत्वा परदिने कुंजरच्छायायोगे श्राद्धं कर्त्तव्यमिति मिश्रोक्तं हेयं। एवं च यत्किंचिन्मधुना मिश्रमिति
वचनात् ब्रह्मपुराणोक्ते तैस्तैर्द्रव्यैः ससंचितै रित्यभिधानात् गुणविशेषे फलविशेषः स्यादिति न्यायाच्च। प्रोष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीं। प्राप्य श्राद्धं हि कर्त्तव्यं मधुना पायसेन चे २८
ति शंखवचनादौ पायसाभिधानं फलातिशयार्थं अत एव शातातपवचने पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च। तस्माद्द्यात्सदोद्युक्तो विद्वत्सु ब्राह्मणेषु चेत्यन्नमात्रमुक्तं। मनुनापि।
यत्किंचिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीं। तदप्यक्षयमेव स्याद्वर्षासु च मघासु च। यत्किंचिदित्यनिषिद्धमिति कुल्लूकभट्टः। याज्ञवल्क्येनापि। यद्ददाति गयास्थश्च सर्वमानन्त्यमि
ष्यते। तथा वर्षात्रयोदश्यां मघासु च विशेषतः। तथा वर्षात्रयोदश्यां विशेषतो मघायुक्तायां त्रयोदश्यां यत्किंचिद्दीयते तत्सर्वमानन्त्यं मिताक्षरायां देवलेनापि। ततोऽन्नं बहुसंस्कारं
नैकव्यंजनवद्बुधः। चोष्यपेयसमृद्धं च यथावदुपपादयेत्। इति सर्वश्राद्ध उक्तो न तु व्रीहियववद्विकल्पः। गुणप्रधानयोः समुच्चयस्यैव युक्तत्वात्। अतोऽशक्तादीनामप्यधिकारः। अविभक्ता
नामपि पृथक् मघात्रयोदश्यां श्राद्धमावश्यकं। तथा च कृत्यचिन्तामणौ। विभक्ता अविभक्ता वा कुर्युः श्राद्धमदैविकं। मघासु च तथान्यत्र नाधिकारः पृथग्विना। अदैविकं श्राद्धं प्रत्याब्दिकमेकोद्दि

ष्ठं। अन्यत्र कृष्णपक्षादौ नाधिकारः। सपिंडीकरणान्तानि यानि श्राद्धानि षोडश। पृथङ्नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित्। इत्यत्र अपि नासमुचितत्वात् पृथग्द्रव्यस्य पुंसः सपिंडीकर
णान्तानीति विशेषणात्। तदुत्तरश्राद्धानां पृथक्त्वं प्रतीयते एवं च शंखादिविधिवाक्ये प्रोष्ठपद्यूर्ध्वं मघात्रयोदशी श्रुत्यार्थवादात् मासान्तरे केवलमघात्रयोदशीश्राद्धं निरस्तं कृत्यविधि
सत्त्वे अर्थवादेन तद्गुणो वक्ष्यति: क्रियते इति मघात्रयोदशीश्राद्धे तु ज्येष्ठपुत्रवता पिंडा न देया। भौजंगी तिथिमासाद्य यावच्चंद्रार्कसंगमं। तत्रापि न रतिं पूजां कर्तव्ये पितृदैवते। सक्षेपिं
डप्रदानन्तु ज्येष्ठपुत्री विवर्जयेत्। इति देवीपुराणवचनात्। भौजंगी पंचमी चन्द्रार्कसंगमोऽमावास्या पितृदैवते ते सक्षे मघायाँ एवं चापिंडकेन मघात्रयोदशीश्राद्धेन सपिंडकस्याप्यश्व
युक्तकृष्णपक्षश्राद्धस्य सिद्धिर्लाघवात्। अपिंडके पिंडांगानामपि निवृत्तिः प्रधाननिवृत्तावंगनिवृत्तेर्युक्तत्वात्। अतएव हेमाद्रिनव्यवर्द्धमानधृतशातातपवचने यथापिंडनिर्वाप
रहितं यत्तु श्राद्धं विधीयते। स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते। अक्षय्यदक्षिणा स्वस्तिसौमनस्यं तथास्त्विति। भविष्यपुराणे। पीहग्वचनं अक्षय्येति अक्षय्योदकदानं छन्दो
गपरिशिष्टे। अक्षय्योदकदानन्तु अर्घ्यदानवदिष्यते। षष्ठ्यैव नित्यं तत्कुर्यात् न चतुर्थ्या कदाचन। चतुर्थ्येति तस्मै ते इत्यस्य निषेधः। षष्ठ्येवेत्यनेन गोत्रसंबन्धनाम्नां षष्ठ्यन्तता
प्रतीतेः। अर्घ्यस्य विधानात् स्वधानिषेधः। येनयेचात्रत्वेत्यस्याक्षय्यदाने निषेधः। ननु गोभिलेन ये चात्र त्वेत्यादिमंत्रस्य तत्तत्स्थानविशेषोपदेशात् कथमक्षय्यदाने प्रसक्तिरि
ति चेत् सत्यं बहूनामेकधर्म्माणामेकस्यापि यदुच्यते सर्वेषामेव तत्कुर्यादेकरूपा हि ते स्मृता इति बौधायनोक्ताकांक्षया प्रसक्तेः प्रागुक्तपरिशिष्टवचनेनापि ज्ञाप्यते। ततश्छन्दोगाना
मक्षय्योदकदाने तरत्र कुशासनादिदाने सर्वत्रैवाविशेषाद्येचात्रत्वेत्यस्य पाठः। विशेषोपदेशस्तु प्रदर्शकः। अतएवानिरुद्धभट्टेन सर्वत्र वाक्ये श्राद्धविवेककृता चाप्येतत्सर्गवाक्ये ये चात्र

त्वेति लिखितं। नचैवं सपिंडकेनापिंडकश्राद्धसिद्धिरिति मिश्रोक्तंयुक्तं। अनयोरेकतरकरणे पिंडतदभावान्यतरं गेलोपावश्यकत्वेनउभयप्रसंगकरणानिष्पत्तेर्लाघवेनापिण्डकरणस्यै
२१ वौचित्यात्। मघायां पिंडदानेन ज्येष्ठपुत्राविनश्यतीति निन्दाश्रुतेश्च ननु पिण्डाभावस्य श्राद्धांगकत्वे किंमानमितिचेत्। अविद्धिन्नेकथंभावे यत्प्रधानस्य पद्यते। अविज्ञातफलंकर्म्मितस्यप्र
करणांगता इतिन्यायस्यभाववदभावेप्यविशेषात् अतएव षोडशीग्रहणाभावेक्रत्वर्थतयापाद्दछिकग्रहणप्रशंसत्वभावान्निषेधोऽयंनक्रत्वर्थःस्यादिति दायभागः। द्वैतनिर्णयेसाग्निकौर
सेन पितुःक्षयाहे पित्रादित्रिकस्य श्राद्धेकृतेतत्र मातामहानां श्राद्धायनपुनःपार्वणारंभः। वाजिनवत्तस्यानुष्ठानाप्रयोजकत्वादिति स्वोक्तेनैवाष्टकादौ मातृपुरुषिकात्वेपि कर्षूसमाप्तितं
मुक्तातथाद्यं श्राद्धषोडशं। प्रत्याब्दिकं चशेषेषु पिंडाःस्युःषडितिस्थितिः। इत्युक्तक्षयाहे त्रैपुरुषिकमात्राभिधानपरेणाविरोधाच्च मातामहानां श्राद्धेषुस्वतोनुष्ठानाप्रयोजकत्वंच। पि २८ मल
तरोयत्रपूज्यन्ते तत्रमातामहाध्रुवं इत्यनेनपितृश्राद्धाधीनप्रवृत्तेः एतेनमघात्रयोदश्योःसपिंडकापिंडकोभयश्राद्धे पृथक्कर्त्तव्यमितिमतं निरस्तं। नचपिंडदानस्य श्राद्धत्वेन प्राधा
न्यात् श्राद्धाहृतिरितिवाच्यं। अदैवंभोजयेत्श्राद्धे पिंडमेकंच निर्वपेदिति मनुवचने। आमश्राद्धंयदाकुर्याद्विधिज्ञःश्राद्धदःसुतः। तेनाग्नौकरणंकुर्यात् पिण्डांस्तेनैवनिर्वपेत् इतिमत्स्य
पुराणे। श्राद्धंसपिण्डकंकृत्वा कुलसाहस्रमात्मना। यमलोकात्समुद्धृत्य नयेद्दिव्युपदंनर इतिगयाप्रकरणीयवायुपुराणे च। पिण्डातिरिक्तस्यैव श्राद्धत्व विधानात् नचसहपिण्डक्रि
यायान्तुकृतायामस्यधर्म्मतः। अनग्नैयेवाकृत्वाकार्य्यं पिण्डनिर्वपनंसुतैरिति मनुवचने अन्नोत्सर्गस्येतिकर्त्तव्यता विधानात् पिण्डदानस्यप्राधान्यमितिवाच्यं। प्रागुक्तवचनविरोधेन पिण्डप
दस्यपितृपरत्वात् तथाच ततःप्रभृतिपितरःपिंडसंज्ञान्तुलेभिरे इति मत्स्यपुराणे तस्मात् पिंडनिर्वपणं पित्रे दानमित्यर्थः। नचैवमष्टकादेः। पितृक्षयतिथित्वे तत्रपार्वणेकृते निरग्नेर्नै

कोद्दिष्टाचरणमितिवाच्यं। यद्येकदिवसे स्यातामेकोद्दिष्टं च पार्वणं। एकोद्दिष्टं तु निर्वर्त्य पार्वणं विनिवर्त्तयेत्। इति नव्यवर्द्धमानधृतवचनेन प्रागेकोद्दिष्टविधानात् नन्वेवमाभ्युदयिकेऽप्र
ते तद्दिने तदनन्तरं तु मार्कण्डेयपुराणेन नित्यश्राद्धे विकल्पविधानात् ननित्यश्राद्धात् पार्वणसिद्धिः। यथा मार्कण्डेयपुराणे नित्यक्रियां पितॄणां तु केचिदिच्छन्ति सत्तमाः। न पितॄणां तथे
चान्ये शेषं पूर्ववदाचरेत्॥ अथ पर्य्युदासविचारः॥ ननु भौजंगीं तिथिमासाद्य यत्नात् उपजीव्यबाधभीया रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्त्तिता हि सा। सन्ध्ययोरुभयोश्चैव सूर्य्ये चैवाचिरो
दिते इतिवत् पिंडदानं विवर्जयेदिति पर्य्युदास इति चेन्न। एतस्यातिदेशलभ्यत्वेन पर्य्युदासासंभवात्। तथाहि पिण्डदानं विवर्जयेदित्यस्य पिंडेतरं दद्यादित्यर्थकत्वेऽनुवादापत्तिस्तदितरस्य
प्रकृतिविकृतिन्यायेन लब्धत्वात् किं च तदितरदानेपि कथं वासनदीयते न च प्रापकविध्यभावादप्राप्तिः विध्यभावेपि प्रकृतिवद्विकृतिरितिन्यायात् प्राप्तेः एवं मघातिरिक्तपिंडं दद्यादि
ति पर्य्युदासेपि नचैवं राज्यादितरामावास्यायां कुर्य्यादित्यर्थ एव राजादावपि कथं न प्रशक्तिरिति वाच्यं न्यायविध्योरभावात् अत एव राजमार्त्तंडे निषेधातिक्रमादनिष्टफलमुक्तं यथा सं
क्रान्त्यामुपवासेन पारणेन युधिष्ठिर। मघायां पिंडदानेन ज्येष्ठः पुत्रो विनश्यति। सन्ध्यामाह वराहः॥ अर्द्धास्तमयात्सन्ध्या व्यक्तीभूता न तारका यावत्। तेजःपरिहानिरुषा भानोरर्द्धो
दयं यावत्। योगियाज्ञवल्क्यः। ह्रासवृद्धी च सततं दिनरात्र्योर्यथाक्रमं। सन्ध्यामुहूर्त्तमाख्याता ह्रासे वृद्धौ समा स्मृता॥ एतत्साहचर्य्यादचिरोदितकालोपि मुहूर्त्तमात्रं रात्रौ श्राद्धं न कुर्वी
त राहोरन्यत्र दर्शनात्। सूर्योदयमुहूर्त्ते च सन्ध्ययोरुभयोस्तथेति मदनपारिजातमाधवाचार्य्यधृतशातातपवचनाच्च। एतेनाचिरोदितमुहूर्त्तद्वयवर्णनं हेयं। तस्मादतिदेशस्थले न प
र्य्युदासः। अतिदेशस्तूक्तः तंत्ररत्ने। प्रकृतात्कर्मणो यस्मात् तत्समानेषु कर्मसु। धर्मातिदिश्यते येन सोतिदेश इति स्मृतः। न च यजतिषु येयजामहं करोति नानुयाजेष्वित्यत्र क्रियान्तराभा

वात् एकवाक्यतयाऽउपजीव्यबाधभियापर्युदासोऽस्तु। प्रकृते ऽमावास्यायां पितृभ्यो दद्यात् रात्रौ श्राद्धं न कुर्वीतेति क्रिययोः पृथगभिधानात् तयोः स्वार्थकत्वायगत्यन्तराभावात् प्रागातिदे
30 शवदुपजीव्यबाधोऽस्त्विति वाच्यं। न्यायनयेयथाकरोतीत्यत्र एक इत्यादौ च प्रकृतिप्रत्यययोरेकार्थत्वे संभेदेनान्यतरस्यैवार्थ्यं तद्वदत्रापि अन्यथा नानाविधिकल्पनागौरवं। अत एव
औरसक्षेत्रजयोः साम्न्योरेव पार्वणं नतु क्रियाभेदेपि निरपेक्षेण विधिद्वयकल्पनं औरसौ क्षेत्रजौ पुत्रौ विधिना पार्वणेन तु। प्रत्यब्दमितरे कुर्युरेकोद्दिष्टं सुतादश इति। यत्र यच्च
प्रदातव्यं सपिंडीकरणात्परं। पार्वणेन विधानेन देयमग्निमता सदा इति ज्ञावालमत्स्यपुराणाभ्यामिति। किंचादग्धदहनन्यायेन यावदप्राप्तं तावद्विधीयते इति सर्वत्राख्यातसं
बन्धे श्रूयमाणे पदान्तरे। विधिशक्त्युपसंक्रान्तेः स्याद्धातोरनुवादतेति मदनपेसायंप्रातर्जुहोतीत्यनेनैव हवनस्याहरहः सिद्धेः यथा सायंप्रातर्हवनमनूद्य दध्ना जुहोतीत्यादौ दध्यादेः ३० मल
कारणत्वमात्रं विधेयं तद्वदौरसक्षेत्रजकर्तृकप्रत्याब्दिकपार्वणविधिमनूद्याग्निमत्कर्तृत्वमात्रं विधीयते। एवमत्र तत्तद्विधिप्राप्तश्राद्धकरणमनूद्य रात्रीतरत्वमात्रमिति। अ
न्यथा प्रसक्तपक्षे पूर्वाह्ने मातृकं श्राद्धमपराह्णे तु पैतृकं। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति ब्रह्मपुराणे नामावास्यादिविधीनामेकवाक्यतया श्राद्धमात्रस्य दि
वामात्रकर्तव्यत्वाभावेनैवैकोद्दिष्टस्य मध्याह्नमात्रकर्तव्यत्वे यत्रोभयदिने मध्याह्नाप्राप्तिस्तत्र श्राद्धलोपे प्रत्याब्दिकमितिवीप्साभंगप्रसंगः। अपिच्चैवं। यस्यैतानि न दीयन्ते
प्रेतश्राद्धानि षोडश। पिशाचत्वं ध्रुवं तस्य दत्तश्राद्धशतैरपीति मनुवचनेन षोडशश्राद्धासम्पत्त्या पित्रादीनां प्रेतत्वपरिहाराभावान्महाननर्थः स्यात् पर्युदासपक्षे तु अमावास्या-
विधीनां रात्रीतरपरत्वेऽपराह्णादीनां विशेषविधीनां प्राशस्त्यपरत्वं तच्चाप्येकवाक्यत्वे रात्रीतरविशेषणवैयर्थ्यं ततश्च प्रशस्तकालं विना रात्र्यादीतरकालेपि श्राद्धविधानात् नश्रा

द्वलोपः अतस्त्वापकर्षे एकादशद्वादशाधवेति वचनमपि संगच्छतेऽन्यथा मध्यान्हमात्रकालत्वे तत्र द्वादशाश्राद्धानुपपत्तेः। वस्तुतस्तु वेदानाकल्पतरावधिकरणमालायां च। पर्युदा
साधिकरणस्य विषयवाक्यमेवं किल श्रूयते। ओं श्रावयेति चतुरक्षरं अस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं येयजामहमिति पंचाक्षरं द्व्यक्षरो वषट्कारः एष वै सप्तदशाक्षरगणः
प्रजापतिर्यज्ञे यज्ञेऽन्वायत्त इति ततो नानुयाजेषु येयजामहं करोतीति। अत्र सप्तदशाक्षरो मंत्रगणः प्रजापतित्वेन स्तूयते प्रजापतेरपि अहंकारैकादशेन्द्रिय शब्दस्पर्शरूपर
स गंध तन्मात्र पंचकात्मकसप्तदशाक लिंगशरीर समष्टिरूपत्वात्। यज्ञे यज्ञेऽन्वायत्तोऽनुगत इति कंचिद्यज्ञमनारभ्याधीतेन वाक्येन सर्वयज्ञेषु मंत्रगणो विनियुक्त इति यजतिषु ये
यजामहकरणत्वमुपदिष्टं तदुपदिश्य चाम्नातं नानुयाजेष्विति। अत्र संशयः किं विधायकप्रतिषेधकयोर्द्वयोरेवैयर्थ्यार्थं विधिप्रतिषेधसन्निपातादिकल्पः। उत पर्युदासो
वा अनुयाजातिरिक्तयागेषु येयजामहः कार्य इति नन्वेवं विषयसौन्दर्यात् प्राप्तस्य शास्त्रीयेन निषेधेन कथं विकल्प इति चेत् तात्कालिकश्रेयःसाधनत्वं प्रत्यक्षबोधितं प्रति
षेधस्तु कालान्तरीयानिष्टहेतुत्वं ज्ञाप्यत इति विषयभेदेन तुल्यार्थोप निपाताभावान्न विकल्पः तर्हि कथं न बाध्यबाधकभाव इति चेत्। यदिदानीं प्रवृत्तस्य सुखं दृश्यते तन्नु
त्पन्नेव दुःखकालान्तरे भवेत् तर्हि व्यर्थी यं प्रतिषेधः स्यात् प्रवृत्ते दुःखकरत्ववन्निवृत्तेरपि सुखविगमहेतुत्वात् ततश्च दृष्टात् सुखादधिकं दुःखमायत्यामिति विद्वांसं विम्य
तं आस्तिकपुरुषं शक्नोति रागतः प्रवृत्तेर्वारयितुं वलीयान शास्त्रप्रतिषेधः। यथा लोके भुजंगायांगुलिर्न देयेति प्रतिषेधस्य प्रतिवध्यं प्रतिवलत्वादिति न तया विकल्पमर्हतीति
शास्त्रीयो तु विधिनिषेधौ तुल्यवलतयाषोडशिग्रहणाग्रहणावद्विकल्प्येते अत्र हि विधिदर्शनात् प्रधानस्योपकारभूयस्त्वं कल्प्यते निषेधदर्शनाच्च। वैगुण्येपि फलसिद्धिरवगम्य

ते। तथाह जैमिनिः। अर्थप्राप्तवदिति चेन्न तुल्यहेतुत्वादुभयं शब्दलक्षणं। अस्यार्थः। अर्थाद्विषयसौन्दर्यात् प्राप्त प्राप्तस्य यथा सर्वथा निषेधस्तथा शास्त्र प्राप्तस्यापि संभवतीति चे
न्न प्रतिषेधप्राप्तेः प्रतिषेधस्य च तुल्यप्रमाणकत्वात् तदेव दर्शयति उभयमिति उभयं प्रवृत्ति निषेध रूपं शब्दलक्षणं शब्दप्रमाणकमित्यर्थः। यथातिरात्रे षोडशिनं गृह्णाति नातिरा
.3। त्रे षोडशिनं गृह्णातीति षोडशी सोमपात्र विशेषः। ये तु ब्रुवते याहच्छिक ग्रहणाप्राप्ति प्रतिषेधोऽयं न विधितः प्राप्तस्येति तन्न वैध ग्रहणस्य अवैध ग्रहणा निषेधस्य च युगपदु
पसंहाराभावात् विकल्पाभावप्रसक्तेः क्रत्वर्थतया च याहच्छिक ग्रहणाप्रसक्त्यभावान्निषेधोयं न क्रत्वर्थः स्यात् तस्मादुक्त नयाद्विकल्प इति दायभागः। न च यागेषु ये यजामह कर
णं यावद्यजति सामान्यद्वारा अनुयाजं यजति विशेषमुपसर्पति तावदनुयाज गतेन निषेधेन तन्निषिद्धमिति शीघ्रप्रवृत्तेः। सामान्यशास्त्राद्विशेष निषेधो बलवानिति वाच्यं
यतो भवत्येवं विधिषु यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति तक्र विधिर्न दधि विधिमपेक्षते प्रवर्त्तितुमिति इह तु प्राप्तिपूर्वकत्वात् प्रतिषेधस्य ये यजामहकरणस्या २१ म
न्यतोऽप्राप्तेस्तन्निषेधेन निषेध्यप्राप्तौ तद्विधिरपेक्षणीयः स च सापेक्षतया निषेधाद्विधिरेव बलीयान् नित्य तुल्य शिष्टतया न विकल्पः किन्तु निषेधस्यैव बाध इति युक्तं तथा स
ति निषेधशास्त्रं प्रमत्तगीतं स्यान्नचैतद्युक्तं तुल्यं हिंसाप्रदायिकमिति न च नान्तरीक्षेऽग्निश्चेतव्य इति वदनुवादकतास्त्विति वाच्यं। तत्र शास्त्रतो रागतश्चाप्राप्तेस्तथा न चात्र ये य
जामह भावस्तथा यागेषु ये यजामह विधानात् अनुयाजानां च तत्र भावात्। न वा पर्युदासः नानुयाजेष्वित्ययं यदि पर्युदासः स्यात्तदा तु वक्ते न सह नञो योगात् समासः स्यात् कात्या
यनेन समास नियमस्य स्मृतत्वात् तस्माद्विहित प्रतिषिद्धतया विकल्प इति प्राप्तं। एवं प्राप्ते उच्यते युक्तं हि षोडशि ग्रहणाग्रहणयोर्विकल्प इति न हि तत्रान्या गतिरस्ति विधिप्रति

षेधयोरुभयोरपि विशेषणत्वेन पर्य्युदासासंभवात् एतेनाष्टदोषदुष्टोपि विकल्प आश्रीयते पक्षे प्रमाणाभावात् माभूत् प्रमत्तगीततेति इहतु पर्य्युदासेनाप्युपपत्तौ सम्भवन्त्याम
न्याय्यं विकल्पाश्रयणं तदुक्तं यत एव विकल्पोयं प्रतिषेधे प्रसज्यते । अतस्तत्परिहाराय पर्य्युदासाश्रयो वर । एवं हि नञः संबंधो नानुयाजेषु अनुयाजेतरेषु ये यजामहः कार्य्य इ
ति ततश्चानुयाजेतरेष्वित्युक्ते केत इति विशेषणे नज्ञायते अतो पर्य्यवसितं वाक्यं ततश्च ये अनुयाजादन्ये ते यागा इति पर्य्यवसानं पूर्ववाक्यमपेक्षते न पृथक् पर्य्यवस्यतीति । एवं
च पूर्ववाक्ये येयजामहं प्रतिशेषितत्वेन बोधितानां यागानामननुयाजत्वं विशेषणमज्ञात मनेन ज्ञाप्यते इति विधिशेषितत्वेन प्रतिषेधाभावान्न विकल्प इति न चाभियुक्ततरपाणिनिवि
रोधेन नित्यसमासवादिनः कात्यायनस्य संवादित्वं संभवति सह विभाषाधिकारे समासं शास्ति तथा च पूर्वमीमांसायां सिद्धान्तापजैमिनिः । अपितु वाक्यशेषः स्यादन्याय्यत्वात् वि
कल्पस्य इति विधीनामेकदेशः स्यादिति । एतदेव सूत्रं अर्थधारा उत्तरमीमांसायां पठन्ति भगवन्तः शंकराचार्य्याः अपितु वाक्यशेषत्वादितर पर्य्युदास इति प्रतिषेधे विकल्पः स्यादि
ति तस्मादनुयाजवर्जिते येयजामह विधानमिति सिद्धं एवं च पूर्वोपदर्शित पर्य्युदासविषयवाक्ययो रन्नापत्त इति करोतीति क्रियाभेद मालोच्यानुयाजेषु क्रियान्तराभावादत्र प
र्य्युदासो नान्यत्रेति यदुक्तं तद्धेयं ततश्च यजतिषु येयजामहं करोति नानुयाजेष्विति यात्र विवृतं तच्च श्रुत्योक्तात्पर्य्यार्थमादायेति अत एवोक्तं । प्राधान्यान्तु विधेर्यत्र प्रतिषेधेप्र
धानता । पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् । अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता । प्रसज्यप्रतिषेधोसौ क्रियया सह यत्र नञ् । यद्यपि पर्य्युदस्तराद्यादिषु श्राद्धकरणे वि
धेरौदासीन्यान्यफलं न वा प्रत्यवाय इति सिद्धान्तस्तथापि तद्विषये यत्र दोष प्रायश्चित्तयोः श्रुतिस्तत्र तदनुरोधात् द्वयोरपि कल्पनं । यथा सगोत्रादि विवाह सत्रमचंद्रार्कोपराग दर्शनादौ

32 ततश्च तथाविधविषयेन नञः। पर्य्युदासप्रसह्यप्रतिषेधोभयपरत्वाद्वाक्यभेदकल्पनमपि प्रामाणिकत्वं अतएव ऋतुकालेभिगमनं कुर्य्यात्पर्ववर्जयेदिति ऋत्वभिगमनियमेपर्व
णः पर्य्युदासे हन्ते चतुर्द्दश्यष्टमी चैव अमावास्याथ पूर्णिमा। पर्व्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च। स्त्रीतैलमांससंभोगी पर्वस्वेतेषु वै पुमान्। विण्मूत्रभोजनं नाम प्रयाति नरकं मृ
तः। इति विष्णुपुराणे न निन्द्यावेदोदितानां नित्यानां कर्म्मणां समतिक्रमे। स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमिति मनूक्तेन च यथाकामं रागप्राप्तगमने निषेधः प्रायश्चित्तं च स
गच्छते अन्यथा तदुभयं न स्यात् अतएव भोजराजः। पौषे चैत्रे कृष्णपक्षे नवान्नं नाचरेद्बुधः भवेज्जन्मान्तरे रोगी पितॄणां नोपतिष्ठते इति रोगादिनिंदाश्रवणात् प्रसह्यता। नोपतिष्ठ
ते इति श्रवणात् पर्य्युदासता यत्तु ज्योतिषे कर्म्म कुर्य्यात् फलावाप्त्यै चंद्रादिशोभने बुधः। सुस्थकाले त्विदं सर्वं नार्त्तकालमपेक्षते। इतिवत् चंद्रे च शेरवलवणां च तारेतिथा च भद्रे सि २२ म
ततेडुलोश्च। धान्यं च दद्यात्करणं च वारे योगे तुलानहे नमणिं चैलग्ने। इतिदेवलवचनात् प्रायश्चित्तान्तरं कर्म्मोपदिष्टं यत्र वा तत्सकलगुणसम्पच्छन्यते ऽस्यैरहोमि विकृतर
गुणायुक्तं योजयेन्मंगलेषु। प्रभवति हि न दोषो भूरिभावे गुणानां सलिललवइवाग्नेः संप्रदीप्तेन्धनस्य। इत्यनेन कष्टाभीष्टेत्वसंख्येयफले च स्यातां नाशः फलयोस्तत्र वाच्यः। बा
ध्यापत्तिर्यातिरिक्तस्तयोस्यात्सर्वस्यानेकल्पने बाप्रदिष्टा इति वादरायणवचनेन च प्रवर्त्तते न तत्र पर्य्युदास इत्यतो विहितेतरवारादौ विवाहादिः प्रवर्त्तते अन्यत् सुधीभिर्भाव्यं।
अनादिदेवतादर्शनेन प्रसह्यपर्य्युदासता यथा भृगुकौशिकस्कन्दपुराणज्योतिःपराशराः। अनादिदेवतां दृष्ट्वा शुचः स्पुर्नयद्भागिवे। मलमासे प्यनावृत्तं तीर्थस्नानमपि त्यजेत्। पू
र्वोक्तस्य निन्दार्थवादत्वेन विध्याकांक्षायां उत्तरार्द्धस्य त्यजेदित्यनेनान्वयः उपस्थितत्वात् अपिना अनादिदेवतादर्शनस्य समुच्चितत्वाच्च। ततश्चानादित्वमित्यपि द्वितीयान्तत्वेन

त्यजेदित्यन्वयः। परत्वात् न तीर्थस्नानमात्रे ऽन्वितं। किन्त्वनादिदेवतादर्शनेपि ततश्च मलमासे विदेवतादर्शनस्यानादृतत्वेन वर्जनमुक्तं। अत एव तत्प्रानये मलमास इवेत्यति
देशमाहुः अन्यथा वर्जयेदित्यनेनैव सिद्धे मलमास इवेत्यनर्थकं स्यात् यथा दृष्टमनुपैठीनसि भगवः। वाले वा यदि वा वृद्धे शुक्रे वास्तमुपागते। मलमास इवैतानि वर्जयेद्देवदर्शनं
किं चा दृष्टदेवदर्शननिषेधे तावत्कालमनादिदेवतानामनूत्पतामापद्येत अत एव ज्योतिःपराशरः। अनादिदेवताचैषु कालदोषो न विद्यते। नित्याश्च भ्यासयोगे च तथैवैकादशी
व्रते। अनादिदेवतात्वं च पुराणभारतादिषु प्रसिद्धं श्रीपुरुषोत्तम श्रीविश्वेश्वर प्रभृतित्वमिति। तेनानादृष्टानादिदेवतादर्शनं तीर्थस्नानं च। शुक्रास्ते मलमासे च त्यजेत् तीर्थचि
न्तामणौ। गयायां प्रतिप्रसवमाह वायुपुराणं। गयायां सर्वकालेषु पिण्डं दद्याद्विचक्षणः। अधिमासे जन्मदिने अस्ते च गुरुशुक्रयोः। न त्यक्तव्यं गयाश्राद्धं सिंहस्थे च बृहस्पतौ
ननु जन्मदिने श्राद्धस्य निषेधाभावात् कथं गयायां प्रतिप्रसव इति चेत् त्रयोदशीं जन्मतिथिं च नन्दां जन्मर्क्षतारं सितवासरं च। त्यक्त्वा हरीत्यन्दुकरान्त्यमैत्र। ध्रुवेषु च श्राद्धवि
धानमिष्टं। इति दीपिकायां जन्मदिने सावकाशश्राद्धनिषेधात् हरिः श्रवणा ऽन्त्यः पुष्यः इन्दुर्मृगशिराः करो हस्ता अन्त्य रेवती मैत्रोऽनुराधा ध्रुवानि उत्तरात्रय रोहिण्यः कर्म्मां
ग। श्राद्धस्य प्रधानानुरोधेनावश्यकर्त्तव्यत्वात् निरवकाशकर्त्तव्यत्वेन तत्र न निषेधः। नान्दीमुखे पितृश्राद्धे संक्रान्त्यां ग्रहणादये। युगाद्यादिषु नित्येषु नवा रतिथिदूषणं।
इति हलायुधधृतवचनेन नान्दीमुखश्राद्धपर्युदासाच्च अत एव पुंसवनादिषु नन्दादिविधानं संगच्छते॥ ०॥ अथ नवान्नं॥ ०॥ सूर्येचैव विशाखगे स्मरतिथे पापे त्रिजन्मा
न्विते नन्दानन्दमहीजकाव्यदिवसे पौषे मघौ कार्त्तिके। मेषूग्राहिशिवेषु विष्णुशयने कृष्णे शशिन्यस्तगे। श्राद्धं भोजनकं नवान्नविहितं पुत्रार्थनाशप्रदं। सूर्य्येचैव विशाखगे

मार्गशीर्षस्य विंशतिदंडाधिक प्रथमदिनपर्यावस्थिते सूर्ये स्मरतिथौ त्रयोदश्यां पापे पंचमतारात्रये उग्रः पूर्वात्रय मघा भरण्यः आहिरश्लेषा शिव आर्द्रा। भोजराजः। ब्रह्मविष्णुबृह
३३ स्पती शशधरो मार्तण्ड पौष्णादितौ मैत्रे चित्रविशाख वासुधनभे मूलाश्वि वन्हौ तथा। शाके वारुण ऋक्षके शुभदिने श्राद्धं नवं शस्यते। नन्दाभार्गवभूमिजेषु न भवेत् श्राद्धं नवान्नोद्भ
वं। ब्रह्मादयः रोहिणी श्रवण पुष्य मृगशिरो हस्ता रेवती पुनर्वसु अनुराधा चित्रा विशाखा स्वाती धनिष्ठा मूला अश्विनी कृत्तिका ज्येष्ठा शतभिषाः अत्र मूला कृत्तिका ज्येष्ठा विधाना
त् वक्ष्यमाणाग्नेयादि निषेधस्तु नवोदकश्राद्धपरः उत्तरात्रयमपि ग्राह्यं। ध्रुवत्वेन प्रागुक्त दीपिकावचनेन श्राद्धविधानात् वक्ष्यमाण देवलवचनाच्च। अश्लेषा कृत्तिका ज्ये
ष्ठा मूलाजपदकेषु च भृगु भौमदिने रिक्तातिथौ नाद्यान्नवोदनं। अजपदं पूर्वभाद्रपदा। एतद्वचनं तु श्राद्धानधिकारि भक्षकमात्रपरं अन्यथा प्रदक्षिणा मनुव्रज्य भुंजीत पितृ ३३ म
सेवितं। ब्रह्मचारी भवेत्तां तु रजनीं ब्राह्मणैः सह इति याज्ञवल्क्योक्तस्य श्राद्धदिनकर्तव्यस्योक्तिर्व्यंग श्राद्धावशिष्ट प्रतिपत्तिरूपभक्षणस्य नियमितस्य ज्येष्ठामूलयोः सदा बाधा
पत्त्या मुख्यकल्पे क्वचिदपि नवान्नश्राद्धं न स्यात् अन्यस्य तु तत्र प्रतिपाद्य गुणभूतत्वात् प्रतिपत्तेर्गुणभूतस्य च प्रधानाप्रयोजकत्वात् उपवासाद्यनुरोधेन विशिष्टाभावस्य
क्वाचित्कत्वात् न सर्वदा बाधः तन्नियमे किं मानमिति चेत् आपस्तंबवचनं। यथा श्राद्धमधिकृत्य सर्वस्मात् ग्रासवराद्धं मश्नीयादित्यत्र भूरिद्रव्य कृत्स्नवाचि सर्वशब्दश्रुतेः
अन्यथा तदर्थं स्यात् व्यक्तमाह नव्यवर्द्धमान धृतं शिवरहस्ये। श्राद्धं कृत्वा तु यः शेषं नान्नमश्नाति मन्दधीः। लोभान्मोहाद्भयाद्वापि तस्य तन्निष्फलं भवेत् ब्रह्मपुराणे वराहश्च
वृश्चिके शुक्लपक्षे तु नवान्नं शस्यते बुधैः। अपरे क्रियमाणे तु हि धनुष्येव कृतं भवेत्। कृतं यच्च तु यि श्राद्धं मकरे नेत्रस्तु राशिषु। पितरस्तत्र गृह्णन्ति नवान्नामिषकांक्षिणः। अपरे-

कृष्णपक्षमृगने चास्तु मृगेणैनेता प्रापयितायासौ राज्ञी णामिति व्युत्पत्त्या नक्षत्राण्येतु रित्यनेनाभिधानात्। तत्पदं सिद्धं ततश्च मृगाशिरः पूर्वार्द्धे न वृश्चिकशेषषड्भागात्परमाच्च
त्वारिंशद्दंडाधिकाविशिष्टषड्भागयोर्मृगने चाइति ज्यो। तिषे नवान्नं नैव नन्दायां न चतुर्दशजनार्दने। न कृष्णपक्षे धनुषि तुलायां नैव कारयेत्। न चस्तु ग्रहति आश्विने शुक्लपक्षेतर
परं। आश्विनाधिकारे शुक्लपक्षे नवं धान्यं पक्वं ज्ञात्वास्तु शोभनं। गच्छेत् क्षेत्री विधानेन गीतवाद्य पुरःसरः। तेन देवान् पितृंश्चैव ब्राह्मणांस्तर्पयेत्ततः इत्यादि ब्रह्मपुराणेन श्राद्धवि
धानात्। भोजराजः। पौषे चैत्रे कृष्णपक्षे नवान्नं नाचरेद्बुधः। भवेज्जन्मान्तरे रोगी पितृणां नोपतिष्ठते। अत्र धनुषीत्येकवाक्यत्वात् पौषः शौरः तदेकवाक्यत्वात् धनुषीति धनुस्थार्क
परं। तस्माहच्चर्थ्यात चैत्रोपि शौरः एवं च तुलायामिति तुलार्कपरं। यद्यपि व्रीहिपाके च कर्त्तव्यं यवपाके च पार्थिव। न तावाद्यो महाराज विनाश्राद्धं कथं च न इति विष्णुधर्मोत्तरव
चनेन श्राद्धं प्रति व्रीहियवपाकयोर्निमित्तत्वं प्रतीयते तथापि नवोदकेन वान्नेन च गृहप्रच्छादने तथा। पितरस्तृप्यन्ति यत्र नष्टकास्तु मघासु च। तस्माद्द्यात्सदा युक्तो विद्यात्तु व्री
ह्यरोषु च। इति शातातपवचने नवान्नश्रुतेः। नवान्नत्वेनोभयसाधारणं निमित्तत्वं लाघवात्। अत्रं च शूकधान्यतंडुलविकारविशेष इति प्रायश्चित्तविवेकः शूकविवेके ऽम
रः माषादयः। शमीधान्ये शूकधान्ये यवादयः। शमीशिम्बा व्रीहिपाके यवपाके च तुपादाने श्राद्धस्यार्थे। ननु व्रीहियवपाककालवत् नवान्ने चेत्यस्य वृश्चिके शुक्लपक्षे तु नवा
न्नेशस्यते बुधैरिति वचनादयमपरः काल इति चेन्न। नवोदकेन वान्नेचेत्यादौ सदति श्रवणात् नित्यत्वेन व्रीहियवपाकयोरपि विष्णुवचनेन नित्यत्वाभिधानात् तयोरेकवाक्यतापथा
श्रमावास्यास्तिस्त्रोऽन्वष्टका माघी प्रौष्ठपचूर्द्ध्व कृष्णत्रयोदशी व्रीहियवपाकौ च एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः। श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते। वृश्चिके शु

कृपक्षेत्तिति धनुरादिपर्य्युदस्तेतरगौणकालमध्ये तुष्टाश्चिकस्यप्राशस्त्यमात्रार्थं न तु आग्रहान्तराधिमितिशरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते। धान्यपाकवशादन्ये श्यामाको वनिनः
३५ स्मृतः इत्यनेन शरद्वसन्तविहित नवसस्येष्टेः। श्यामाके व्रीहिभिश्चैव यवैरन्योन्यकालतः। प्राग्ययं युज्यते वश्यं न जातो ग्रहणात्ययः। इति कालान्तरदर्शनात्। श्राद्धे तथापि
एवमेव श्राद्धचिन्तामणौ हृत्यतत्त्वार्णवे। आग्रहणं नवसस्येष्टिः नवोदके वर्षस्योपक्रमे ग्राद्रास्त्यरवावितियावत्। प्राविट्काले समायाते रौद्रऋक्षगते रवौ। नाडीवेध
समायोगे जलयोगं वदाम्यहं इति रुद्रयामलात् रौद्रमार्द्रा अत एव न त्र्य वर्द्धमानध्रुते। आर्द्रादितो विशारवांतं रविचारेणावर्षीति। तस्याः प्रथमपादेऽम्बुवाची यथा राजमार्त्त
ण्डे मृगशिरसि निवृत्ते रौद्रपादेऽम्बुवाची। ऋतुमति खलु पृथ्वी वर्जयेन्नीराय हानि। यदि वपति कृषाणाः क्षेत्रमाषाढबीजं न भवति फलभोगो शस्यचांडालपाकः। रजोयुक् ३४ म
क्ष्माम्बुवाची च रौद्रघपादगे रवौ। तस्यां पाठो वीजवापो नाहिभि र्दुग्धपालनः। ज्योतिषे। यस्मिन्वारे सहस्रांशुर्यत् काले मिथुनं व्रजेत्। अंबुवाची भवेन्नित्यं पुनस्तत्काल
वारयोः। एतच्च प्रायिकं मत्स्यसूक्ते। धरण्यामृतुमत्यां च भूमिकम्पे तथैव च। अन्तरागमने चैव विद्वान्नैव पठेन्नरः। अन्तरागमने गुरुशिष्यमध्ये पश्वादिगमने। पशूना
ह प्रायश्चित्त विवेकपैठीनसिः। ग्राम्यारण्याश्चतुर्दश पशवो गौ रविरजोऽश्वाऽश्वतरो गर्दभो मनुष्याश्चेति सप्तग्राम्याः पशवः महिषवानर ऋक्षसरीसृप रुरुपृष
तमृगाश्चेति सप्तारण्याः पशवः। तेन मनुष्यान्तरागमने पि दोषव्यवहारः। तथा। आर्द्रायाः प्रथमे पादे क्षीरं पिबति यो नरः। अपि रोषान्वितस्तस्य तक्षकः किं करिष्यति।
नवान्न श्राद्धे भक्षणस्य न निमित्तत्वं किन्तु नवान्नागमनस्यैव नक्षत्रग्रहपीडासु दुष्टस्वप्न विलोकने। इच्छा श्राद्धानि कुर्वीत नवसस्यागमे तथा। इति विष्णुपुराणात् हरोमिल

मदनाख्येश्रुतिः गृहमेधी व्रीहियवाभ्यां शरद्वसन्तयोर्यजेत श्यामाकैर्वनीवर्षास्वापत्काले अन्यैरपि पुराणैर्वेति श्राद्धचिन्तामणौ हारीतः। गृहमेधी शरद्वसन्तयोर्व्रीहिय
वाभ्यां यजेत वनीवर्षासु श्यामाकैरापत्काले ऽन्येन पुराणैर्वेति ।एतत्श्राद्धासंस्कृतेन धान्यजातेन तु श्राद्धान्तरं निषिद्धं तथा च श्राद्धाधिकारे ब्रह्मपुराणे। अकृताग्रयणे चैव
धान्यजाते द्विजोत्तम।राजमाषानणूंश्चैव मसूरांश्च विवर्जयेत्। अतः संस्कृतधान्यालाभे प्रेतश्राद्धमपि दुग्धादिना कार्यं प्रकृतौ तथा दर्शनात्।यथा ब्रह्मपुराणे।पयोमूल
फलैः शाकैः कृष्णपक्षे च सर्वदा। पराधीनः प्रवासी च निर्धनो वापि मानवः।मनसा भावशुद्धेन श्राद्धं दद्यात्तिलोदकं।अथ वा नवान्न श्राद्धाधिकारिणामेव तथा नियमः।त
दनधिकारिणान्तु विधवा दत्तनाग्रयणेनापि प्रेतश्राद्धमिति एवं भोजनेपि तथा च दत्त्वैव ब्राह्मणेभ्यश्च कृत्वा वा वैश्वदेविकं। अन्यो नवान्नमश्नीयादिति बौधायनो ब्रवीत्।इ
ति रेणुकाचार्य्येन व्यवच्छिमानध्वत वचनं । अन्योन वान्य श्राद्धकरणासमर्थः देवीपुराणे।नवं कृशरपूपानि पायसं मधुसर्पिषी। हृथा मांसं न चाश्नीयात् पितृदेवविव
र्जितं।नवं नवान्ने शंखः। हृथा कृशर संयावं पायसापूपशष्कुली।भुक्त्वा त्रिरात्रं कुर्वीत व्रतमेतत्समाहितः।तेन देवपित्र्यतिथिवर्जं कामतः सकृदभीर्जाभक्षणे त्रिरात्रं कृ
शरादिसाहचर्य्यात्रवान्नेपि तथा। ब्रह्मपुराणे प्राश्नीयद्दधिसंयुक्तं नवं विप्राभिमंत्रितं । नवं नवान्नं प्रागुक्त दीपवाक्ये जन्मदिन तारा निषेधात् ।नन्दायां भार्गवादिने
त्रयोदश्यां त्रिजन्मनि । अत्र श्राद्धं न कुर्वीत पुत्रदारधनक्षयादित्यत्र त्रिजन्मनीत्यस्य जन्मतिथि जन्मर्क्षजन्मराशिजन्मतारास्वरूप इत्यर्थः। हलायुधोप्येवं।प्रागुक्तात्रयो
दशीं जन्मदिनं च नन्दां जन्मर्क्षतारा मित्यत्र दिनपदं तिथिपरं।तिथिस्कन्देश पाठात्। त्रिजन्मनीति त्रिजन्मनक्षत्र इति व्याख्यानं गुरुचरणानामपि समप्रमाणाकं राजमार्तण्डात् नत्रतारा

३५ प्रकरणे सर्वमंगलकार्याणि त्रिपुजन्मस्तु कारयेत् विवादश्राद्धमौञ्ज्यभाजाक्षौराणि वर्जयेत् दीपिकायां मैत्रे श्राद्ध विधानात् दारुणाग्रेण यन्मैत्रेति पठितं तदनुराधेति व्याख्यातं च वाच
स्पतिमिश्रेण तदुक्तं प्रेतस्यश्राद्धविवेककृता। दारुणं चोग्रं रौद्रं मैत्रंत्रैस्त्रैतमेव च। इत्यत्र ऐन्द्रं ज्येष्ठत्युक्तं। एवं चनक्षत्रे पिनकुर्वीत यस्मिन्जातो भवेन्नरः। नप्रोष्ठपदयोः कार्यं त
था ग्नेये च भारत। दारुणे न च सर्वेषु प्रत्यरौ च विवर्जयेत्। इति श्राद्धविवेक महाभारतवचनं एतत्प्रदर्शनमात्रं। त्रिपुजन्मेष्वेव पूर्वं निषिद्धत्वात् प्रोष्ठपदाः पूर्वभाद्रपदादिनक्षत्रत्वात् दि
वचनमिति श्राद्धविवेककृतः ततश्च यद्वाचस्पतिमिश्रेणाभिहितं प्रोष्ठपदौ पूर्वभाद्रोत्तरभाद्रपदाविति तदुक्तं एतत्तारयोः पुंसि प्रयोगोप्यसाधुः स्त्रियांशेषा इति वक्ष्यमाणत्वात् तस्माध
त्रिष्ठाः स्युः प्रोष्ठपदा भाद्रपदाविति तदुक्तं एतत्तारयोः पुंसि प्रयोगोप्यसाधुः स्त्रियांशेषा इति वक्ष्यमाणत्वात् स्त्रियः इत्यमरकोषाच्च। पूर्वभाद्रपदायास्य श्राद्धमधिकृत्य विष्णुधर्मो ३५ म
त्तरे नोग्रत्वेन निषेधात् यथा नक्षत्राणि तत्रैवाच दारुणोग्राणि वर्जयेत् न चोत्तरभाद्रपदायां अपि उत्तरा चित्रय रौद्रे रोहिणी याम्यसर्पपितृमेष्वचाग्निभे स्मश्रुकर्म सकलं विवर्ज
येत्। प्रेतकार्यमपि वृद्धिमान्नर इति वाक्यान्निषेधवाक्ये तेनैव ष्टत देवल वचन विरोधात् यथा उत्तराः श्रवणा स्तिस्रो मृगशीर्षः प्रजापतिः। हस्त शतभिषक स्वाती चित्राश्विन्याम
थाश्विनी नक्षत्राणि प्रशस्तानि सदैवतानि पितृके। अपराणि च चक्षाणि उच्यन्ते कारणाः क्वचित्। उत्तरास्तिस्र इतिकल्पतरुः। अपराणि धनिष्ठादीनि कारणे माघाभावस्यायोग
दिभिः दीपिकापूर्ववचने ध्रुवत्वेनोत्तरविधानाच्च ततश्च देवलादिवचनविरोधात् प्रेतकार्यमिति। न प्रेतश्राद्धपरं। किन्तु पतितप्रेतसंप्रदानकदासीघटोदकदानपरं॥ ०॥ अथ स
प्याशुद्धिः॥ ०॥ ज्योतिःपराशरः॥ अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च। देवव्रत वृषोत्सर्गचूडाकरणमेखलाः। मंगल्यमभिषेकं च मलमासे विवर्जयेत्। बाले वा यदि वा वृद्धे

शुक्रे चास्तमुपागते । मलमासश्चैतानि वर्जयेद्देवदर्शनं । पक्षवृद्धिस्तु पूर्वेणादशाहं पश्चिमेन तु । प्रत्यग्बालो दशाहन्तु पूर्वेणात्रिदिनत्रयं । पूर्वेणेति प्रातः प्रातः पूर्वदिशि दृष्ट्वार
विकिरणाच्छन्नतया न दृश्यते चेत् ग्रहस्तदा प्रागस्तमितः तच्चास्तमितात् प्राक् पक्षवृद्धः पश्चिमेनेति एवं सायंसायमपरदिशि दृष्ट्वा रविकिरणाच्छन्नतया न दृश्यते चेत् ग्रहस्तदा प्र
त्यगस्तमितः तच्चास्तमितात् प्राक् दशाहं वृद्धः । द्वात्रिंशद्दिवसाश्चास्ते जीवस्य भार्गवस्य तु । द्वासप्ततिर्महत्यस्ते पादास्ते द्वादशाहमादिति ज्योतिर्विदुक्तकालानन्तरं अपरदि
शि दृश्यते चेत् तदा दशाहं प्रत्यग्बालः पूर्वदिशि दृश्यते चेत्तदा दिनत्रयं प्राग्बाल इति भेदः पन्तरेणाह । पक्षवृद्धो महत्यस्ते तु बालश्चापि दशाहिकः । पादास्ते तु दशाहानि वृद्धो
बालो दिनत्रयं । अथ मलमासादिकीर्त्तनं पुण्येतरकालोपलक्षणं । बहूनामेकधर्माणामेकस्यापि यदुच्यते । सर्वेषामेव तत्कुर्यादेकरूपा हि ते स्मृताः । इति बौधायनवच
नात् अत एव प्रतिप्रसवे कालदोषो न विद्यते इति सामान्यत उक्तं तथा गोभिलपारस्कराभ्यां कर्मणः कालपरिभाषायां उदगयने पूर्वपक्षे पुण्येऽहनि प्रागावर्त्तनादह्नः का
लं विद्यादिति उदगयने आपूर्यमाणे पक्षे पुण्याहे इति सूत्राभ्यां अह्नो वासरस्य पुण्यत्वमुक्तं । अत्र विहितक्रियासाध्यो धर्मः पुंसां गुणो मतः । प्रतिषिद्धक्रियासाध्यः स गु
णोऽधर्म उच्यते । इति तार्किकैरभिहितं । चिरध्वस्तं फलाजालं न कर्मातिशयं विना इत्यनेन काम्यस्थले पूर्वशक्तिकल्पनावश्यकत्वे नान्यत्रापि स्थालीस्थास्तंडुला एते सर्वे वि
क्लित्तिभागिनः समकालाग्निसंयोगभागित्वात्प्रतिपन्नवत् । इति स्थालीपुलाकन्यायेन वैदिकलिङ्त्वावच्छेदेनापूर्वशक्तिकल्पनात् प्रतिपन्नं हस्तमर्दनादिनास्फुटित
त्वेन ज्ञातं कार्यनियोगापूर्वशब्दैरुच्यमानो धात्वर्थसाध्यस्वर्गादिफलसाधनानुगुणो धर्म इति प्रभाकरैरभिहितं । तत्कथमह्नः पुण्यत्वमिति चेत्तज्जननयोग्येभात्तोयं

पुण्यशब्दः तथा च भट्टवार्त्तिकं । द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते । तेषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्मता । श्रेयःसाधनता ह्येषां नित्यं वेदात् प्रतीयते । ताद्रूप्येणात्र ध
३६ र्मत्वं तस्मान्नेन्द्रियगोचरः । इति तच्च पुण्यत्वं यथा रिक्तादिदोषरहितत्वं शोभनचन्द्रादिमत्त्वं च । तथा मलिम्लुचादिदोषरहितत्वमपि रत्नाकरादिधृतं न्यायरत्नवाक्यं पुण्ये शु
द्धे तच्च मलिम्लुचगुरुशुक्रबाल्यवृद्धास्तमयसिंहमकरराश्यन्तरगुरुस्थिति पूर्वराश्यननायातातिचारिगुरुकसंवत्सरपूर्वराशिसंगनिष्पन्नातिचारिगुरुकपक्षत्रयवक्रिगुरुका
द्या विंशतिवासरभूकम्पाद्युत्पातदुत्तरसप्ताहसिंहादित्यगुर्वादित्यपौषादिमासचतुष्टयान्यतमैकद्वित्रितदधिकान्यतमदिनवृत्त्याकालिकवृष्ट्युत्तरैकत्रिसप्ताहा ३६ म
न्यतमदिनादि निषिद्धसमयान्यसमयत्वमिति रघुप्रमाणे वक्ष्यामः तत्र नव्यवर्द्धमानः एकद्वित्रितदधिकान्यतमदिनवृत्त्याकालिकवृष्ट्युत्तरैकत्रिसप्ताह इति अत्रो
त्तरदिनत्वस्य पूर्वदिननिरूप्यत्वादुत्तरत्वपूर्वत्वयोर्विरुद्धतया नानात्वादर्थतोऽग्रिमदिनादित्वप्राप्तिरिति जीवनिश्रेणाभिहितं न च एकमेव दिनं वृष्ट्यवच्छेदानवच्छे
दाभ्यां भिन्नमिति वाच्यं विशेषीभूतदिनस्य एकत्वेन प्रत्यभिज्ञानविरोधे नोपाधिमात्राभेदात् अन्यथाऽग्रावच्छिन्नवृक्षात् मूलावच्छिन्नभेदे नान्योन्याभावस्याव्याप्यवृत्ति
त्वप्रसंगादित्याह तन्न वृष्टिदिनोत्तरदिनस्य निषेधविषयत्वे वृष्टिदिनस्य कर्मार्हतास्यात् तस्मात् विशेष्याया वृष्टेरेवोत्तरत्वं विवक्षितमिति शेषः । ननु तदवच्छेदकदिन
स्यापीति तेनैकस्मिन्दिने वृष्ट्या तद्दिनमात्रत्यागः द्वितीयदिनादौ तु अन्तिमदिनमारभ्य त्र्यहसप्ताहयोस्त्यागः । तथा च व्यासः । नो सन्ध्यागर्जिते प्राहुर्व्रतोपनयनं बुधाः । न च
विद्याद्यथाकालवृष्टावासप्तवासरान् । आसप्तवासरानिति अधिकसंख्याव्यवच्छेदार्थं । तस्माद्विध्यनुवादमियाधिकसंख्यानिरस्ता अत्र वृष्ट्युत्तरमेव सप्ताहत्यागः ।

अतो दिने नैकदिनं त्याज्यं द्वितीयेन दिनत्रयं। तृतीयेन तु सप्ताहं त्यजेदाकालवर्षणे इति न्याय रत्नपरिगृहीत वाक्ये दिनेन दिनवृत्तिकर्षणेन एवं द्वितीयेनेत्यादौ ज्ञेयं अत एवान्या
य रत्ने पि वृष्ट्युत्तरत्वमुक्तं न तु वृष्टिमुक्तदिनोत्तरत्वमपि एकादिदिन वृत्तत्व विशेषणं तु दिनाल्पत्वबहुत्वज्ञापनार्थमिति श्रीपति व्यवहार निर्णये। आकालिकीं वृष्टिमवेक्ष्य
गन्ता पदं नागच्छ त्युभमात्मनीच्छन्। क्षौरं व्रतं चापि शुभाभिलाषी कदापि नैवं मनसापि कुर्य्यात्। अगर्जितेति आकालिकीं वृष्टिमवेक्ष्येत्यादि पदश्रवणात्। व्रतन्हि पूर्व सन्ध्यायां
वारिदो यदि गर्जति। व्रतं तत्र तु नैवं स्यात् इति धर्म्मव्यवस्थिति: इति वचने पूर्वमपि कारणता ग्राहकत्वेन परसन्ध्या या वर्त्तकं अन्यथा संक्रान्तिर्न्निमित्तत्वेन परसन्ध्यायोग
र्जितेपि निषेधः स्यात् एते न पूर्वदिनसन्ध्या गर्ज्जनेपि परदिने निषेध इति मैथिलमतं चिन्त्यमिति गीतायां मैथिलैते निहता: पूर्वमेव निमित्तमात्रं भव सव्यसाचिन इति वत्तत्
रूपाख्याने परं वा काम रूपीय निबन्धे चैवं। योगीश्वर:। चतुर्मासे निवृत्ते तु चक्रपाणौ समुत्थिते। अकाल वृष्टिं जानीया यावन्न सुप्यते हरि:। अत्र यावद्धि ह्यम महोत्सव इति जीमू
तवाहन: पठति महोत्सव: फाल्गुण पूर्णिमेति व्याचष्टे च भोज राज व्यवहार समुच्चये पुषु पौषादि चतुरो मासान् ज्ञेयाद्वृष्टिरकालजा। व्रतयज्ञादिकं तत्र वर्जयेत् सप्तवासरान्।
न चैव वचनान्तरं मार्गान्मासात प्रभृति मुनयो व्यासवाल्मीकि गर्गा श्चैवं यावत् प्रवर्षणविधौ नेति कालं वदन्ति। नाडीजंघः सुरगुरु मनिर्वत्ति वृष्टे रकालौ माघवेतौ नशु
भ फलदौ पौषमाघौ न शोका:। मार्गादि त्यवधौ पंचमीनामिति धोपौषादि चतुरो मासा नित्ये कवाक्यत्वात्। व्यास वाल्मीकि गर्गाश्त्यत्र दक्ष वाल्मीकि शिष्या इति जीमूतवा
हन: पठति। एतानि राजमार्त्तण्ड कृत्यचिन्तामणौ च एवं पक्षत्रये व्यवस्थिते येन सर्व परिग्रह:। स्यात्तैव ग्रहणमिति न्यायेन आद्य: पक्ष: श्रेयान उत्तरन्तु पक्षद्वय मापदत्य न्ता।

तद्विषयं एवमन्यत्रापि अतएव राजमार्तण्डे उक्तानि प्रतिषिद्धानि पुनः संभावितानि च । सापेक्षनिरपेक्षाणि श्रुतिवाक्यानि कोविदैः मीमांस्यानी ह्येका विदैरिति कृत्यचिन्ताम
37 णौ पाठः । यद्वास्य यस्य तु विधानान्येरुपसंहार संभव इति न्यायेन दोषातिशयार्थमेव सामान्यनिषेधे विशेषनिषेधः अत्रापि विशेष उक्तो वाचस्पतिमिश्रेण दृष्टिः करोति दोषं तात
न्वा कालसंभवात्तः । यावन्न भवति यानि नरपशु चरणां कितावसुधा । काश्यपः । अक्षैकमन्दिरगतो यदि जीवभानू शुक्रास्तगः स्तु रवि रेक गुरुश्च सिंहे । नारभ्यते व्रत विवाह गृह
प्रतिष्ठाक्षौरादिकर्म गमनागमनं च धीरैः । अक्षैकमन्दिरगता विशिष्टं न पृथक्तथा च । एकराशिगतो स्यातां भेकर्क्षे विषये यदि । गुर्वादित्यौ तदा त्याज्या यज्ञोद्वाहादिकाः क्रि
याः । चातुर्मास्य व्रतारम्भ मस्तगे पि गुरौ भृगौ । खंडे वापि तिथौ कुर्यादेवमेव समापनं । वराहपुराणे । आषाढशुक्लद्वादश्यां पौर्णमास्यामथापि वा । चातुर्मास्यव्रतारंभं कुर्यात्
कर्कटसंक्रमे । अभावे तु तुलार्केपि मंत्रेण नियतं व्रती । कार्तिकशुक्लद्वादश्यां विधिवत्तत्समापयेत् । महाभारते । चतुर्द्धापि हित क्षीणां चातुर्मास्यव्रतं नरः कार्तिके शुक्लपक्षे तु ३७ म
द्वादश्यां तत्समापयेत् । अत्र द्वादश्यां यत्समापनमुक्तं तद्द्वादश्यामारम्भपक्षे नियतं । कर्कटसंक्रमण तुलार्कारम्भयोस्तु वृश्चिकार्के हरेरुत्थाने सति तद्विषयं च । अन्यथा तुला
र्केसमापने चातुर्मास्यानुपपत्तेः अतएव पौर्णमास्यारंभपक्षे तत्रैव तत्रैव समापनमुक्तं । तथा च मत्स्यपुराणे आषाढादि चतुर्मासं प्रातःस्नायी भवेन्नरः । विप्रेभ्यो भोजनं दद्यात्
कार्त्तिक्यां गोप्रदो भवेत् । तच मंत्राणाह सनत्कुमारः । इदं व्रतं मया देव गृहीतं पुरतस्तव । निर्विघ्नं सिद्धिमाप्नोतु प्रसन्ने त्वयि केशव । गृहीतेस्मिन् व्रते देव यद्यपूर्णे त्वहं म्रि
ये । तन्मे भवतु संपूर्णं तत्प्रसादाज्जनार्दन ॥ समाप्नोतु । इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो । न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन । तुलार्कमात्रे प्येवं वर्षकल्पेनारदीयं । अत्र

तैलं क्षिपेद्यस्तु मासं दामोदरप्रियं । तिर्य्यग्योनिमवाप्नोति सर्वधर्म्मबहिष्कृतः । व्रतोपवासनियमैः कार्त्तिको यस्य गच्छति । देवो वैमानिको भूत्वा स याति परमां गतिं । गोविन्दमानसाख्या
ख्ये नारदीये न मांसं भक्षयेत्कांसे न कौर्म्मे मान्यदेनहि । चांडालो जायते राजन् कार्त्तिके मांसभक्षणात् । अर्मांसाशी भवेद्यस्तु गां दद्यात्स सदक्षिणां । तथा नित्यस्नाने हविर्दद्यात् तिःक्षेहे स
र्पिशक्तं वत । नित्यस्नाने प्रातःस्नाने सर्पिर्देयं तिःस्नेहे सर्पिशक्तं वो दक्षिणां देया । तथा ग्रामिष्यपरित्यागे सवत्सां कपिलां शुभे । एकान्तरे त्वजां दद्यात् फलाहारे तु शालयः । शाकाहा
रे घृतं दद्यात् पात्रराजतमेव हि । सर्वेषामप्यभावे तु यथोक्तकारणं विना । विप्रवाक्यात् पास्तुभ्यं व्रतस्योद्यापलक्षणं । वृथा तिप्रवचो यस्तु गच्छाति मनुजः शुभे । अदत्वा दक्षिणां वा
पि स याति नरकं ध्रुवं विप्रवाक्यमच्छिद्रावधारणं तदपि दक्षिणारूपं किंचिद्दत्वा ग्राह्यं । तथा निष्पानं नराज मासं श्वस्तु त्रेदे वेजनार्द्दने । यो भक्षयति राजेन्द्र चांडालादधिकोहि सः
कार्त्तिके तु विशेषेण राजमासांश्च वर्जयेत । निष्पावान्मुनिशार्दूल यावदाहूतनारकी । कदम्बानि पटोलानि वृन्ताकसहितानि च । नत्यजेत्कार्त्तिके मासि यावदाहूतनारकी । एता
नि क्षये यस्तु भुंक्ते देवे जनार्द्दने । स प्रजन्मार्जितं पुण्यं दहते नात्र संशयः निष्पावः श्वेतकलं वीति वर्षकृत्ये निष्पावः शिम्बी सदृशो दक्षिणापथे प्रसिद्ध इति कल्पतरुः । पटोला
नि फलानि नपुंसकनिर्देशात् अन्यच पटोलस्तिक्तकः पटुरित्यमरकोषे निर्दिष्टः । केचित्कडंवानीति व्याचक्षते यद्यपि नवटप्रसो दुम्बवनीपदधित्थमातुलंगानि वा भ
क्षयेदिति हारीतेन सामान्यतः कदम्बं निषिद्धं तथाप्यधिकदोषाय पुनर्निषिद्धं मातुलंगं वीजपूरमिति कल्पतरुः । महाभारते । नागनागादीन् पक्षम्य एतेश्वान्येश्च राजे
न्द्र पुत्र मांसं न भक्षितं । सादरं कौमुदं मासं तत्तस्वर्गमवाप्नुयुः । कौमुदस्तु विशेषेण शुक्लपक्षं नराधिप । वर्जयेत सर्वमांसानि धर्म्मोह्यत्र विधीयते कौमुदं कार्त्तिकं । वृहत्पुराणे का

न्तिकमधिकृत्य। एकादश्यादिषु तथाताश्च पंचस्तु रात्रिषु। दिने दिने च स्नातव्यं शीतलास्तु नदीषु च। वर्जितव्यं तथा हिंसा मांसभक्षणमेव च। मांसभक्षणनिषेधे कार्त्तिकमासतत् शुक्ल
३४ पक्षतदेकादश्यादि पंचदिनानि शक्ताशक्तभेदेन पापतारतम्याद्याकस्यानिषु ज्ञात्रा डपुराणे। तुलायां तिलतैलेन सायं सन्ध्यासमागमे। आकाशदीपं यो दद्यात् मासमेकं निरन्तरं।
सश्रीकाय श्रीपतये सश्रीमान् भुवि जायते। ॐ दामोदराय नभसि तुलायां लोलया सह। प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे। इति मंत्रेणायो दद्यात् प्रदीपं सर्पिरादिना। आका
शे मंडपे वापि स चाक्षय फलं लभेत्। विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकं। अग्निष्टोमसहस्रस्य फलं प्राप्नोति मानवः। विद्यापतिकृत्यवर्षकृत्ये कृत्यकल्पलतायां
च गार्ग्यः। जीवादित्ये वाले शुक्रे ऊर्द्धं दशाहात् मंगल्यं प्रतिष्ठां कुर्य्यात् खातं च कुर्य्यात्। मंगल्यं विवाहादि खातं पुष्करिण्यादि राजमार्त्तण्डे हारीतः। याश्चा चूडा विवाहं प्रभृति वि ३८ नस
वरविधिं ग्रामसद्म प्रवेशं प्रासादोद्यानहर्म्यान् सुरनरभवनारंभ विद्याप्रदानं। मौंजीबन्धं प्रतिष्ठां मनिमयकनकाधारणां कुर्वते ये मृत्युस्तेषां च सिंहे गुरुदिनकरयो रे
कराशिस्थयोश्च। सिंहे गुरुदिनकरयोः सिंहस्थे गुरौ रवौ च एकराशिस्थयोर्युगपन्नयोरेव तेषां च सिंह इत्यत्र तेषां हरीज्य इत्यपि पाठान्तरं हरीज्ये सिंहस्थे बृहस्पतौ। सोमशेख
राख्य निबन्धे॥ वापीकूपतडाग यागगमन क्षौरप्रतिष्ठा व्रतं विद्यामन्दिरकर्णवेधन महादानं वनं सेवनं। तीर्थस्नान विवाहदेवभवनं मंत्रादि देवेक्षणं। दूरे सौवजिजीविषुः प
रिहरेदस्तंगते भार्गवे। वाले शुक्रे वृद्धे शुक्रे नष्टे शुक्रजीवि नष्टे वाले जीवे जीवे सिंहे सिंहादित्ये गुर्वादित्ये। तथा मलिम्लुचे मासि सुराचार्य्यातिचारगे। वापीकूपतडागा
दिक्रियाः प्रागुदितास्त्यजेत्। दीपिकायां। गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे। याम्यायने हरौ सुप्ते सर्वकर्म्माणि संत्यजेत्। सर्वकर्माणीति वचनान्तरोक्त प्रातिस्विक निषिद्ध

कर्म्म परं लाघवात् अन्यथातिप्रसंगापत्तेः। हस्वाजमार्त्तंडे। यात्राविवाहव्रतबंधवेश्मप्राशादचूडाकरणं हित्वैषी। नष्टेऽस्तगौ नोपदिशेन्नराणां देवप्रतिष्ठामपि कर्णवेधं। सर्वाणि
शुभकर्माणि कुर्य्यादस्तमिते सिते हित्वाग्निमेखलाबंधं यात्रां च परिवर्जयेत्। यात्रां चेति चकारात् पूर्ववचनोपात्तसूत्यन्तरोक्तं प्रातिस्विकनिषिद्धकर्म्मणां समुच्चयः। देवलः वालेष्ट
इतथैवास्ते कुरुते दैत्यमंत्रिणि। उद्वाहितानां कन्यानां दंपत्योरेकनाशनं। अंतकृदतिशेषः राजमार्त्तंडे। सिंहे गुरौ परिणीता पतिमात्मानमात्मजान् हंति। क्रमशास्त्रिषु पित्रादिषु वशिष्ठ
गर्गादयः प्राहुः। पित्रादिषु सिंहघटकमघापूर्वफल्गुणी उत्तरफाल्गुणी प्रथमपादेषु प्रतिप्रशवमाह शातानन्दः। माघ्यां पदि मघा नास्ति सिंहे गुरुरकारणं। अत्रैव हेमाद्रिधृतमांडव्यव
चने। श्रुतिवेधजातकान्नप्राशनचूडादिकः सर्वः रविमवनस्थे जीवे कार्यो वर्ज्यो विवाहस्तु। माघ्यां मघायोगे तु सक्षैक मंदिर इत्यादिना सर्वकर्मनिषेधात् अत्रैवं विवाहोपि श्रूयते। राजमा
र्त्तंडे दक्षः। गुरौ हरिस्थे न विवाहमाहुः हारीतगर्गप्रमुखा मुनीन्द्राः। यदा न माघी मघसंयुता स्यात्। तदैव कन्योद्वहनं दहंति। इत्थं च माघ्यां मघायोगाभावे श्रुतिवधादि मघास्थेपि गुरौ भ
वति विवाहोस्तु गुरोर्मघापरित्यागेन। तथा च मांडव्यः। मघाख्यक्षं परित्यज्य यदा सिंहे गुरुर्भवेत्। तत्राब्दे कन्यकाचोढा सुभगा सुप्रिया भवेत्। वात्स्यायनः यात्रोद्वाहप्रतिष्ठादि यज्ञचूडव्र
तादिकं। यत्नतो वर्जयेत्तत्र वक्री वक्रातिचारगे। कीर्त्तिभंगः प्रतिष्ठायां भये चौरान्तथाध्वनि। चूडोद्वाहे भवेन्मृत्युव्रते हानिर्भयं गृहे। अतिचारे त्रिपक्षः स्यात् वक्रे पक्षचतुष्टये। न कुर्य्यात्त
त्रयाद्यादि गुरोर्वक्रातिचारयोः प्रतिष्ठादे वादेवितिशेषः। गर्गः। गुरोर्वक्रातिचारे तु वर्जयेत्तदनन्तरं। व्रतयज्ञविवाहादावष्टाविंशतिवासरान्। मांडव्यः। यदातिचाराभ्यां राशिं गच्छति वाक्पतिः।
दिनानि ष्टविंशानि त्यक्त्वा कर्माणि चाचरेत्। अत्रापि पूर्वपूर्वपक्षः श्रेयान्नराशिराश्यपन्नं अन्यथा व्यर्थं स्यात् अतएव न्यायरत्नेनापि पूर्वराशिसंगमिष्यमाणातिचारि गुरुकपक्षत्रयेत्युक्तं। इह

द्रासमान्ते डे। वक्रातिचारोपगताः कुचायाय मन्यराशौ परिवर्जनीयाः। यथाक्रमस्याः स्वगृहस्थितावा नवर्जनीया मुनयो वदन्ति। व्यवहारसमुच्चये कृत्यचिन्तामणौ च हारीतः। कृत्वातिचारं यदि
पूर्वराशिं नायाति मेत्रौ विबुधाधिपानां। यानं विवाहं व्रतबन्धगेहं सर्वं तदा हन्तिमते मुनीनां। अतिचारं गते जीवे वृषे वृश्चिककुम्भयोः। यज्ञोत्साहादिकं कुर्यान्न तत्र कालेन लुप्यते। दैवनिर्णये
३९ तु। कन्यावृश्चिकमेषेषु मन्मथे च वृषे वृषे। अतीचारे पिकर्त्तव्यं विवाहादि बुधैः सदा। रत्नमूलमित्युक्तं वराहसंहितायां। अतीचारं गतो जीवस्तत्रैव कुरुते स्थितिं। तदा महातिचारः स्या
त्सु नसंवत्सरक्रियः। अतिचारेणायो राशिं लंघितो देवमन्त्रिणा। यदा द्यो वत्सरो लुप्तः सोऽनहिः सर्वकर्मसु। वर्षकर्मणोस्तु प्रत्वास्तत्सरोपि लुप्तरति। तदेवाहसोनहिरति। दीपिकायां त्रिकोण
जायाधनलाभराशौ वक्रातिचारेण गुरुः प्रयातः। यदा तदा प्राह वशिष्ठो न विलग्ने हितायपाणिग्रहणा वशिष्ठः त्रिकोणं नवपंचमं जायास प्तमं धने द्वितीयं लाभस्यैकादशगृहं। एतत्सर्वं वर
म्भ कन्यायाश्चा विशेषात्। रत्नकोषे पक्षो दशाहानि तथा चिपक्षी मास त्रिभागः खलु षष्ठमासः। एषोतिचारः क्रमशो ग्रहाणां भौमादिकानामपरस्तु चारः। प्रतिष्ठाकांडकल्पतरौ देवी २८ म
पुराणे। यथा जीवे स्थिते सिंहे तथैव मकरे स्थिते। देवाराम तडागादि पुराद्यान गृहानि च। विवाहादिम हाभाग भयादानि विनिर्दिशेत्। यथा द्वादश गो जीवे अब्दमेवाथ भास्क
रे। प्रतिष्ठाकारिता विघ्नो महावं भयकरी भवेत् कृत्यचिन्तामणौ तु देवीपुराणे सिंहसंस्थं गुरुं शक्र सर्वारंभेषु वर्जयेत्। आरब्धं च न सिध्येत महाभयकरं भवेत्। कूपाराम तडागे
षु पुरोद्यान गृहेषु च। सिंहस्थं मकरस्थं च गुरुं यत्नेन वर्जयेत्। कारको व्रजते नाशं सन्तानः क्षीयते चिरात्। गुणिसर्वस्वे मकरस्थ गुरौ प्रवर्त्तकं नारसिंहपुराणे विवाहो नैव कर्त्तव्यः
सिंहस्थे च गुरौ सदा। मकरस्थे च तत्कार्यं कन्यायाः सर्वदा बुधैः। तथा देवीपुराणे। मकरस्थो यदा जीवो वर्जयेत्पंचमांशकं। शेषेष्वपि च भागेषु विवाहः शोभनो मतः। एतद्वाक्यं व्यवहारा

परिगृहीत मितिकृत्य चिंता नरा। एतेनैतदनाकरं न भवति किन्तु मैथिलानामनाचार इति। तत्त्वरसोऽवगम्यते अतएव रत्नावल्यादिषु नीचस्थो गुरावेव दोष उक्तः। गुरोर्नी
चत्वमपि त्रिंशांशाकमकरराशेः पंचमांशे यावदिति ज्योतिस्तत्त्वे तु संधेयं। रत्नावल्यां। नीचस्थः सिंहगो वा यदि भवति गुरुः सूर्यरश्मौ च लीनः। संयुक्तो वा यदि स्याद्दशशत ष्टरि
नाक्षीणरूपोथ वालः यात्रागेहं विवाहो व्रतनगरगृहं यत्र चूडादि सर्वं। वापीचाद्यार कूपं न भवति शुभदं यद्यदिष्टं च लोके। श्रीपति रत्नमालायां कृत्यचिन्तामणौ च वात्स्यः॥
शाखाधिके बलिनि केन्द्रगते थवा स्मिन्वारेऽस्य चोपनयनं कथितं द्विजानां। नीचस्थितेऽगृहेऽथ पराजिते वा जीवे भृगौ व्रतविधिः स्मृतिकर्महीनः। अस्या शाखाधिपस्य तेन
सामगानां कुजवारे प्युपनयनं सामवेदाधिपो भौम इत्युक्तत्वात् कामरूपीय निबंधे स्मृतिसागरे च देवीपुराणे। मकरस्थो यदा जीवस्तदा विंशद्दिनं त्यजेत्। यत्त्वातुमब्दिदि
वसं कर्माणि गालवः॥ ज्योतिःकौमुद्यां। यत्तु मकरस्थं गुरुं यत्नात् सिंहवत्परिवर्जयेत्। देवारामतडागेषु पुरोधामष्टकादिषु। इत्यादि केवल वचनं तदपि सिंहवत्परिवर्जये
दित्यनेन यथा सिंहस्थ गुरोस्त्याज्यता। तथा मकरस्थस्यापीति गम्यते तेन सिंहस्थस्य गुरोर्मघापुञ्ज माघ्यांस त्यामेव त्याज्यता तथा मकरस्थस्यापि गुरोस्तस्यां सत्यामेव त्या
ज्यता। अतएव देवीपुराणे। यथा जीवस्थिते सिंहे तथैव मकरे स्थिते इत्यत्र यथा तथेत्युपादानं एतदपि देशविशेषे दूषणं। यथा गङ्गाया उत्तरे तीरे गिरिराजस्य दक्षिणे। सिंहस्थं
मकरस्थं च गुरुं यत्नेन वर्जयेत्। अतएवान्यदेशाभिप्रायेण भौमपराक्रमे वापीकूप तडागादि निषिद्धं सिंहकगुरौ। मकरस्थेपि तत्कार्य्यं न दोषः काललोपजः। कार्यं मकरगे
जीवे विवाहाद्यखिलं बुधैः। न तु सिंहगते जीवे कुर्य्याद्विज्ञः कथंचन। अतएव पूर्वोक्तनरसिंहपुराणवचने मकरस्थे माने विवाह उक्तः। अतएव तत्सारभूतं व्यवहारमात्रं विवक्षितं

श्रीपतिना अथवक्ष्येइति प्रतिज्ञाय समयाशुद्धौ मकरस्थे दोषजननमभिधाय केवलमुपनयने नीचस्थवृहस्पतिर्निषिद्धः। दैवज्ञनिर्णये श्रीपतिसंहितायां व्यवहारोपदृष्ठितमेव वचनं न व्यवहा
५० रविरुद्धमिति। एतेन मकरस्थगुर्वादौ यद्विवाहादिविधायकं वचनं तदाचारविरुद्धत्वादनादेयमिति वाचस्पतिमिश्रोक्तं निरस्तमिति प्रतिष्ठाव्यतिरिक्तमकरस्थगुरुकर्मनिषेधकश्रीपति
ग्रन्थविरहात् अथ तन्निषेधकमुनिवचनानि प्रामाणिकधृतत्वात् उपादेयानीति चेत् तर्हि प्रतिप्रसववचनान्यपि तथा। एतेनातिचारे विवाहनिषेधकवचनानि श्रीपतिना निवि
तानि नतु तदपवादकानीति। तेन तान्यप्रमाणानि इति यदुक्तं तदपि हेयं। प्रकृतेपि पूर्वोक्तयुक्तेस्तौल्यत्वात् भुजबलभीमे। जीवोर्केण युतः करोति मरणं वालांशुकोभार्गुरिर्नक्षत्रे
कगतो वदन्ति जवनाः पादस्थितो देवलः। प्रायोगर्गपराशरादिमुनयो नेच्छन्ति चास्तंगते। तस्मादस्तगते सुरेन्द्रसचिवे नेष्टं विवाहादिकं। श्रीपतिरत्नमालायां। प्रागुक्तः शि ४.म
शुरहस्थितयं सितः स्यात् पश्चाद्दशाहमिह पंचदिनानि वृद्धः। प्राक्पक्षमेव गदितोऽपि वशिष्ठगर्गैर्जीवस्तु पक्षमपि वृद्धशिशुर्विवर्ज्यः। वृद्धशिशुत्वगन्तेति क्वचित्पाठः। शि
तः शुक्रः इह पश्चाद्दिशि राजमार्तण्डे। भंवेसन्ध्यागतः पश्चादस्तमेष्यन्दिनत्रयं दिनानि पंच पूर्वस्यां तत्कृते कर्म वर्जयेत्। वाले वृद्धे च सन्ध्यांशे चतुःपंचत्रिवासरान्। जी
वे च भार्गवे चैव विवाहादि विवर्जयेत्। वालवृद्धे च सन्ध्यायां नष्टे च भृगुनंदने। दुर्भगा चासती वन्ध्या मृत्युपुत्रफलं क्रमात्। वाले च दुर्भगा नारी वृद्धे नष्टप्रजा भवेत्। नष्टे मृ
त्युमवाप्नोति सर्वमेतत् गुरावपि। वृद्धे पंचदिनमप्यापद्विषयं। ज्योतिःपराशरे भृगोः पादास्तेपि दशाहविधानात्। एवं गुरोरपि रत्नमालायां पक्षविधानात् तायाम्पतेन। सन्ध्या
मात्रपथ्यङ्गिदोषोपि वृद्धत्वेनैव तद्ग्रहणात् दीपिकायां। गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे। याम्यायने हरौ सुप्ते सर्वकर्माणि वर्जयेत्। अत्रैव नष्टशुक्रास्तेऽष्टमर्के गुरुस

ष्टिते रवौ जन्ममासे च मन्दे विष्टौ मासे मूलाब्देकुजशनिदिवसे जन्मतारास्तु चाथ। नाडीनक्षत्रहीने गुरुरविरजनीनाथताराविशुद्धौ। प्रातः कार्या परीक्षा दिनतु चरगृहांशोद
येशस्तलग्ने। ज्योतिषे। सिंहस्थे मकरस्थे च जीवे चास्तमुपागते। सिंहस्थे च रवौ नैव परीक्षा शस्यते बुधैः। गर्गः। दाहे दिशां चैव धराप्रकम्पे वज्रप्रपाते थ विदारणे वा। धूमे
तथा पांशुकरप्रपाते न कारयेन्मांगलिकादि कार्य्यं। उल्कापाते च निर्घाते नद्यै वाकालवर्षणे। छिद्रसूर्य्ये विनिर्दिष्टे न कुर्यान्मंगलक्रियां। धूमकेतौ समुत्पन्ने ग्रहणे च
न्द्रसूर्य्ययोः। ग्रहाणां संगरे चैव न कुर्य्यां मंगलक्रियां। विसूर्य्यं वा विसूर्य्यं वा दृष्ट्वा गगनमंडले। राज्ञो शक्रधनुश्चैव मंगलानि विवर्जयेत्। दिग्दाहो दिनमेकन्तु गृहे सप्तदिना
नि च। भूकंपे च समुद्भूते त्र्यहानि परिवर्जयेत। उल्कापाते च त्रितयं धूमे पंच दिनानि च। वज्रपाते दिनं चैकं वर्जयेत्सर्वकर्मसु। काश्यपः। दृष्ट्वा छिकाच सूक्ष्मा ग्रा रक्तनीलशि
खाज्वला। पौरुषी च प्रमाणेन उल्कानानाविधा स्मृता। गर्गः। यदान्तरीक्षे बलवान् मारुतो मारुताहतः। पतत्यधः स निर्घातो जायते वायुसंभवः। सशब्द इति शेषः। भोजराजः। ग्रहे र
वीन्द्वोरवनिप्रकम्पे केतूगमोल्कापतनादिदोषे व्रतेदशाहानि वदन्ति तज्ज्ञा स्त्र्योदशाहानि वदन्ति केचित्। केतवश्च शिरवावदति ज्योतींषि स्थिरान्युत्पातरूपाणि। ग्रहणकाले
तु भूकम्पोल्कापातवज्रपातादिदोष समाहारे त्रयोदशाहमशुद्धं। किंचिन्न्यूनसमाहारे दशाहं ग्रहणाद्येकैकस्मिन दिनत्रयमिति तिथि स्त्राः। अतएव स्मृतिसागरधृत सारसंग्रहे रा
ज्यादिकमहासिद्धौ यज्ञदानतपः सु च। होमस्वाध्याययो श्चैव वर्जयेद्द्वादशाहकं। लक्षहोमे तथा दाने वर्जयेत्साप्तकेमखं। तपः स्वाध्याययोश्चैव त्रिरात्रं मे त्रयोदश। इति व्यवस्था।
ग्रन्यत्र उल्कापाते भुवः कम्पे चाकालवर्षगर्जिते। वज्रकेतूगमोत्पाते ग्रहणे चन्द्रसूर्ययोः। प्रयाणां तु त्यजेत्सत्र सप्तरात्रमतः परं। ब्राह्मणाः क्षत्रियो श्चैव त्यजेत् कर्म्म त्रिरात्रकं। शूद्र-

त्यक्त्वा त्वेकरात्रं सर्वकर्म्म समाचरेत । पराशरः प्रयाणे सप्त रात्रं स्यात् त्रिरात्रं व्रतबन्धने । एकरात्रं परित्यज्य कुर्य्यात् पाणिग्रहं ग्रहे । भृगुः । कंपे राजनि सन्नाहे वा हरणानां च हन्तथा । शू
५८ द्रस्याह्निदिनं प्रोक्तं सर्वकार्य्येषु वै भृगुः । शूद्रस्यापघ्नियपंकं पञ्चत्युपलक्षणं ग्रहणादावपि पठितत्वात भोजदेवव्यवहारसमुच्चये । सर्वकार्य्यं नकुर्वीत गुरौ सिंहे स्तगेपि च । व्रतदी
क्षे नकुर्वीत तमोयुक्ते बृहस्पतौ । तमोयुक्ते राहुयुक्ते व्रत इति नित्येतर वैदिककर्म्मोपलक्षणं । तथा च स्मृतिसागरे ज्योतिषे । एकराशिस्थितौ स्यातां यदि राहुबृहस्पती विवाहव्रतयज्ञा
दि सर्वं तत्र परित्यजेत् । मलमासाद्युपक्रम्य भविष्ये । ऋक्षभेदेप्येकराशौ संपर्कोपदिचानयोः । गुरोराहारपितथात्यजेद्विद्वान्न संशयः । अत्र गुरोर्लज्जितत्वं हेतुः । तद्यथा । यत्र यत्र
स्थितो जीवस्तमोयोगेन लज्जते । उपहासाय किं न स्याद सत्संगो मनीषिणां । दीपिकायां । अनिष्टे त्रिविधोत्पाते सिंहिकासुतदर्शने । सप्तरात्रं नकुर्वीत यत्रोप्य हादित्रंगतं । इत्यत्र अ ४१
निष्ट इत्यभिधानात् अनिष्टजनक उत्पात एव सर्वकर्म्मानधिकारः पूर्वलिखितभोजराजवचनेपि केतूगमोल्कापतनादिदोष इति श्रुतेर्दोषजनक एव तथा उपरागे मंडलतः शुभे
पियात्रादिनिषेधाय सिंहिकेति पृथगुपादानं । अत्र विवाहादावपि सप्तरात्रनिषेधात पराशरोक्तस्वल्पकालनिषेध आपद्विषयः । तेनानिष्टजनके भूकम्पादौ न दोषः अत एव
वटकणिकायां वराहेनोत्पातप्रकरणे प्रायः पदमभिहितं । तथाय । प्रकृतिविपर्य्यासः प्रायः संक्षेपतः स उत्पातः क्षितिव्योमदिव्यजातो यथोत्तरं गुरुतरो भवति । प्राय इति अत्वादि
प्रयुक्तविपर्य्यासव्यावृत्त्यर्थं पदाहृये च न दोषं जनयन्त्युत्पातास्तान् ऋतुस्वभावकृतान् अपिपुत्रकृतैः श्लोकैर्विद्यादैतैः समासोक्तैः वज्राशनिमहीकम्पसन्ध्यानिर्घातनिःस्वनाः प
रिवेशरजोधूमरक्तार्ककास्तमयोदयाः । द्रुमेभ्योथ रसस्नेहमधुपुष्पफलोद्गमाः गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे । तारोल्कापातकलुषं कपिलार्केन्दुमंडलं अनग्निज्वालनस्फोटं

धूमरेणुवनिलाकुलं। रक्तपद्मारुणा सन्ध्या नभः क्षुब्धार्णवोपमं। सरितां चाम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत्। शक्रायुधपरिवेशौ विद्युत्शुष्कविरोहणं। कम्पो दर्त्तन वैकृत्यं रसनं दरणं
क्षितेः। नद्युदपानसरसां वृद्ध्यूर्ध्वतरणप्लवाः। पतनं चातिगेहानां वर्षासु न भयावहं। दिव्यस्त्रीभूतगंधर्वविमानाद्भुतदर्शनं। ग्रहनक्षत्रताराणां दर्शनं च दिवाम्बरे। गीतवादित्र
निर्घोषा वनपर्वतसानुषु। सस्यवृद्धिरसोत्पत्तिरपापाः शरदि स्मृताः। शीतानिलतुषारत्वं नर्दनं मृगपक्षिणां। रक्षोयक्षादिसत्वानां दर्शनं वागमानुषी। दिशो धूमान्धकाराश्च सशैल
भावनपर्वताः। उच्चैः सूर्योदयास्तत्वं हेमन्ते शोभनाः स्मृताः। हिमपातानिलोत्पातविरूपाद्भुतदर्शनं। दृष्ट्वाञ्जनाभमाकाशं तारोल्कापातपिंजरं। चित्रगर्भोद्भवाः स्त्रीषु गोजश्व
मृगपक्षिणां। पत्राङ्कुरलतानां च विकाराः शिशिरे शुभाः। ऋतुस्वभावजा ह्येते दृष्टाः स्वर्त्तौ शुभावहाः। ऋतावन्यत्र चोत्पाता दृष्टास्ते भृशदारुणाः। उन्मत्तानां च या गाथा शिशूनां चे
ष्टितं च यत्। स्त्रियाः यच्च प्रभाषन्ते नास्ति तस्य व्यतिक्रमः। पूर्वं चरति देवेषु पश्चाद्गच्छति मानुषे। नादेशिता वाग्वदति सत्या ह्येषा सरस्वती। अतएव मतं नापि। निर्घाते भूमिचलने ज्योति
षां चोपसर्जने। एतानाकालिकान्विद्यादनध्यायानृतावपि। अज्ञानध्यायार्थमृतावपीत्युक्तं। उत्पातदोषभंगमाह श्रीपतिव्यवहारनिर्णये। अथ दिवसत्रयमध्ये मृदुजलपतनं य
दा स्यात्तदोत्पातदोषं शमयेदित्याहुराचार्याः। वार्हस्पत्ये शमयन्त्यासन्नाहात्कंपादिकृत्यं निमित्तमात्रेव। अतिवर्षगोऽपि वास व्रतदीक्षाज्ञाप्य कृत्वनाति। विष्णुधर्मोत्तरे।
शेते च चतुरो मासान्यावद्भवति कार्तिकः। विशिष्टा न प्रवर्त्तन्ते तदा यज्ञादिकाः क्रियाः। नाभिषेक्यो द्विजः शैवे नाधिमासे कदाचन। न सुप्ते च तथा कृष्णे विशेषात्राह्मणि द्विजाः
म विष्णोत्तरे। सुप्ते मयि जगन्नाथे केशवे गरुडध्वजे। निवर्त्तन्ते क्रियाः सर्वाश्चातुर्वर्ण्यस्य भारत। विवाहव्रतबंधादिचूडासंस्कारदीक्षणं। यज्ञगृहप्रवेशादिदानादेवप्रतिष्ठनं। पु

राया नियानि कर्म्माणि वर्ज्जयेद्दक्षिणायने । सर्वास्तत्र तु वाक्यगणिता: एवं पुराणानीति । अन्यथा विशेषवचनवैयर्थ्यापत्तेरिति वदन्ति । भोजराज: । वापीतडागगृहगोपुरदेवसद्मप्रसाद वारि

५२ मठकूपविवाहचैत्यान । कर्त्तुं यथागम विधान विधिर्विधाज्ञो प्रोक्तस्तथैव कथयामि समासतोहं । सुप्ते हरौ प्रकटशेषफणोपधाने लक्ष्मीकराब्जपरिमार्जितपादपद्मे । मीनेरवौ धनुषि

चास्तमितेज्यशुक्रे वास्तुक्रिया विधिरसौ मुनिभिर्निषिद्ध: । इज्यो गुरु: प्रागुक्तज्योति: । पराशरोक्तवचने मलमासनिषिद्धगणाने दानपदं महादानपरमिति शूलपाणि तथा च नारद: । वापीकू

पतडागादि प्रतिष्ठायागकर्म्म च । न कुर्य्यान्मलमासे तु महादानव्रतानि च । सामान्यदानपरमिति वदन्ति तथा च स्मृति: । अस्तमस्यागते राशिभ्रगो मासि मलिम्लुचे । देवतादर्शनं दा

नं महादाने विवर्ज्जयेत् लघुहारीत: ॥ मगावस्ते गुरौ सिंहे गुर्वादित्ये मलिम्लुचे । त्यजेद्दानं महादानं व्रतं देवविलोकनं । एतद्वचनद्वयं कालविवेकेपि । तत्र दानमहादानपदयोरुपादानात् ४२ न

किन्तु इयान विशेष: । मरीचिवचनादौ दानमेव प्रतिप्रसूतं न तु महादानमिति । नारायणोपाध्यायास्तु मुमुक्षुणामनभिसंहितफलकं दानं मलमासेपि कर्त्तव्यमेव महादानन्तु अनभिसं

हितफलकमपि नेत्याहु: कृत्यचिन्तामणौ दानमित्यत्र यानमिति पठन्ति । यात्रामित्यर्थ: । अत्राकालिकमनध्यायमिति वचनसज्योति: स्यादिति वचनयो: सन्ध्यागर्जितप्रकरणो

ययोर्विरोध: शक्ताशक्तभेदेन समाधेय इति केचित् । उल्कासहचरितत्वेन महागर्ज्जनविषयमाकालिकमिति वस्त्वर्थ: । कालाकालविषय इति हलायुध: गर्जादिसमाहारविष

यमाकालिकमित्यपरे । आकालिकं निमित्तकालमारभ्य परदिने तत्कालपर्य्यन्तं सज्योतिर्दिनमात्रं रात्रिमात्रं चेत्यर्थ: ॥ ० ॥ अथ रोगे दानादि ॥ शातातपीयकर्म्मविपाके ।

महापातकजं चिह्नं सप्तजन्मसु जायते । उपपापोद्भवं पंच त्रीणि पापसमुद्भवं । दुष्कर्म्मजा नृणां रोगा यान्ति चैव क्रमात् शमं । जपै: सुरार्च्चनैर्होमैर्दानैस्तेषां शमो भवेत् । पूर्वजन्म

कृते पापे नरकस्य परिक्षये । बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः शमं । कुष्ठं च राजयक्ष्मा च प्रमेहो ग्रहणी तथा । मूत्रकृच्छ्राश्मरी कासा अतीसारभगंदरौ । दुष्टव्रणं गंडमाला पक्षा
घाताक्षिनाशनं । इत्येवमादयो रोगा महापापोद्भवा मताः । जलोदरं यकृत् प्लीह शूलरोग व्रणानि च । श्वासाजीर्णज्वरच्छर्दि भ्रममोहगलग्रहाः । रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः ।
दंडापतानकश्चित्र वपुः कंपविचर्चिका । वल्मीकपुंडरीकाद्या रोगाः पापसमुद्भवाः । तथा सार्धान्तराः रोगाः प्रतिपापाद्भवन्ति हि । अन्ये च बहवो रोगा जायन्ते रोगशंकराः । उच्यन्ते अथ
दानानि प्रायश्चित्तानि च क्रमात् । महापापेषु सर्वस्वं स्यात् तदर्द्धं तूपपातके । दद्यात्पापेषु षष्ठांशं कल्प्य व्याधिबलाबलं । लक्षमृत्युञ्जयं पुष्पं प्रदद्याद्देवतार्चने । दद्याद्विजसहस्राय मिष्टा
न्नं द्विजभोजने । गोदाने वत्ससंयुक्ता सुशीला गौः पयस्विनी । गोदानमधिकृत्यादि पुराणं । अरोगी जायते चैव तेजस्वी च भवेन्नरः । मनुः । औषधान्यगदो विद्या दैवी च विविधा स्थितिः
तपसैव प्रसिध्यन्ति तपस्तेषां हि साधनं । अगदो नैरुज्यं । शातातपः । यथा निदानं दोषोत्थं कर्मजं हेतुभिर्विना । महारंभोल्पके हेतावन्ति ये दोषकर्मजः । सारावस्थो । पथ्याशिलो
शीलवतो नराणां सद्वृत्तिभाजां विजितेन्द्रियाणां । एवं विधानामिदमायुरन्तश्चिन्तं सदा द्रढ्मुनिप्रवादः । व्यक्तमाह याज्ञवल्क्यः । वर्त्याधारस्नेहयोगाद्यथादीपस्य संस्थितिः । वि
क्रियापि च दृष्टैवमकाले प्राणसंशयः । यथा विकलवर्त्यादिसत्वप्रचंडवातादिना दीपनाशस्तथा प्राणापि मध्यभकर्मवशात् नौर्ध्वगतिवर्त्म सुखापथ्या शित्यादिना प्राणनाश
इति । आयुर्वेदे । यथा शास्त्रं च निर्णीतो यथा व्याधिचिकित्सितः । न शमं याति यो व्याधिः स ज्ञेयः कर्मजो बुधैः । तच्चिकित्सा यां भीष्माचार्याः । दानैर्दयादिभिः रपि द्विजदेवतागोगुरु
विना प्राणिभिश्च जपैस्तपोभिः । इत्युक्तपुण्यनिचयैरुपचीयमानाः प्राक्पापजा यादरुजः प्रशमं प्रयान्ति । अतएव हेमाद्रिप्रभृति दानखंडे तत्तद्योगतत्तद्दानानि धानपूर्वकं भावदाक्य

सुवर्णदानं सर्वेषां रोगाणां समनकारकं। तस्मात्सर्वप्रयत्नेन कर्त्तव्यं कमलोद्भवं। कर्म्मदोषो भयजव्याधौ च दानादिभिः कर्म्मभिरोषधीभिः कर्म्मक्षये दोषपरिक्षये च। शाम्यन्ति ये जन्म
भतो कथंचित्ते कर्म्मदोष प्रभवा गदास्तु। अतएवोक्तं प्रायश्चित्तं। अकृत्वा तु कर्म्म कुर्यान्न किंचन। अनिस्तीर्णमघं यस्माद् द्विगुणं परिपच्यते। केवलदोषजे तु स्वहेतुदुष्टै रनिलादिदोषै
४३ रुपप्लुतैः। स्वैवपरिस्खलद्भिः। भवन्ति ये प्राणभृतो विकारास्ते दोषजा भेषजशुद्धिसाध्या॥ ०॥ अथ मुमुक्षुकृत्यं। इह चामुत्र वा काम्यं प्रवृत्तं कर्म्म कीर्त्यते। निष्कामं ज्ञानपूर्वं
तु निवृत्तमुपदिश्यते। प्रवृत्तं कर्म्म संसेव्य देवानामेति सार्ष्टितां। निवृत्तं सेवमानस्तु भूतान्यत्येति पंच वै। कामनापूर्वकं कर्म्म शरीरप्रवृत्तिहेतुत्वात् प्रवृत्तं। तदेव कर्म्म काम
नारहितं। पुनर्ब्रह्मज्ञानाभ्यासपूर्वकं संसारनिवृत्तिहेतुत्वान्निवृत्तमुच्यते। सार्ष्टितां समानगतित्वं समैश्वर्यत्वात् पंचभूतानि अत्येति अतिक्रामति मोक्षं प्राप्नोतीत्यर्थः। विष्णु
पुराणेपि। विशिष्टफलदाः काम्या निष्कामानां च मुक्तिदा॥ भगवद्गीतापि॥ युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीं। अयुक्तः कामकारेण फले सक्तो निबध्यते। युक्त ईश्वराय क ४३ म
र्म्मेन फलायेत्येवं समाहितः। फलं त्यक्त्वा कर्म्म कुर्वन्निति शेषः। शान्तिं मोक्षाख्यां नैष्ठिकीं निष्ठया भवां सत्वशुद्धिज्ञानप्राप्तिसर्वकर्म्मसन्यासज्ञाननिष्ठाक्रमेणेति शेषः। अयुक्तस्तु
द्बहिर्मुखः कामकारेण कामप्रेरितया कामतः प्रवृत्त इति यावत् फलसक्तः सन् फलाय इदं कर्म्म करोतीत्येवं फलशक्तो नितरां संगं प्राप्नोति तथार्जुनं भगवद्वाक्यं। मयि सर्वाणि कर्म्मा
णि संन्यस्याध्यात्मचेतसा। निराशी निर्म्ममो भूत्वा युध्यस्व विगतज्वरः। सन्यस्य निःक्षिप्य समर्प्येति यावत्। अध्यात्मचेतसा विवेकबुद्ध्या अहं कर्त्ता ईश्वराय भृत्यवत् करोमीत्यनया
बुद्ध्या निराशी त्यक्तकामसंकल्पः। अतएव निर्म्ममो ममताशून्यः विगतज्वरो विगतसन्तापः। यत्कामाक्रसएव। यत्करोसि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौन्तेय तत्

कुरुष्व मदर्पणं । विष्णुपुराणे । कर्माण्यसंकल्पिततत्फलानि संन्यस्य विष्णौ परमात्मरूपे । अवाप्य तां कर्ममहीमनन्ते तस्मिँल्लयं ये त्वमलाः प्रयान्ति । तां कर्ममहीं भारतवर्षरूपां ।
एकादशेपि । वेदोक्तमेव कुर्वाणो निःसंगोर्पितमीश्वरे । नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः । वेदोक्तमेव कुर्वाणो न तु निषिद्धं । ननु कर्माणि क्रियमाने तस्मिन्नाशक्तस्तत्फलं च
स्यान्न तु नैष्कर्म्यरूपा फलसिद्धिः । अत एवाह निःसंगः अनभिनिवेशनवान् ईश्वरेऽर्पितं न तु फलोद्देशेन । अथ फलस्य श्रुतत्वात् कर्मणि कृते फलं भवत्येव तत आह रोचना
र्थेति । कर्मणि रुच्युत्पादनार्था अत एव तत्रैव फलश्रुतिरपि नृणां न श्रेयो रोचनपरं । श्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनं । उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च । आसक्त
मनसो मर्त्या आत्मनोनर्थहेतुषु । न तान् विदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि । कथं युञ्ज्यात् पुनस्तेषु तांस्तमो विशतो बुधः । एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः । फलश्रुतिं कु
सुमितां न वेदज्ञा वदन्ति हि । इयं फलश्रुतिर्न श्रेयः न परमपुरुषार्थपरा । किंतु बहिर्मुखानां मोक्षविवक्षया अवान्तरकर्मफलैः कर्मसु रुच्युत्पादनार्थं यथा भैषज्ये । औषधे रुच्यु
त्पादनार्थं । यथा पिब निम्बं प्रदास्यामि खलु ते खंडलड्डुकान् । पित्रैवमुक्तः पिबति न फलं तावदेव हि । अत्र च निम्बपानस्य न खलु खंडादिलाभ एव प्रयोजनं किन्त्वा
रोग्यं तथा वेदोप्यवान्तरफलैः प्रलोभयन् मोक्षायैव कर्माणि विधत्ते । ननु कर्मकाण्डे मोक्षस्य नामापि न श्रूयते तत्कथमेवं व्याख्यायते यथाश्रुतस्यैव घटनादित्याह उत्पत्त्येति द्वा-
भ्यां । उत्पत्त्या स्वभावत एव कामेषु पश्वादिषु प्राणेषु आयुरिन्द्रियबलवीर्यादिषु स्वजनेषु पुत्रदारादिषु अनर्थहेतुषु परिपाकतो दुःखहेतुषु अतस्तान् स्वाधीनपरमसुखमविदु
षः अजानतः न तान् प्रह्वीभूतान् बुधो वेदो यद्बोधयति तदेव श्रेय इति विश्वसितान् इत्यर्थः । तदेवंभूतान् वृजिनाध्वनि पापवर्त्मनि पश्वादियोनौ भ्राम्यतस्ततः पुनस्तमोभूत इत्यादि

येनिविंशतः कथं पुनस्ते द्वेवकामेषु ॥ प्रयं बुधो वेदो युंज्यात् प्रवर्त्तयेत् तथा सत्यमात्र ः स्यादिति भावः कथं तर्हि मीमांसकाः फलपरतो वदन्ति तत्राह एवमिति अवसितं वेदान्ति प्रायं अ
५५ विज्ञायकुसुमिता मवान्तर प्ररोचनयारमणीयां परम फलश्रुतिं वदन्ति कुतस्ते कुबुद्धयः । तत्राह हियस्मात् वेदज्ञा व्यासादयो न तथा वदन्तीति अतएव निष्काम कर्मणः आत्मज्ञानार्थे
तोक्ता यथा अयमेव क्रियापोगोज्ञानयोगस्य साधकः । कर्मयोगं विना ज्ञानं कस्यचिन्नेह दृश्यते । सोपि इरितक्षयद्वारा न साक्षात् तथा च । ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ।
तथा च श्रुतिः । तदेतं वेदवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानशनेनचेति तस्मात् मतत्वज्ञात्सात् कारं अतएव यज्ञादीनां ज्ञानशेषतां चावधार्य निष्कामेषु
कर्मसु प्रवर्त्तते । पंडितेनापि मूर्खैः काम्ये कर्माणि न प्रवर्त्तयितव्य इत्याह षष्ठस्कंधे । स्वयं निःश्रेयसं विद्वान् नवक्त्यज्ञाय कर्म हि । नराति रोगिणे पथ्यं वांछतेपि भिषक्तमः । गतिद ४४ ग
दाति समयप्रदीपे श्रीदत्तः । दासीदासमलंकारमन्नं गृहं वसंभवं । पुरुषोत्तमतुष्ट्यर्थं प्रदेयं सर्वकालिकं । यद्यदिष्टतमं लोके यच्चाप्यस्ति गृहे शुचि । तत्तद्धि देयं प्रीत्यर्थं देवदेवस्य चक्रि
णः इदं दानं ब्राह्मणसंप्रदानकमेव । विष्णुप्रीतिमुद्दिश्य । एवं सर्वदाने विष्णुप्रीतेः सामान्यतः श्रुतत्वात् । अथ विष्णुप्रीतौ देवताधिकरणाविरोध इति चेत न स्वर्गवदधिकारिविशेष
णत्वेन तत्सत्वप्रतिपादनादित्यवेहि ब्राह्मणसंप्रदानकत्वे किं मानमिति चेत् कामनपुराणे तत्तन्मासमेदेन तत्तद्दानमभिधाय विष्णोः प्रीत्यर्थमेतानि देयानि ब्राह्मणेभ्यः । देया
निविप्रमुख्येभ्यो मधुसूदनतुष्टये । इत्यभिधाय दासीदासमित्यादिवचनद्वयमभिधानात् तथा विष्णुधर्मोत्तराग्निपुराणयोः । यत्र यत्र भवेत्प्रीतिर्विषयेभ्योन्नराणां मुने । तं तमच्युतमुद्दिश्य
विप्रेभ्यः प्रतिपादयेत् । विष्णुधर्मोत्तर तृतीयकांडे तु विष्णुसंप्रदानकमेव दानं । विष्णोः प्रांरव प्रदानेन वारुणां लोकमाप्नुयादित्यादिना । क्षीरपञ्चवसं युक्तान् कलसांस्तु विभूषितान् । द

त्वा वै देवदेवाय वाजिमेध फलं लभेत इत्यन्तेन तत्तत्फलं तत्तत्स्थानमभिधायोक्तं अकामः सात्विको लोके यत्किंचिद्विनिवेदयेत् । तेनैव स्थानमाप्नोति परमात्वान्न शोचति । धर्मेवा निजि
कामूढाः फलकामा नराधमाः । अर्चयन्ति जगन्नाथं ते कामानाप्नुवन्त्यथ । अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसां । तथा पद्मे प्रतीच्छते देवः सकामेन निवेदितं । मूर्ध्ना प्रतीच्छते दत्तमका-
मेन द्विजोत्तमाः । वामनपुराण वचने सार्वकालिकमित्यनेन मलमासादावपि विष्णुप्रीत्यर्थं देयमिति ॥ ० ॥ अथ महादानलक्षणं ॥ ॥ मत्स्यपुराणे । अथातः संप्रवक्ष्यामि
महादानानुकीर्त्तनमित्यभिधाय आद्यन्तु सर्वदानानां तुलापुरुषसंज्ञितं । हिरण्यगर्भदानन्तु ब्रह्माण्डं तदनन्तरं । कल्पपादपदानं च गोसहस्रं च पंचमं । हिरण्यकामधेनुश्च हिर-
ण्याश्वस्तथैव च । पंचलांगुलकं श्वैव धरादानं तथैव च । हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा । द्वादशं विष्णुचक्रं च ततः कल्पलतात्मकं । सप्तसागरदानं च रत्नधेनुस्तथैव च
महाभूतघटस्तद्वत्षोडशं परिकीर्त्तितं । अत्र सामान्यलक्षणं । सत्कृजपांगकदानं महादानं । विनायकादिपंचाशद्देवताहोमांगकं वा । तथा च मत्स्यपुराणे । विनायकादिग्रह-
लोकपालवस्वष्टकादित्यमरुद्गणानां । ब्रह्माच्युतेशानबृहस्पतीनां स्वमंत्रतो होमचतुष्टयं स्यात् । जप्यानि सूक्तानि तथैव चैषामनुक्रमेणापि यथास्वरूपं । इत्यादिना सत्कृज-
पांगहोमरूपांगयोर्विधानं । प्रत्येकं षोडशतुलापुरुषप्रधानान्युद्दिश्य उक्तं । न तु महादानत्वेनोद्दिश्येति । अतोनेनेतरेतराश्रयत्वं न तु कुंडमंडपेपि कर्त्तव्यतायोगित्वं जिज्ञासनीयलक्ष-
णं अचलदानेपि गतत्वात् एवं च कनकाश्वतिलानागावोदासीरथमहीरहाः । कन्या च कपिला धेनुर्महादानानि वै दश इति कूर्मपुराणोक्त महादानपदं गौणं । अन्यथानानाशक्ति-
कल्पनापत्तेः । कनकादिसाधारणानानुगतैकरूपाभावाच्च । अतो न वैपरीत्यमिति ॥ ० ॥ अथ मलमासकर्त्तव्यव्रतं ॥ ० ॥ चातुर्मास्यव्रतमाषाढशुक्ले वैनविहितं तदप्यारब्धं प्राग्

णादिमलमासेकर्त्तव्यः। आषाढादिप्रतिदिनकर्त्तव्यत्वेननिरवकाशत्वात्। षष्ट्यातुदिवसैर्मासः कथितोबादरायणैरितिज्योतिःशास्त्रेपितामहेनमासिकेत्वाभिधानाच्च। य
45 नुसंवत्सरन्तुयः पूर्णमेकभक्तोनतिष्ठतिइत्यादौमासानुष्ठितसम्वत्सरव्रतमारब्धंतन्मलमासेपिकार्य्यं द्वादशमासाःसम्वत्सरः क्वचित्त्रयोदशमासाःसम्वत्सरइति।
श्रुतेः यच्चप्रतिमासविहितंनमघाद्युक्तेरवेनतन्मलमासेपिकर्त्तव्यं। तथारंभात्तृतीयाव्रतेशिवरहस्यं। मासेमलिम्लुचेप्येवंयजेद्देवींसशंकरां। किंतुनोद्यापनंकार्य्यमित्या
हभगवान्शिवः। उद्यापनंप्रतिष्ठाव्रतारंभोपिनिषिद्धः पूर्वोक्तकाश्यपवचनात् ज्येष्ठादिमासविशेषविहितं। सावित्रीव्रतादिकन्तुसावकाशत्वान्मलमासेनकर्त्तव्यंकिंतु ४५ म
प्रकृतएवज्येष्ठादौकर्त्तव्यमिति। अथपितृपक्षमृतक्रियाः॥ हेमाद्रिमाधवसंग्रहयोर्नागरखंडे। आषाढ्याःपंचमेपक्षेकन्यासंस्थेदिवाकरे। योवैश्राद्धंनवकुर्य्यात्एक
स्मिन्नपिवासरे। तस्यसम्वत्सरंयावत्तृप्ताःस्युःपितराध्रुवं। नभोवाथनभस्योवामलमासोयदाभवेत्। सप्तमःपितृपक्षस्यादन्यत्रैवतुपंचमः। इत्यत्रसप्तमस्यपितृपक्ष
त्वात् षष्ट्यातुदिवसैर्मासःकथितोबादरायणैरित्यनेनत्रिंशत्तिथिभिःपक्षत्वात्। सप्तमस्यपंचमत्वाच्च तदव्येततत्रमृतस्यसपिण्डीकरणादूर्ध्वंयत्रयत्रप्रदीयते। तत्र
तत्रत्रयंकुर्य्याद्वर्जयित्वामृताहनि। अमावास्यांक्षयोयस्यप्रेतपक्षेथवापुनः। सपिण्डीकरणादूर्ध्वंतस्योक्तःपार्वणोविधिरितिशंखोक्तेः। तदाब्दिकेपार्वणविधिनाक
र्त्तव्यंनतुमलमासभाद्रकृष्णपक्षेमृतस्यवर्षान्तरेऽश्वकृष्णेयुककृष्णपक्षेपिपार्वणं। तस्यप्रेतपक्षेमृतत्वाभावात् किन्त्वेकोद्दिष्टं तत्रपार्वणोविधिःपार्वणोनिकर्त्तव्यमृ
ताकेकोद्दिष्टविधिरितिवर्द्धमानप्रभृतयस्तत्रपूर्ववचनोक्तेपुरुषिकस्यमृताहेपर्य्युदस्तस्यपार्वणोविधिरित्यनेनप्रतिप्रसवात्वेक्ष्यमाणाअपुत्रायेमृताःकेचिदित्यत्र

पार्वणानिषेधानुपपत्त्या कर्तृसमन्वितमित्यत्र षट्पुरुषश्राद्धनिषेधेन चैवं पुरुषिकलाभाच्च तस्मात्त्रैपुरुषिकं पार्वणं युक्तमिति। एवममावास्यादिमरणनिमित्तेन मा
तुरपि प्रत्याब्दिकं पार्वणविधिनैव। अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये। तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणमिति आपस्तम्बवचने ऽपुत्रा इति विशेषोपादानेन
सपुत्राणां पार्वणाभ्यनुज्ञानात्। एवं च मात्रादि त्रिदैवतं कार्यं मातृपितामह्यै प्रपितामह्यैव पूर्ववद्ब्राह्मणान् भोजयित्वा इत्यन्वष्टकायां तथा दर्शनात् अमावास्याद्यवसानदि
ननिमित्तत्वेन पार्वणविधिना छन्दोगैरपि मात्रादित्रिकाणां श्राद्धं कर्त्तव्यं। न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते इति छन्दोगपरिशिष्टेन प्रतिप्रसवात् एवं सपिण्डीकरणेऽपि।
एतच्च मातापित्रोरेव तथा च हेमाद्रिधृतकात्यायनवचनं। सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्वणं। पितृव्यभ्रातृमातॄणामेकोद्दिष्टं सदैव हि। अत्र मातृपदं सपत्नीमातृपरं। पि
तृव्यादिसमभिव्याहारात्। अत्र मातृपदस्य राजदन्तादित्वात् परनिपातः। अत्र श्राद्धानुज्ञाग्रहणमित्यपस्तु। ओं अद्येत्यादि अमुकगोत्रस्य पितुरमुकदेवशर्म्मणोऽमा
वास्याक्षयनिमित्तकपार्वणविधिकसाम्वत्सरिकश्राद्धार्थं अमुकगोत्रस्य पितुरमुकदेवशर्म्मणोऽमुकगोत्रस्य पितामहस्यामुकदेवशर्म्मणोऽमुकगोत्रस्य प्रपितामहस्या
मुकदेवशर्म्मणः पार्वणविधिना श्राद्धं कर्त्तव्ये पुरूरवोमाद्रवसोर्विश्वेषां देवानां पार्वणविधिकश्राद्धं दर्भमयब्राह्मणेऽहं करिष्ये एवमन्यत्राप्यूह्यं एवं तस प्रमस्य पितृपक्षत्वात्
अश्वयुककृष्णपक्षश्राद्धं मलमासेन कर्त्तव्यं ॥ ० ॥ अथ अश्वयुककृष्णपक्षश्राद्धं। ब्रह्मपुराणे। अश्वयुककृष्णपक्षे तु श्राद्धं कुर्यात् दिने दिने त्रिभागहीनं पक्षं वा त्रिभा

गत्वर्द्धमेववा। दिनपदं तिथिपरं। तत्तत्कर्म्मनिमित्त पौर्णमास्यन्त मासंसंबंधित्वात् तिथिश्चांद्रमसं दिनमित्यादि प्रागुक्तत्वाच्च। अर्द्धमेवेति अर्द्धं कुर्य्यादेवेति नियमश्रुतेः अर्द्धस्य
५६ स्यावश्यकत्वे तच्च त्रिभागस्यैवार्द्धत्वे संभवति। ननु पक्षस्य तथात्वे त्रिभाग करणेऽर्द्धमेवेति नियमभंगापत्तेः। त्रयाणां पूरणो भाग त्रिभागः त्रिभागहीने पूर्वे त्रिभागहीनं त्रिभागं परं चि
भागं तथा च विष्णुधर्म्मोत्तरे। उत्तरादयनात् श्राद्धं श्रेष्ठंस्याद्दक्षिणायनं। चातुर्मास्यं च तत्रापि प्रसुप्ते केशवे हितं। प्रौष्ठपद्याः परः पक्षस्तत्रापि च विशेषतः। पंचम्यूर्द्धं च तत्रापि
दशम्यूर्द्धमतोप्यति। मघायुक्ता च तत्रापि शस्ता राजंस्त्रयोदशी। एवं प्रतिपदादि पंचदशकषष्ठ्यादिक दशकएकादश्यादि पंचक त्रयोदश्यादि त्रिक तिथिस्वरूपकल्पन्तु छया
विधानात् प्रागुक्तानागरखण्डे यत्सङ्कृत श्राद्धविधानं तत्कन्यास्थ रविनिमित्तकं। अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत्। कन्याकुंभवृषस्थेर्के कृष्णपक्षे च सर्वदा। इ ४६ म
ति मत्स्यपुराणोक्त वाक्यत्वात् अत्रैवाषाढीय पंचमपक्षसंबन्धेऽतिप्राशस्त्यं नतु पंचमपक्षेपि सकृद्विधायकं तथात्वेर्द्धमेवेति नियमभंग प्रसंगात् अत्र त्रिभागहीनादिकल्पः
शक्त्यपेक्षया अन्यथासंभवति लघुपाये गुरुपायत्वेन ननु स्थानलक्षणमप्रामाण्यं स्यात् पक्षविधेः न चात्र फलभूमा एकादेयातिश्रोदेया: मडदे पाशतिवनकल्पते नित्य
त्वेन तदभावादिति श्राद्धचिन्तामणिः। तत्र नित्येपि सन्ध्या वन्दने सूर्य्योपस्थानमुपक्रम्य कात्यायनः। तदसंसक्तपाण्णिर्वा एकपादर्द्धपादपि। कुर्य्यात् कृताञ्जलिर्वापि
ऊर्द्धबाहुरथापि वा। अत्र लघुगुरुप्रयत्नसाध्यानां कथं विकल्प इत्यत्राह सत्यवयत्रस्यात् कृच्छ्रभूयस्त्वं श्रेयसोपि मुनीश्वराः। भूयस्त्वं ब्रुवते तत्र कृच्छ्रात् श्रेयो ह्यवाप्यते इत्य

तेननित्येप्रायश्चित्तेकृत्वादुपात्तदुरितक्षयाणामानुषंगिकफलानांचभूयस्त्वसम्भवादितिभावः।तद्वदत्रापितारतम्येनफलभूम्नःकल्पनीयत्वंनतुशक्त्यपेक्षायाः।तथात्वेप्रथमः
प्रथमकल्पस्यैवयोग्यकल्पेनवर्त्तेते।नसांपरायिकंतस्यदुर्मतेर्विद्यतेफलमित्यनेनसत्त्वास्यहीनकल्पकरणेफलाभावदर्पकल्पनात्स्यात्।यत्तुश्राद्धेवैषुविपन्नानांजलाग्निभृगु
पातिनांचतुर्दश्यांभवेत्पूजाअमावास्यान्तुकामिकीति कन्यागतापरपक्षप्रकरणस्थदेवीपुराणवचनेनविशेषविधिमहिम्नाअर्थादन्येषांतत्रपूजानिषेधाच्चतुर्दशीवर्ज्ज
मनुक्तंतच्चिंत्यंनहिएतद्वचनादन्येषांनिषिध्यतेपरिसंख्याप्रसंगात् किंतुशस्त्रहतानांश्राद्धादीनांतत्रश्राद्धंविधीयते श्राद्धविवेकेपि ब्रह्मपुराणे प्रायानशनेत्यादिनास
कलकृष्णपक्षश्राद्धमभिधाययदाह्निकेतत्परिशीष्टाख्यचतुर्दश्यांतुमपिंडोदकक्रियाइतिपुनरभिधानंतत्रशस्त्रहतभ्रातादिविषयमित्युक्तेनोक्तंद्वैतनिर्णयेपिरुद्रं हिवाक्य
ममावस्यान्तुकामिकीत्युपसंहारात् चतुर्दश्यांशस्त्रहतानांश्राद्धस्यनित्यतांविधत्तेनतुशस्त्रहतानांश्राद्धमपिनिषिध्यतेउभयपरत्वेवाक्यभेदापत्तेरित्युक्तंकृष्णपक्षद
शम्यादौवर्जयित्वाचतुर्दशीं।श्राद्धेप्रशस्तास्तिथयोयथैतानतथेतराः।इतिमन्त्वसामान्यकृष्णपक्षीयचतुर्दशीनिषेधोपिनात्रसंबध्यते।अश्वयुक्कृष्णपक्षीयविशेषविधौ
दिनेदिनेइतिवीप्सयाचतुर्दश्यांश्राद्धविषयत्वेनप्रागालिंगनात् अन्यथावीप्सांविहायदिनइत्येवविदध्यात्तेनैवसकृत्करणभंगात् अन्यथादिनइत्यपिवाच्यंस्यात्
प्रकरणभेदाच्च तथाचमीमांसासूत्रं प्रकरणान्यत्वेप्रयोजनान्यत्वमितिपाश्चात्यनिर्णयामृतकालमाधवीययोरेतन्यायमूलंकार्ष्णाजिनिवचनं।नभःस्यस्यापरपक्षे
श्राद्धंकुर्यात्दिनेदिने।नैवंदादिवर्ज्जस्यान्नैवर्ज्याचतुर्दशी।नभस्यस्येतिमुख्यंचादेशः।अतएवहेमाद्रौजन्मान्तेंडेमत्स्यपुराणं।कन्यांगतेसवितरिदिनानिदशपंचच।पार्व

र्णोनविधाने नश्राद्धं तत्र विधीयते। नचैतल्लक्ष्मीधराद्यलिखितत्वान्निर्मूलमितिवाचस्पतिमिश्रोक्तं युक्तमितिवाच्यं। भोजदेवलिखनादेवस्य समूलत्वात् नचलक्ष्मीधरेणा
४७ प्येतन्निर्मूलमिति लिखितं एतेन श्राद्धाये प्राप्तसामान्यकृष्णपक्ष एव कल्पचतुष्टयविधाने नत्वश्वयुक्कृष्णपक्षस्तेन निमित्तान्तरमपि निरस्तं ब्रह्मपुराणे प्रकरणभेदात् सामान्यकृ
ष्णपक्षाश्वयुक्कृष्णपक्षश्राद्धयोरेककरणे निन्दाश्रवणाच्च। अन्यथा एकत्रोभयं विधाय एकैव निन्दा विधीयते एतेनऊर्ध्वं चतुर्थ्या यदहः संपद्यते इति कात्यायनवचनात् यत्सकृत्क
रणं तत्पक्षचतुष्टयावरुद्धमश्विना परपक्षेतरापरपक्षविषयं सामान्यविशेषन्यायादिति यदुक्तं तद्धेयं। अन्यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यत्रापि तक्रावरुद्धं कौण्डिन्या
यदधिवत् निमित्तान्तरेपि कांचनादिनदेयं स्यात्। अश्वयुक्कृष्णपक्षाष्टमीत्रयोदश्योश्चतुर्थ्यष्टका मघात्रयोदशी श्राद्धान्तरनिमित्तत्वेन भवन्मतेपि प्राप्तत्वात्। तद्दितरद्दिनेष्वेवा ४७ म
श्वयुक्कृष्णपक्षे पक्षचतुष्टयविधानं स्यात् नचादिने दिने वीप्सायां नतथेति वाच्यं। अत्रापि मासि मासि वोशनमिति श्रुतेः। वो युष्माकं पितृणामिति शेषः। तस्मात्प्रकरणभेदेन निमि
त्तभेदात् एकत्रैवाश्वयुक्कृष्णपक्षे विधिद्वयं प्रवृत्तिः पंचचतुष्टयान्यतमकरणं तत्राद्देवसिद्धिः तदकरणेपि सामान्यमासविहितं भवत्येव अत्रैकैकस्याश्रयणे तदनिर्वाहे सति
नकल्पान्तराश्रयणं व्रीहियववत्। उदितानुदितहोमवच्चेति। यदुक्तं तदपि चिन्त्यं। कल्पचतुष्टयविधानेनैवारंभान्तरसंभवात् अन्यथा एकादशे द्वादशे वा पितान्नामकुर्यादि
ति श्रुतेः। एकादश्यां हि पित्र्यानामकरणे आरब्धे तत्र राजादिकृतविघ्ने द्वादश्योपि तत्करणं नस्यात् तथा द्वादशाहादि सपिंडने आरब्धे एकद्वित्र्यादि मासिकेकृते अनन्तरं विघ्नेन तदा
नीं तत्कल्पासमापने भवन्मतेन कल्पान्तराकरणे पित्रादीनां प्रेतत्वपरीहारो नस्यादिति किन्त्वेकं कर्मोपक्रम्य तेनारब्धं व्रीहिना न समाप्यते इति दृष्टान्तार्थः। अथैकस्मिन् कल्पे ॥

आरब्धे तत्र विघ्ने नन्तरदिने सन्ध्यावन्दनादिवत् किमिति न क्रियते इति चेन्न एकतिथ्यकरणे प्रतितिथिकर्त्तव्यकल्पासमापनात् तत्र कल्पान्तरोऽप्युक्तः सन्ध्यावन्दने तु कल्पान्तरा
भावान्नतथेति इत्थं तत्रारब्धकल्पमपि अशक्तावन्येन कारयेत्। तथा च याज्ञवल्क्यः। जिह्वं त्यजेयुर्निनाभ मशक्तोऽन्येन कारयेत्। अनेन विधिराख्यात आत्विककर्त्रक काम्येणाभि
नि विधाकरध्रते। तीर्थे तिथि विशेषे च गंगायां प्रेतपक्षके। निषिद्धेपि दिने कुर्य्यात्तर्पणं तिलमिश्रितं। तिथि विशेष अमावास्यादौ रविशुक्रदिने चैवं वक्षादशपां श्राद्धवासरे सप्तम्यां जन्म
दिवसे न कुर्य्यात्तिलतर्पणं। मत्स्यपुराणे। सप्तम्यां निशि संक्रान्त्यां रविशुक्रदिने तथा श्राद्धजन्मदिने चैव न कुर्य्यात् तिलतर्पणं श्राद्धे अमावास्याश्राद्धभिन्न श्राद्धे। नीलषंडविमोक्षे
णा अमावास्यां तिलोदकैः। वर्षासु दीपदाने न पितॄणामनृणो भवेत्। प्रतिप्रसवमाह। अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च। उपाकर्म्मणि चोत्सर्गे युगादे मृतवासरे। सूर्यशु
क्रादिवारे च न दोषस्तिलतर्पणे। स्कन्दपुराणे। तीर्थमासाद्य कर्त्तव्यं तर्पणं सतिलोदकैः। अन्यथा तर्पयेद्यस्तु सविष्ठायां कृमिर्भवेत् विशेषस्तु गङ्गायां सर्वदा तर्पयेत् पि
तॄन्। स्मृतिः। निषिद्धदिनमासाद्य यः कुर्यात्तिलतर्पणं। रुधिरं तद्भवेत्तोयं दाता च नरकं व्रजेत्। एतच्च तीर्थव्यतिरिक्तजल येति यत्तर्पयेत्तीर्थे पितॄन् कुशतिलोदकैः। बंधात्तान्मो
चयित्वाग्रे स्वयं ब्रह्मपुरं व्रजेत्। इत्याकात्यायनवचनात् संवत्सरप्रदीपे। अमावास्यानु कन्यार्के तीर्थप्राप्तौ तथान्यप कृत्वा श्राद्धं विधानेन दद्यात् षोडशपिंडकं। ऊनविंशति-
पिंडेन षोडशपिंडकमिति पारिभाषिकं प्रस्तुत्यमेकं पितुर्मद्देमेकं द्वौ चम्पकौ त्रिपथके शारणि। तालाष्टकं श्रीफलसप्तकं चपं च वापी नरकं नरकं नयाति। इत्युक्तपंचाश्रवत्। वा
युपुराणीयमेतत् प्रपोत्लिथितत्वेऽवसंधेयः। मत्युः वृद्धिश्राद्धं तथा सोम मन्मथाधेयं महालयं। राजनिषेकं काम्यं च न कुर्य्याद्धानुलंधिते। वृद्धिश्राद्धमिति शाक्काशाट वृद्धिश्राद्ध विषयं

निरवकाशस्यपूर्वव्यवस्थापितत्वात्। अथविहितश्राद्धकर्त्तव्यतानमावास्या।कुथुमिः संवत्सरातिरेकोवैमासोयस्यात्त्रयोदशः।तस्मिंस्त्रयोदशेश्राद्धंनकुर्य्यादिन्दुसंक्षये।संवत्सरप्रदीपेस्मृ
५८ तिरत्नाकरयोः।एकराशिस्थितेसूर्य्येयदिदर्शद्वयंभवेत्।दर्शश्राद्धंतदादौस्यात्नपरत्रमलिम्लुचे।यत्तुजातकर्म्मणिगृह्यपरिशिष्टेदर्शश्राद्धंत्तथैवच।मलमासेपितृतकार्य्यं व्यासस्यवचनं –
यथा। इतिव्यासवचनंनतत्पिण्डपितृयज्ञाख्यश्राद्धपरं समान्नैःपिण्डैर्मकारित्वभिधायनतिक्रम्येत्यनेनमलमासाभिधायकेनमलमासप्राप्तपिण्डपितृयज्ञेनैकमूलत्वात्।नपार्व
णश्राद्धपरं।असंक्रान्तेपिकर्त्तव्यमाब्दिकंप्रथमंद्विजैः।तथैवमासिकंपूर्वंसपिण्डीकरणंतथेति। लघुहारीतवचनेमासिकंपूर्वमित्यभिधानेनसपिण्डीकरणात्परंमासिकंपूर्वंमप –
सीयपार्विणंनिवर्त्तते इत्यवगम्यते प्रथमाब्दिकात्पूर्वंमासिकमितिसमयप्रकाशव्याख्यानेपितथैवार्थःअन्यथापूर्वमासिकवत्परमासिकदर्शश्राद्धस्यापिकरणेपूर्वपदवैयर्थ्या
पत्तेःसपिण्डीकरणादूर्द्ध्वं यत्किंचित्श्राद्धिकंभवेत्।इष्टंवाप्यथवापूर्त्तं तन्नकुर्य्यान्मलिम्लुचे।इतिवचनान्तरप्रतिषेधाच्च अथवाव्यासवचनंभानुलंघितक्षयमासाभिप्रायकं तयो ४८ म
रपिपूर्वलिखितकाठकस्यमलमासपदप्रयोगात् तयोर्विधिःकार्त्तिकत्वाद्यभावात्।अत्रचयद्विहितंकर्म्मान्तरेमासिकादियेत्इत्यस्याप्यविषयत्वंमुख्यमलमासत्वाभावादेवेतिद्रष्टव्यं तत्संदे
भवः।एतेनापरोत्त्वितिहृत्वाकुथुमिवचनेतस्मिंस्त्रयोदशेश्राद्धंनकुर्य्यादिन्दुसंक्षयेइतिपठित्वाव्यासवचनेनविरोधात्।नकुर्य्यान्नोपतिष्ठतइतिकाम्भिरपाठोज्यायानितिहेमाद्रिणाभिहि
तं यत्तुज्ञेयं।समयप्रकाशकृतापि अमावास्यामतस्यतु मध्येनतत्रमासिकमित्यभिधायपूर्वोक्तकुथुमिवचनंसाधकत्वेनाभिहितं यत्तदपिहेयं तद्वचनेमावास्यामृतस्येतिविशेषतोऽनभिधा
नात्नचअब्दमेवुघटंदद्यादन्नंचाभिषसंयुतं।संवत्सरेविवृद्धेतु प्रतिमासंचमासिकं इतिकुथुमिवचनोत्तराभिहितप्रेतमासिकवृद्धिनिषेधार्थं वचनमितिवाच्यं तत्परत्वेप्रमाणाभावात्

किंतु मलमासे प्रेतमासिकवृद्धिः पितृमासिकं तु नास्तीति वचनयोरर्थः पूर्वलिखितहारीतवचनाधिसमः। यत्तु तस्मिंस्त्रयोदशं श्राद्धमिति पठितं। अमावास्यायां मृता हि मलमासे मासिकं
न कुर्यात् अन्यत्र तु मलमासे प्रेतमासिकवृद्धिरिति। न चामावास्यायां पार्वणनिषेध इति वाच्यं पुरुषभेदेन तस्यानियतसंख्यत्वात् त्रयोदशत्वानुपपत्तेः पर्वचाग्रयणं तथेति। अमावास्येति
तस्य प्रतिप्रसवार्थेति व्याख्यातं जीमूतवाहनेनापि तदपि चिन्त्यं अमावास्यामृतस्येति विशेषाभावेन तदर्थकल्पने प्रमाणाभावात्। अमावास्यापार्वणस्य पुरुषभेदेनानियतसंख्यात्वात् त्रयोदश
त्वानुपपत्त्यभिधानं च संगच्छते यतो मृतवत्सरेपि एकद्वित्र्यादिमासिकानन्तरमासिकस्य त्रयोदशत्वानुपपत्तेः। अथ नव संवत्सरपेक्षया पुराणन्यायेन त्रयोदशत्वमिति चेत् प्रकृतेपि अनेनैव
घिना श्राद्धं कुर्यात्संवत्सरं सकृत। त्रिश्चतुर्वा यथाशक्ति मासे मासे दिने दिने। इति देवलवचनेन प्रतिसंवत्सरे प्रतिमासं श्राद्धविधानात्तदपेक्षया अमावास्या श्राद्धस्यापि तुल्यन्यायात् त्रयो
दशत्वमितीन्दुक्षयेत्यभिधानादपि तन्निमित्तप्राप्तश्राद्धमेवावगम्यते न तु प्रेतश्राद्धमिति पूर्वं चाग्रयणान्तथेत्यत्रापि साग्निककर्त्तव्याग्रयणसाहचर्यात् पर्वपदं दर्शयागपरं पिंडपितृ
यज्ञपरं च न पार्वणश्राद्धपरं तस्य कृष्णपक्षनिमित्तकत्वेन पर्वनिमित्तकत्वाभावात् पूर्वोक्तश्राद्धनिषेधकनानावचनविरोधाच्च अतएव मन्वन्तरैर्नानासंग्रहकृद्भिश्चामावास्या मृ
तस्येति विशेषो नाभिहितः। श्राद्धविवेककृद्भिरपि मलमासे पार्वणाभावोव कुप्रबंधे कृतः ॥ ० ॥ अथाधिमासे प्रत्याब्दिकादिविचारः ॥ ० ॥ लघुहारीतः। प्रत्यब्दं द्वादशे मासे का
र्या प्रेतक्रिया बुधैः। क्वचित्त्रयोदशेपि स्यात् आद्यं त्यक्त्वा तु वत्सरं। प्रत्याब्दिकीया प्रेतक्रिया द्वादशे मासि कार्येत्युत्सर्गः अत्र प्रेतपदं प्रमीतमात्रपरं क्वचिन्मलमासपतिते त्रयोदशेपि
मासि कार्या। आद्यं सांवत्सरिकं द्वादश एव मलमासे तस्मिन्नपि कार्यं न त्वेकादशमासाभ्यन्तरे मलमासे पतितेपि तदा द्वादशमासि मृततिथ्यलाभात् सपिंडनानुपपत्तेः। अतएव

एतद्विषये विष्णुधर्म्मोत्तरेण त्रयोदशमासिकश्राद्धान्युक्तानि यथा संवत्सरस्य मध्ये तु यदि स्यादधिमासकः। तदा त्रयोदशे मासिकार्य्यं प्रेतस्य वार्षिकी। सत्यव्रतेनापि संवत्सरस्य मध्ये
५१ तु यदि स्यादधिमासकः। तदा त्रयोदशं श्राद्धं कार्य्यं तदधिकं भवेत्। लघुहारीतः। असंक्रान्ते कर्त्तव्यमाब्दिकं प्रथमं द्विजैः। तथैव मासिकं पूर्वं सपिण्डीकरणं तथा। असंक्रान्तेऽर्वाङ् मलमास
इत्यर्थः। आब्दिकं प्रथमं तच्च न्यूनाब्दिकं सपिण्डीकरणस्य पृथक् द्विर्दर्शनात्। गर्भे वार्द्धुषिके कृत्ये मृतानां पिण्डकर्म्मसु। सपिण्डीकरणे चैव नाधिमासं विदुर्बुधाः। इति यत्सपिण्डी
करणानभिहितं तन्मलमासे पि गर्भाधानपुंसवनानि निमित्तकसपिण्डीकरणापकर्षार्थं। अथ सपिण्डनापकर्षविचारः। अत्र केचित् यदहर्वा वृद्धिरापद्येतेति गोभिलसूत्रेण प्रे
तसंस्कारकर्म्माणि यानि श्राद्धानि षोडश। यथाकालं तु कार्य्याणि नान्यथा मुच्यते नरः इति लघुहारीतवचनात्। अन्यथानुपपद्यमानवृद्ध्यर्थमेवापकर्षो बोध्यते। गर्भाधानादिसंस्का
राश्चान्नप्राशनान्ता नैमित्तिकानि काम्यानि निपतन्ति यथा यथा। तथा तथैव कार्य्याणि (न्यथा मुच्यते नरः इति लघुहारीतवचनात्। अन्यथानुपपद्यमानवृद्ध्यर्थमेवापकर्षो बोध्यते। ४८ म
गर्भाधानादि) न कालस्तु विधीयते। इत्यनेन तुल्यन्यायात् मलमध्ये करणोपपत्त्यर्थोपन्यास इति नचैवं चूडाकरणादीनामपि पितृतुल्यन्यायतया करणे यदहर्वेति निर्विषयं स्यादिति वा
च्यं अधिमासे विवाहं यात्रां चूडां तथोपनयनादीन कुर्य्यात्सावकाशं मांगल्यं ननु विशेषेज्यामित्यादौ निरवकाशत्वेन संस्कारमात्रस्य कर्त्तव्यतया चूडाकरणादीनां शृंगग्राहिक
तया विशेषतो निषेधावगमात्। अस्ते कलिन्दिगतौ यदि जीवभानू षड्कोत्तगः सुररवैकगुरुश्च सिंहे। नारभ्यते व्रतविवाहगृहप्रतिष्ठाक्षौरादि कर्म्म गमनागमनं च धीरैः। इत्यादौ
सर्वत्र कालाशौचे चूडादीनां विशेषतो निषेधावगमाच्च। अन्नप्राशनान्तस्य कापत्तु स्वेरवात् नानास्मृतीनां मूलभूतत्वात् पदवन्नानाश्रुतिकल्पनायां गौरवाच्च। कालाशौचे चूडादि चूडा

दिनकार्य्यमिति नैमित्तिकानि काम्यानीत्यस्यापवादः चूडानिमे धक्रान्नः तथा च महागुरौ प्रेतीभूते किं सपिंडनमपकर्षणीयं किं वा चूडादेस्तदनन्तरकालबाधेन कालान्तरे तत्कर्मेत्याका
ङ्क्षायां यद्ह्वे वैतिवचनं सविषयकमेवेति कुतो निर्विषयतेति नसद्धस्त्रापिं उनस्य वृद्धिश्राद्धाभावात् तत्पूर्वं वांच ब्राह्मणादि हुते ताते पतितेसंगवर्जिते। स्युत्कनाम्न म्नतेदेयं येभ्यस्
व ददात्यसौ। इति परिगणित निमित्त व्यतिरेकेनाकरणात् वृद्धिश्राद्धस्य कागतिरिति वाच्यं। न तत्पूर्वं यतः प्रोक्तं सपिराडनविधिं क्वचित् वृद्धिः श्राद्धस्य लोपः स्यादुभयोरपि पक्षयो।
रितिवद्योपएव न चांगवाधात् संस्काराणां वैगुण्यमिति वाच्यं तत्तदंगबोधकविधीनां तदितरपरत्वादिति भावः। अन्यथा गर्भाधानादि निमित्तेनापकर्षे महावि ज्ञवापत्तेरित्या
हुस्तच्चिन्त्यं। सपिराडीकरणादूर्ध्वं प्रेतः पार्वणभाग्भवेत्। वृद्धीष्टापूर्त्तयोग्यश्च गृहस्थश्च ततो भवेदिति मत्स्यपुराणवचनात्। महागुरौ प्रेतीभूते वृद्धिकर्म्म न युज्यते इति व
चनाच्च। महागुरौ प्रेतीभूतमात्रे वृद्धिकर्म्मानधिकारात् निरवकाशवृद्ध्यर्थमपकर्षोपपत्तेः न च नैमित्तिकानीति वचनात् प्रतिप्रसव इति वाच्यं प्रकरणात् तस्य कालाशुद्धेः
प्रतिप्रसवरूपत्वात् न च महागुरुप्रेतीभावस्य कालाशुद्धित्वं। प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत्। नापि दैवं न वा पैत्रं यावत्पूर्णो न वत्सरः। इति तच्छिवितदैवीपुरा
णवचनेन देहाशुद्ध्यभिधानात् अत एव वैश्वदेवाग्न्याधानारंभे प्रतिप्रसवमाह छंदोगपरिशिष्टं बलिकर्म्म प्रक्रम्य तत्र हुपत्नौ प्रेतकुर्य्यादेकादशे हनि। प्रागेव एकादशात्
श्राद्धात् सद्योजागबलादिकं एतच्च विकर्म्म तद्धगनद्ववाहित्वात् वैश्वदेवस्यापि ग्रहणं एकादशात् एकादशाह क्रियमाणात् जागरणादिकमग्न्याधानांगं वस्तुतस्तु कालाशौ
चं तु तदेव यत्सर्वान् पुरुषान् प्रति समानं यथा मलमासादि अन्यथा दशाहाशौचस्यापि कालाशौचत्वेन त्वापि नैमित्तिकानीति वचनात् पुंसवनादि स्यात् यदप्यभिहितं न तत्पूर्वमित्यत्रे

नकेवलं वैश्वदेवाग्न्याधानसाहित्ये वैश्वदेवो महागुरुनिपाते वृद्धिश्राद्धं विना यथा करणीयो तथा गर्भाधानाद्यन्नप्राशनान्ता: कर्त्तव्या इति तदपि न समीचीनं यथावचनं हि वाचनिक
50 मितिन्यायात् तत्र वलिकर्म्मादौ तथात्वेऽपि तु तथाविधवचनाभावात् कथं वृद्धिश्राद्धं विना अन्नप्राशनान्तकर्मसिद्धि: अत एव निर्णयामृते अन्नप्राशनाद्यर्थं सपिंडनापकर्ष इत्यभि
हितं एतेन पदद्युक्तं गर्भाधानादिनिमित्ते नापकर्षो महाविप्रत्वापत्तेरिति तदपि चिन्त्यं यतो यत्र गर्भाधाने वृद्धिश्राद्धमस्ति तत्रस्तुतरां अपकर्षव्यवहार:। यत्र छंदोगानां नास्ति वृद्धि
श्राद्धं तत्रापि वृद्धिश्राद्धाभावे नैव व्यवह्रियते किन्तु तत्रापकर्षो युज्यते गर्भाधानस्य वृद्धिश्राद्धत्वादिति। ननु निष्क्रमणान्नप्राशनयो: कथं वृद्धिश्राद्धमिति चेत् निष्क्रमणस्य गो
भिलोक्तत्वात् सामान्येन सर्वार्थे वाच्याहार्य्यवन्नीत्यनेन तत्र वृद्धिश्राद्धसिद्धे: अन्नप्राशने च शौनक: अथ पुण्येऽह्नि षष्ठे तु मास्यन्नप्राशनं भवेत्। कृत्वाभ्युदयिकं श्राद्धं दधिम
ध्वाज्यसंयुतं। राजमार्त्तंडे कृत्यचिन्तामणौ च। सूतेऽत्यन्ते तथा श्राद्धमन्नप्राशनिके तथा। चूडाकार्य्ये व्रते चैव नाम्निपुंसवनेऽपि च। पाणिग्रहे प्रतिष्ठायां प्रवेशे नववेश्मन:। एतद्वृद्धिक ५ मल
रं नाम गृहस्थस्य विधीयते। एतेन नामकर्म्मणा वालानां चूडाकर्म्मादिके तथा इति विष्णुपुराणवचने चूडाकर्म्मादिक इत्यादिपदादुपनयनपरिग्रह:। एतेन चूडाकरणात् प्राक् नि
ष्क्रमणान्नप्राशनयोराभ्युदयिकं न कार्य्यं नामकरणे तु विशेषोपदेशादेव कर्त्तव्यता न चादिपदस्य प्रकारार्थत्वान्निष्क्रमणादावपि कर्त्तव्यता नामकरणाकर्म्मणा: पृथगुपादान
वैयर्थ्यापत्तेरिति वाचस्पतिमिश्रोक्तं निरस्तं एवमनाश्रमिना न तिष्ठेत्तु क्षणमपि द्विज:। आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते त्वसौ। जपे होमे तथा दाने स्वाध्याये निरत: सदा। नासौ
फलमवाप्नोति कुर्वाणोऽप्याश्रमच्युत: इति दक्षवचनात्। स्वविवाहार्थमप्यपकर्षो युक्त: कन्याया अलाभ एव यथा कथंचित् स्थितिरुक्ता पैठीनसिना यथा अलाभे चैव कन्याया:।

स्नातकव्रतमाचरेत्। भविष्ये चत्वारिंशद्वत्सराणां सप्तानां च परे यदि। स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी मतः। अष्टचत्वारिंशदब्दं यावद्वयो न पूर्यते। पुत्रभार्यावियुक्तस्य नास्तिय
ज्ञाधिकारिता विशेषतस्तु संवन्धतत्त्वेऽनुसंधेयः। अथ संन्यासनिषेधविचारः॥ तत्राश्रमाणामुपपराशरभाष्ये वामनपुराणं। चत्वार आश्रमाश्चैव ब्राह्मणस्य प्रकीर्तिताः। गार्हस्थ्यं ब्रह्म
चर्य्यं च वानप्रस्थं त्रयो मताः। क्षत्रियस्यापि कथिता आश्रमास्त्रय एव हि। ब्रह्मचर्य्यं च गार्हस्थ्यं माश्रमद्वितयं विशः। गार्हस्थ्यमुचितं त्वेकं शूद्रस्य क्षणमाचरेत्। क्षणमुत्सवरूपं
यत्तु प्रव्रज्यावसिता यच्च त्रयो वर्णा द्विजातयः। निर्वासं कारयेद्विप्रं दासत्वं क्षत्रवैश्ययोः। इति कात्यायनोक्तं तद्युगभेदादविरुद्धं। प्रव्रज्यावसिता प्रव्रज्याच्युताः। अत एव अश्वमेधं गवा
लम्भं संन्यासं पलपैतृकं देवरेण सुतोत्पत्तिं कलौ पंच विवर्जयेत् इति कलौ संन्यासनिषेधकं क्षत्रियवैश्यविषयकमिति। एवं च आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहादिति म
नुवचनस्य ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहादिति विश्वरूपलिखितस्य च युगभेदादविरोधे संभवति शूलपाणि यज्ञवल्क्यटीकायां विशेषवचनानाकरत्वाभिधानेऽपि यन्तत्
कृतप्रायश्चित्तविवेके धृत पूर्वोक्तकात्यायनवचनविरोधश्च स्यात् मिताक्षरायां तु ब्राह्मणाः प्रव्रजन्तीति श्रुतेरग्रजन्मन एवाधिकारो न द्विजातिमात्रस्य अन्यत्तु त्रैवर्णिकानां प्रकृत
त्रयाणां वर्णानां वेदानधीत्य चत्वार आश्रमा इति सूत्रकारवचनात् द्विजातिमात्रस्याधिकारमाहुरिति लिखितं॥ ०॥ अथापुत्रस्य मृतताहे पार्वणं॥ ॥ तत्र प्रचेताः प्रेतमासस्य यः
पक्षस्तत्तिथौ प्रतिवत्सरं। यावत्स्मरति पौत्रोऽपि एकमुद्दिश्य दीयते। प्रेतमासस्य मृतमासस्य। एकमुद्दिश्यपतिश्रवणात् अमावास्यायां प्रेतपक्षे च मृतस्यापि पौत्रादिना पार्वणं न क
र्तव्यं। तथा चापस्तम्बः। अपुत्राये मृताः केचित् स्त्रियो वा पुरुषाश्च ये। तेषामपि च देयं स्यात् एकोद्दिष्टं न पार्वणं। अत एव जावालेन प्रत्याब्दिके तु औरसक्षेत्रजाभ्यामेव पार्वणं कर्त्तु

८१ मित्युक्तं यथा। औरसक्षेत्रजौ पुत्रौ विधिना पार्वणेन तु। प्रत्यब्दमितरे कुर्य्युरेकोद्दिष्टं सुता दश॥ अथाधिमासमृतस्याधिमासे प्रत्याब्दिकं॥ मलिम्लुचे तु संप्राप्ते ब्राह्मणो म्रियते
यदि। ऊनाभिधे यो मासो वै कथं कुर्य्यात्तदाब्दिकं। यस्मिन् राशिगते भानौ विपत्तिः स्याद्द्विजन्मनः। तस्मिन्नेव हि कुर्वीत पिण्डदानोदकक्रियां। इति व्यासवचनात् मलमासमृत
स्य सौरेणैव प्रत्याब्दिकं सदा कर्त्तव्यमिति समयप्रकाशकृतः। तन्न पूर्वोक्तयुक्त्या तुलाघटके यदि मलमासस्तदा तत्र मृतस्य अब्दान्तरे कदाचिन्मृततिथ्यप्राप्तौ श्राद्धलोपापत्तेः
किन्तु व्यासवचनं तन्मासस्य पुनर्मलमासत्वे तत्रैव श्राद्धं नोत्तर इति विधायकं। मलमासमृतानान्तु श्राद्धं यत् प्रतिवत्सरं मलमासेऽपि कर्त्तव्यं नान्येषान्तु कदाचन इति का
लमाधवीयधृतपैठीनसिवचनैकवाक्यत्वात् एवं च जातकर्म्मणि यच्छ्राद्धं नवश्राद्धं तथैव च। प्रतिसंवत्सरश्राद्धं मलमासेऽपि तत् स्मृतं। प्रतिसंवत्सरश्राद्धमशौचात् पति ५९
तं च यत्। मलमासेऽपि तत् कार्य्यमिति भागुरिभाषितमिति वाचस्पतिमिश्रधृतबृहस्पतिवचनमप्येतद्विषयं बोध्यं ऊनाभिधेयं यस्य तत्तथेति विनामकवद्व्याख्येयमिति॥ इति
वन्द्यघटीय हरिहर भट्टाचार्य्यात्मज श्रीरघुनन्दनभट्टाचार्य्य विरचितं मलमासतत्त्वं समाप्तं॥ हरिः ॐ तत्सत्॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥